ःकरेन्दुश्च[3] मूलात् ।
राः क्रमेण
दैश्चरन्ति ।।७०।।
शीघ्रकार्ये भृगोश्च
हस्तनेत्रं द्विधा
स्यात् ।
चैकहीनं शतं च
क्रचारा क्रमेण
।।७१।।
ण्डमेतन्नरेन्द्र
पाश्च मूलात् ।
पनीयाः क्रमेण
लचक्रे
समस्तः ।।७२।।
न्दकार्ये पदानि
ङ्गलादिग्रहाणाम् ।
ापरे पूर्वभागे
भागे परे च ।।७३।।
साक्षिनेत्रं दिनर्तु-
ञ्चलोकेन्दुसंख्या ।

शुक्रस्यैवं बुधस्यापि खरसहुतभुक् पिण्डमेकीकृतं स्यात्
एवं मासत्रयेणाब्ददिनऋणघटी भुक्तिरेषा त्रयाणाम्
।।७४।।

मासे भुक्तिर्गुरोश्च प्रकटितघटिका रुद्रसंख्या सपादा
त्रिंशत्पाणी पलानि स्फुटयुगघटिका सूर्यपुत्रस्य भुक्तिः ।
एकीभूता दिनाख्या त्रिगुणितमपि तत्सार्धमासः सरात्रो[6]
भर्तुर्भुक्ते दिनानां प्रतिदिवसमृणं षड्ग्रहाणां च
भुक्तिः ।।७५।।

मासैकं मन्दकर्मण्यधिकमपि विभोर्नानुभुक्तं ग्रहैर्यत्
तस्माद्वै सार्धसप्तप्रकटितघटिका भुक्तिरत्रैव मासे[7] ।
राहोर्मासस्य भुक्तिः सरविशशिपदं चार्धनाडीविहीनं
तिस्रोऽर्कस्यायनाद्ये शशिमदनदिने पञ्च चन्द्रस्य
नाड्यः ।।७६।।

नो भुक्ता यार्धनाडी ऋतुदिनसमये सा कलाहीनचन्द्रा
सा सूर्यस्याधिकारैः खलु युगगुणिता सूर्यमासे दिनं तत् ।
राहोर्मासस्य भोगान्नयनविगुणितात् पक्षभोगेन भुक्ता
लब्धाः केतोश्च नाड्यः प्रतिदिनसमये मासभोगाश्च
राहोः।। ७७।।

कृत्वा सप्तार्धलिप्ता खलु गुणगुणिता शोधयेत् सूर्यभोगे
केतुः सूर्येण सार्धं विचरति पुरतः पृष्ठतः शीघ्रचक्रे ।
चारे सार्धं[8] द्विलिप्तां चरति दिनदिने सूर्यभोगात् क्रमेण
षट्त्रिंशद्भिः स्वमासैश्चरति सुघटिका लोकतिथ्या-
हताश्च ।।७८।।

सार्धं मासं द्विनाडी प्रतिदिनमुदयः शीघ्रवक्रे[9]ऽग्रपृष्ठे
सार्धं मासं हि यावद्भवति तदुदयो दृश्यते मर्त्यलोके ।
भूयः श्रीकालचक्रे प्रविशति स यदा वर्षभोग्येऽप्यदृश्यो
ज्ञाते तस्योदयांशे तदुदयनमपि ज्ञायतेऽनन्तकालम् ।।७९।।

वर्षाहः पञ्चगुण्यं पुनरिषुनिहतं चायनाहः प्रहीनं
रन्ध्रैर्मिश्रं भवन्ति स्वगतिगुणवशान्मण्डलानि ग्रहाणाम् ।
भौमे शैला हि षट्कं भवति दिनगणं शैलरन्ध्रादिनागं
सौम्ये दन्ताग्निवेदं भवति सुरगुरौ भार्गवेऽगो जिनाक्षी
।।८०।।

षट्षट्शैलाम्बरैकं भवति दिनगणं मण्डलं सूर्यसूनौ
शैलर्त्वेकं च भौमे खलु भवति धनं चन्द्रपुत्रे शतघ्नम् ।
हीनं वह्निचर्कशैलैर्दशगुणितदिनं भार्गवे द्व्यष्टहीनं
शून्याकाशर्तुनेत्रं खकरफणियुगं मन्त्रिसर्य्यो(?)[10] ऋणं
स्यात् ।।८१।।

भौमे सार्धा नवार्धाधिकनृपतिबुधे सूर्यसूक्ष्मां गुरौ स्यात्
षट् शुक्रे दोषमर्कावृणमिति सकलं शोधयेद्भुक्तिमध्ये ।
पश्चाद् वृद्धिश्च तेषां भवति नरपते जन्म नक्षत्रचारात्
स्वाङ्गे नीचस्य शुद्धिर्भवति गतिवशादुच्चकस्यार्कमध्ये
।। ८२ ।।

षण्मासैर्मासभुक्तं गुणितमपि भवेत् कालचक्राब्दमासैर्
भागे लब्धे त्वृणं स्यादपि रविशशिना नानुभुक्तार्धनाडी ।
केतोर्भूयोऽधिकं यत् प्रतिदिनसमये गुण्यमिन्दोर्दिनैश्च
षष्ट्या भागेन नाडी प्रतिदिनसमये शीघ्रवक्रोदये च ।।८३।।

सौम्यो मन्त्री च शीघ्रे प्रभवति बलवान् भौमकेतू च वक्रे
मन्दः शुक्रश्च मन्दे प्रकृतिगुणवशाच्छेषचारेऽबलाश्च ।
शीघ्रे पूर्वामुखाः स्युः पुनरपरमुखा वक्रचारे प्रविष्टा
मन्दे सव्याननाः स्युः स्वगतिगुणवशान्निर्गमे चोत्त-
रास्याः ।।८४।।

मासे त्रिंशद्दिना ये जलनिधिनिहताः खाक्षिचन्द्रं यदिन्दो
राशीनां द्वादशानां युगगुणितपदं चाष्टवेदं रवेश्च ।
तन्मध्ये हानिवृद्धी त्वयनगतिवशादुत्क्रमेण क्रमेण
चक्रार्धार्धे समस्ता वसुयुगगणना वेदितव्या नरेन्द्र ।।८५।।

पर्वच्छेदे च राहोः प्रविशति शशिनो मण्डले मण्डलं च
सर्वग्रासो विशुद्धो भवति शशिवशान्मण्डलं षष्टिनाड्यः ।
अर्धग्रासोऽर्धशुद्धे भवति शशिवशान्नाडिका यावदस्ति
छेदो ग्रासो रवीन्दोर्दिननिशिसमये कृष्णशुक्ले च पूर्वे ।।८६।।

मानुष्याणां शताब्दं गुणितमपि भवेद्वर्षभुक्त्या ग्रहाणां
द्विस्थं दिग्भागलब्धं भवति च तदृणं शोधयेन्मूर्ध्नि राशौ ।
विंशत्येकं हि लक्षं षडयुतमपि षड्वर्षसंख्या युगार्धे
भूयो राशिद्वयेन प्रभवति नियतं वर्षसंख्या चतुर्णाम् ।।८७।।

शून्यं शून्यं खनागाः करमुनिशशिनः कृद्युगस्य प्रमाणं
त्रेतायां खं खशून्यं रसनवदिनकृद्वर्षसंख्या प्रसिद्धा ।
शून्यं शून्यं खवेदं रसभुजगमिति द्वापरेऽब्दानि सम्यक्
शून्याकाशं खनेत्रं गुणजलनिधयो वर्षसंख्या कलौ
स्यात् ।।८८।।

---

°करतुंश्च [4] ने. °स्त्विति° [5] के. नेत्रारन्ध्राद्धि संख्या [6] ने. °त्रौ [7] ने. मासैः [8] ने. सार्द्धं [9] ने. °चक्रे° [10] ཉི·ཧྲུས· सौरि, शनैश्चर

एतैर्वर्षैर्युगान्ते ग्रहगणचरणं तिष्ठते राशिशून्ये
अश्विन्याद्यं च भूयः[1]प्रभव इति[1] तथा चैत्रमासादिकं च ।
वारो योगस्तिथिर्वै करणमपि तथा चादिकं तत्र काले
देवानां दानवानां क्षितितलनिलये रौद्रयुद्धेऽभविष्यत्
॥८९॥
षड्वर्गाः[2] सार्कमात्राः खलु गुणगुणितास्त्रीणि वर्षाणि सूर्ये
आद्या ह्रस्वादिनाख्यास्त्रिगुणशशिकलाः सार्धमासं हि चन्द्रे ।
नाड्यो ह्राद्याः समात्रास्त्रिगुणितमपि यत्तु त्रिरात्रं हि राहोः
श्रीशून्यानाहताद्यास्त्रिगुणितमपि यत्तु[3] त्रिलग्नं च
राहोः ॥९०॥
भूताः सूर्येन्दुसंख्याः पुनरपि नृपते सार्धमासं त्रिवर्षं
त्यक्त्वा सार्धं हि मासं[4] भवति मुनिवरैश्छेदितं कालचक्रम् ।
मासे[5] क्षेपैकवारो द्विगुणनृपघटीपिण्डके द्वे त्वधश्च
चक्रे वारो विभक्तो भवति नियमितः षष्टिभिर्देव-
तीभिः ॥९१॥
द्वात्रिंशद्भिन्ननाड्यो वसुगुणितमुनेर्देवते पिण्डके द्वे
देयं हेयं च देयं प्रथमशशिपदं पञ्चपञ्चात्र षड्भिः ।
इन्दोः पक्षत्रयाहस्त्रिगुणमपि भवेत् सूर्यभोगप्रसिद्धं
द्वे चर्क्षे षष्टिभक्ते प्रथमरविदिने रुद्रनाड्यः सभोगाः ॥९२॥
एतच्छ्रीकालचक्रं ग्रहगणसहितं बाह्यदेहेष्वभिन्नं
संहारस्फारहेतुं त्रिभुवननिलये कामरूपेण सूर्यः ।
प्रज्ञोपायप्रभेदैः समविषमकुलैः शीघ्रचक्रादिचारैर्
न ज्ञातं वीतरागैः परममुनिकुलैर्ब्रह्मरुद्रादिदेवैः ॥९३॥
आद्याः पञ्च स्वरा ये प्रथमतिथिवशात् पञ्चनन्दादियोगे
कुर्वन्त्यत्रोदयं ते यदि नृप न भवेत्तत्र भौमादिवारः ।
भौमेऽनिष्टोदयो वै यदि भवति पुनः कृत्तिकायोग एव
तस्मिन् संग्रामरोगो यदि भवति नृणां मृत्युरादिस्वर-
स्य ॥९४॥
भद्रा सौम्ये द्वितीयो नृपति यदि मघायोग एवात्र वारे
अश्लेषार्क्षं जयायां यदि भवति गुरुर्याति मृत्युं तृतीयः ।
रिक्ता तिथ्या धनिष्ठा यदि भवति भृगुर्याति मृत्युं चतुर्थः
पूर्णा मन्देन सार्धं प्रभवति भरणी पञ्चमो याति
मृत्युम् ॥९५॥
सूर्यो नन्दोदयानां व्रणमपि च भवेत् क्लेश एवातुराणां
सोमे[6] भद्रोदयानां प्रभवति नियतं युद्धरोगे च तद्वत् ।
सत्यं पञ्चोदयानां भवति बहुफलं मृत्युयोगैर्विहीनं
ज्ञातव्यं रोगयुद्धेऽप्यशुभशुभफलं देशयात्राविवाहे ॥९६॥
एतन्नक्षत्रवाराः स्वरगणतिथयः पञ्चतत्त्वप्रभेदैः
पक्षे मासेऽयनेऽब्देऽप्युदय इह भवेत् षष्टिसंवत्सरेण ।
चैत्राद्यैर्द्वादशाङ्कैरुदय इह भवेत् पक्षभेदः स एव
द्वासप्तत्या दिनानामुदय इह भवेन्मासभेदे स्वराणाम् ॥९७॥
षण्मासैश्चायनाङ्कं प्रभवमुखगतैर्द्वादशाब्दैश्च वर्षैर्
एवं पञ्चस्वराणामुदय इह भवेच्चान्तमेवं हि पश्चात् ।
आदौ बालाः[7]स्वराश्च स्वतिथिगुणवशात् श्रीकुमारा द्वितीये
प्रौढा वृद्धाः क्रमेणाग्निजलनिधिदिने पञ्चमेऽस्तंगताः
स्युः ॥९८॥
आद्याः पञ्च स्वरा ये खलु गुणगुणितास्ते द्विधा त्रिंशदेव
कादौ वर्गाक्षरे च प्रकृतिगुणवशाद्योजनीयाः समस्ताः ।
ह्रस्वानां शुक्लपक्षेऽप्युदय इह भवेत् पञ्चतत्त्वप्रभेदैर्
दीर्घाणां कृष्णपक्षे भवति सनियतं सृष्टिसंहारयोगात् ॥९९॥
सप्तविंशत्तदृक्षं स्फुटशरघटिकाः सूर्यलग्ना नवांशा
एते च त्रिस्वभावाः स्थिरचलसुसमा मेषलग्नादयोऽत्र ।
मेषः कर्की तुला वै मकर इह चरा तद्द्वितीयाः स्थिराश्च
शेषान्ये द्विस्वभावा दिननिशिसमये नित्यमेवोदि-
तास्ते ॥१००॥
अस्मिंस्त्रिंशन्मुहूर्तान्यपि दिनसमये[8] नाडिकाप्येव षष्टी
रात्रौ त्रिंशत्स्वराणामुदय इह भवेद्द्वे मुहूर्ते मुहूर्ते ।
त्रिंशद्वर्गाक्षराणां प्रभवति घटिका ह्रस्वदीर्घप्रभेदैस्
तिथ्यंशे चन्द्रमध्ये निगदित उदयश्चास्तमेतं हि
तस्मात् ॥१०१॥
शून्यं वाय्वग्नितोयान्यवनिरपि कुलं चादिपञ्चस्वराणां
राह्वग्नीन्द्वर्कसौम्यारगुरुभृगुखलाः सौरिरुद्राधिदैवाः ।
पूर्वोक्तैरर्कलग्ने निशिदिवसवशान्नाडिका तत्र साध्या
तन्मध्ये यः स्वरोऽभूद्ग्रहबलबलवान्मण्डलं तेन
साध्यम् ॥१०२॥
वामे ह्रस्वस्वराणामुदय इह भवेद्दक्षिणे चापराणां
वामे शून्यादितत्त्वं ग्रहगणचरणं राहुमुख्यं समस्तम् ।
सव्ये तत्त्वं धराद्यं ग्रहगणनियमः सूर्यपुत्रादिनैव

बाह्यैषा कालना
प्रश्ने संग्रामहेतो
वायौ शून्ये च
सन्धिस्तोये गुरौ
मृत्युक्लेशो व्र

संग्रामे शत्रुनाश
वायौ चन्द्रे तु
शुक्रे तोयेऽर्थला
एवं यात्रा विवा
दूतेनोक्ताः स्वर
भूयो भूताहतास
चन्द्रे वह्नौ शरे
नेत्रे वेदे रसे वै
वर्षा मासाश्च
लग्नैकं पञ्चभे
तत्त्वैकं श्वासष
नाड्यंशा षष्टि

निश्वासोच्छ्वास
दैवज्ञैः कालना
न ज्ञाते वर्तमाने
सोऽन्धोप्यर्थं[6] गु

न ज्ञाते सूक्ष्मयो
कालाग्निः सूर्य
मृत्युं व्याधि व्र
तस्मात्तद्वर्जनीयं
राहुश्चन्द्रश्च सं
शत्रोर्नाशः स्वपु
सम्यग्लग्नैश्च स
नूनं सर्वार्थसिद्धि

कृत्वा त्वृक्षं त्रि

[1-1] ने. प्रभवति च [2] ने. °वर्षाः [3] ने. यत्तत् [4] ने. मासो [5] के. मास° [6] ने. सौम्ये [7] ने. वाराः [8] के. दिननिशिसमये

बाह्येषा कालनाडी ग्रहभवनसमा सस्वरा साधनीया ॥१०३॥

प्रश्ने संग्रामहेतोर्भवति च मरणं कालशून्योदिते च
वायौ शून्ये च भङ्गो व्रणमपि च भवेद्वह्निभौमोदये च ।
सन्धिस्तोये गुरौ स्यान्न हि भवति रणं भूमिमन्दोदये च
मृत्युक्लेशो व्रणं स्यात् सुखमपि समतापृच्छकस्यातुरस्य ॥१०४॥

संग्रामे शत्रुनाशः प्रभवति नियतो राहुशून्योदये च
वायौ चन्द्रे तु भङ्गो व्रणमपि च रणे सौम्य वह्न्योदये च ।
शुक्रे तोयेऽर्थलाभो रिपुरपि च वशी भूमिकेतूदये स्याद्
एवं यात्रा विवाहे भवति बहुफलं वाममार्गे ग्रहैश्च ॥१०५॥

दूतेनोक्ताः स्वरा ये खलु दशगुणिता राशिचक्रेण मिश्रा
भूयो भूताहतास्ते निकटजनयुताः सप्तभागावशेषाः ।
चन्द्रे वह्नौ शरेऽद्रौ विषमपदगते नास्ति लाभो नराणां
नेत्रे वेदे रसे वै सुसमपदगते कार्यसिद्धिर्भवेच्च ॥१०६॥

वर्षा मासाश्च पक्षा दिननिशिसमया लग्नमध्ये प्रविष्टा
लग्नैकं पञ्चभेदैर्ग्रहगणसहितं सस्वरं तत्त्वभिन्नम् ।
तत्त्वैकं श्वासषष्ट्याभ्यधिकगुणशतं वर्तते कालनाड्यां
नाड्यंशा षष्टिलिप्ता तदवयव इति श्वासषट्कं नरेन्द्र ॥१०७॥

निश्वासोच्छ्वासमध्ये त्वशुभशुभफलं ज्ञायते योगयुक्तैर्
दैवज्ञैः कालनाड्यां गतदिवसवशात् साधयित्वार्कचन्द्रौ ।
न ज्ञाते वर्तमानेऽप्यशुभशुभफलं यो वदत्यत्र लोके
सोऽन्धोप्यर्थं[9] गृहीत्वा प्रविशति गहनं हस्तिसिंहप्रकीर्णम् ॥१०८॥

न ज्ञाते सूक्ष्मयोगे ग्रहबलसहिते दीयते लग्नयोगः
कालाग्निः सूर्यभौमो दिनकरतनयो जन्म सप्तस्थराशौ ।
मृत्युं व्याधिं व्रणं वै सकलधनविनाशं च कुर्वन्ति तस्मिस्
तस्मात्तद्वर्जनीयं खलु समवचनैरन्यलग्नं प्रदेयम् ॥१०९॥

राहुश्चन्द्रश्च सौम्ये[10] गुरुभृगुसहितो जन्म सप्तस्थराशौ
शत्रोर्नाशः स्वपुष्टिर्विजय इति रणे द्रव्यलाभः सरामः ।
सम्यग्लग्नैश्च सर्वैर्यदि भवति पुनर्वामानडी स्वदेहे
नूनं सर्वार्थसिद्धिः सकलभुवि तले शुद्धवारे तिथौ च ॥११०॥

कृत्वा त्वृक्षं त्रिभागं नवनवनवकैर्जन्मनक्षत्रमादौ

---

[8] के. दिननिशिसमये [9] ने. °प्यर्थे [10] ने. सौम्यो



क्रूराश्चन्द्रेण सार्धं विषमपदगता मृत्युरेवातुराणाम् ।
अश्विन्याद्यैस्त्रिनाड्यामहिरपि रचितो रेवती यावदेव
पापेन्दुं जन्म ऋक्षं भवति यदि नृणामेकनाड्यां विनाशः ॥१११॥

षट्तिथ्यष्टाद्रिचन्द्रान् दश सनवदशार्कैकविंशत् सुवर्षान्
सूर्येन्द्वारो[1] बुधोऽर्की गुरुभुजगसिता भुञ्जते तान् क्रमेण ।
तस्मिन्नन्तर्दशायां पुनरपि च ततः चाष्टवर्गाक्षरे च
क्रूराः कुर्वन्त्यशान्तिं परमसुखकराः सौम्यरूपा ग्रहा ये ॥११२॥

पुष्ये मासे त्वविद्या मकरगतरवौ कुम्भसूर्ये च माघे
संस्कारो मीनसूर्ये भवति नरपते फाल्गुने मेषसूर्ये ।
विज्ञानं नामरूपं वृषमिथुनगते चैत्रवैशाखज्यैष्ठे
नेत्राद्यं कर्कटेऽर्के भवति हरिरवौ स्पर्शनं वेदना च ॥११३॥

आषाढे श्रावणे योषिदपि तुलगते भाद्रमासेऽश्विने च
कृष्णोपादानमेव प्रभवति च भवः कार्त्तिके वृश्चिकेऽर्के ।
जातिश्चापस्थसूर्ये मरणमपि तथा मार्गशीर्षे क्रमेण
एवं सूर्येन्दुभेदैरुभयगतिवशाद् द्वादशाङ्गानि राजन् ॥११४॥

पूष्यो[2] माघेऽभिसन्धौ मकरगतरवौ तत्र चारे त्वविद्या
तस्मान्मृत्युर्द्वितीये भवति नरपते जातिरेवं तृतीये ।
एवं सर्वं भवाद्यं क्रमगतिगुणितं द्वादशाङ्गानि यावत्
तस्माद्वह्न्यब्धिबाणं मरणगतिवशात् षष्ठमासं कदाचित् ॥११५॥

पक्षस्तिथ्याख्यवारै रविचरणवशात् षोडशाङ्गैः कदाचित्
संस्कारो माघसन्धौ कलशगतरवौ तत्र संस्कार एव ।
विज्ञानं तद्द्वितीये प्रभवति दिवसे नामरूपं तृतीये
एवं मासद्वयाङ्गं भवति रविवशात् सृष्टिसंहारयोगात् ॥११६॥

तत्राविद्यादिनाङ्गं विषममपि भवेच्छोभनं सर्वकार्ये
संस्काराद्यं समस्तं त्वशुभमपि यदा सेकयात्राविवाहे ।
एवं पक्षप्रभेदैः शशिगमनवशाद्द्वादशाङ्गानि यानि
शुक्ले कृष्णे च पक्षे प्रथमतिथिवशात् सृष्टिसंहारयोगात् ॥११७॥

सूर्यारौ केतुमन्दौ रिपुनिधनकराः संस्थिताः सव्यपृष्ठे
वामेऽग्रे सौम्यरूपं ग्रहगणसकलं युद्धभूम्यां तथैव ।

---

[1] ने. °रा [2] ने. पौषे [3] ने. रुद्रा [4] ने. भवे शक्रयाम्यां
[11] के. रुद्रमृत्या° [12] ने. मनुमुनि° [13] ने. °पात°

वातुराणाम् ।
रेवती यावदेव
ामेकनाडचां
विनाशः ॥१११॥
कविंशत् सुवर्षान्
ञ्जते तान् क्रमेण ।
ऽटवर्गाक्षरे च
सौम्यरूपा
ग्रहा ये ॥११२॥
ासूर्ये च माघे
ुने मेषसूर्ये ।
ाक्षज्यैष्ठे
नं वेदना च ॥११३॥
ामासेऽश्विने च
त्तिके वृश्चिकेऽर्के ।
ार्शीर्षे क्रमेण
ानि राजन् ॥११४॥
त्र चारे त्वविद्या
ारेवं तृतीये ।
ाङ्गानि यावत्
षष्ठमासं कदाचित्
॥११५॥
ोडशाङ्गैः कदाचित्
त्र संस्कार एव ।
ामरूपं तृतीये
ष्टिसंहारयोगात्
॥११६॥
ाभनं सर्वकार्ये
ेकयात्राविवाहे ।
ाङ्गानि यानि
सृष्टिसंहारयोगात्
॥११७॥
स्थिताः सव्यपृष्ठे
भूम्यां तथैव ।

योगिन्यो विष्टिरुद्राश्च पवनसहिताः सौख्यदाः सव्यपृष्ठे
वामेऽग्रे मृत्युरूपा समविषमगता द्वे बले घातयन्ति ॥११८॥
ब्राह्मी रौद्री[3] कुमारी खगपतिगमना शूकरी वज्रहस्ता
चामुण्डा चैव लक्ष्मीर्भवति वसुतिथावादितिथ्यां नवम्याम् ।
शक्रे यक्षेऽग्निकोणे दनुयमवरुणे मारुते चेशभूमौ
कुर्वन्त्यत्रोदयान्ताः पुनरपि तिथिषु द्वचष्टभेदैर्विभिन्नाः
॥११९॥
विष्टीनां शुक्लपक्षेऽप्युदय इह भवेच्छक्रयम्याब्धिपक्षे[4]
कृष्णे पक्षे च भूयः शिखिदनुपवनः[5] चेशकोणे क्रमेण ।
रुद्रः पूर्वापरार्धं व्रजति दिनवशादुत्तरे चोत्तरेऽर्के
वारुण्यादग्निवर्णं व्रजति स नियतं दक्षिणे दक्षिणेऽर्के
॥१२०॥
पूर्वादर्ध[6]प्रहारात् प्रविशति पवने दक्षिणे याति तद्वद्
ईशे तोयेऽग्नियक्षे व्रजति दनुपुरे मारुतोऽर्केऽस्तमेते ।
त्यक्त्वा श्रीमूलराहुं प्रभवति विजयी मारुतोऽप्यङ्कयुद्धे
संग्रामे मूलराहुर्ग्रसति रिपुबलं तेन तुल्योऽस्ति नान्यः
॥१२१॥
मात्राहीनस्तु योधः समविषमरणे हन्यते चाधिकेन
श्वासे नामद्वयोर्यत् प्रविशति हृदयं तस्य युद्धे जयः स्यात् ।
दूतप्रोक्तादिनामा भवति स विजयी हन्यते पृष्ठनामा
आर्यैर्वर्णैः स्वराद्यैः समविषमगतैर्निष्फलादेश एव ॥१२२॥
कालः सव्येऽवसव्ये यदि भवति तमी युद्धभूमौ नृपाणां
संग्रामे देवनाथो हरिहरसहितो हन्यते मानुषैश्च ।
तस्माच्छ्रीमूलराहुस्त्रिभुवनविजयी चक्ररुद्रासुराणां[7]
ज्ञातव्यो युद्धकाले क्षितिवलयगतो नान्यथा
शत्रुनाशः ॥१२३॥
कृत्वा त्वृक्षाणि भूमौ मुनियुगविहितानीन्द्रयक्षाब्धियाम्ये
तच्चक्रं भ्राम्यमानं दिवसगतिवशाद्वेदितव्यं समस्ते ।
नक्षत्रे यत्र कालः प्रभवति च तमी दृष्टिपाते द्वयोश्च
संग्रामे शत्रुसैन्यं निपतति सहसा गर्भमध्ये जयः
स्यात् ॥१२४॥
राहौ काले स्थितानां भवति समरणं तुल्यपातो बलानां
दृष्टचंशे निर्गतानामुरगगतिवशात् सैन्यभङ्गो हि यत्र[8] ।
दृष्टचंशं वर्जितानां प्रभवति विजयो गर्भवेशे द्वयोश्च[9]

एवं श्रीमूलराहुर्गुरुवचन[10]गतो ज्ञायते कालचक्रे ॥१२५॥
योगिन्यो विष्टिरुद्रा ग्रहगणसहिताः सस्वरस्योदयं च
त्यक्त्वा सर्वाणि तानि त्रिभुवनविजयी क्षत्रियैर्ग्राह्य एकः ।
ग्रस्तौ येनेन्दुसूर्यौ त्रिदशभयकरौ रौद्रमृत्यु[11]ञ्जनाभो
भूमौ पूर्वापरं यो भ्रमति दिननिशं दक्षिणं चोत्तरं च
॥१२६॥
संग्रामे भग्नशत्रुः प्रविशति सहसा दुर्गमध्ये कदाचित्
कृत्वा यन्त्राणि बाह्ये ह्यनवरतशिलावह्निभिर्बाणपातैः ।
खड्गाद्युच्छेदयन्त्रैः क्षितितलनिलये पञ्जरैः शृङ्गभेदैस्
तद्दुर्गं छेदयित्वा कतिपयदिवसैः साधनीयः स दुष्टः
॥१२७॥
चत्वारो द्वचष्टहस्ताः समविषमपदैश्छिद्रिताष्टप्रदेशाः
स्तम्भा भिन्नार्गलाभिर्जलधियुगयुगाभिश्च पृष्ठैकया च ।
मूले यन्त्रस्य मानं भवति दशकरं मूर्ध्नि भागे तदर्धं
यष्टिर्हस्तद्वयोना प्रभवति कणयो मूर्ध्नि भागादिकश्च
॥१२८॥
वृत्तं सार्धं द्विहस्तं मुनिमनुनियतं[12] द्वचङ्गुलं छिद्रमेकं
त्यक्त्वा हस्तं हि यष्टिः प्रविशति कणये कीलिताः
पृष्ठभागे ।
पञ्चाशद्रज्जुबद्धे शिरसि च कटके मूर्ध्नि मानर्द्धिवृत्तेर्
यष्टचन्ते साङ्गुलीकं प्रविशति वलयं वृत्तिमेका वितस्तिः
॥१२९॥
यष्टचङ्गुल्या त्रिहस्तं भवति च नियतं क्षेपणं रज्जुसार्धं
पाषाणं तस्य मध्ये प्रविशति बलवत्कण्टकैः कण्टचमानम् ।
मुक्तं खे याति शीघ्रं निपतति सहसा तालकादौ प्रतोल्यां
चूर्णीकृत्वा समस्तं व्रजति भुवि तलं वज्रपातो यथैव
॥१३०॥
तस्याङ्गुल्यर्धचन्द्रा क्षितितलनिलये ब्रह्मरेखा द्विपार्श्वे
व्यष्टौ मोक्षप्रदेशा उभयकरतलान्मुष्टिबन्धाद्विमोक्षः ।
मोक्षे भूस्पर्शनं वै समविषमपदैर्यन्त्रगर्भे स्थितैश्च
स्वेच्छापाषाणघात[13]स्त्रिविधगतिवशाद्दुर्गविध्वंसनार्थम्
॥१३१॥
एवं यस्य प्रहारैर्निपतति सहसा तस्य किं क्षुद्रजन्तुः
कोट्टाट्टाले स्थितं यद्रिपुबलसकलं पातयेद्वाह्यसंस्थम् ।

द्रा [4] ने. भवे शक्रयाम्यांऽब्धिपक्षे [5] ने. °पवने [6] ने. °र्द्धं [7] के. °सुरीणां [8] ने. तत्र [9] के. वयो° [10] ने. °चरण°
[° [13] ने. °पात°

का स्पर्धा तेन सार्धं क्षितितलनिलये धन्विनां दुर्गयुद्धे
कः शत्रुस्तत्र दुर्गे विशति यममुखे यत्र यन्त्रप्रहाराः ।।१३२।।
षट्षट्स्तम्भैर्भुजैः स्यादुभयपुटसमो युग्महस्तान्तरालैर्
गर्भेकैकोऽर्कहस्तोऽप्युभयपुटसमो नाधिको हीन एव ।
सर्वं प्रत्येककोष्ठे पिहितमपि फलैश्चर्मभिः सिक्तवस्त्रैर्
गर्भे ऋत्वष्टदोषैस्त्रिगुणदिनकरैरेकयन्त्रं प्रकुर्यात् ।।१३३।।
द्वौ द्वौ गर्भान्तराले स्खलितमपि भुजैर्मुद्रितं वा समन्तात्
पृष्ठे षट्काण्डधारा उभयभुजसमा चाग्रतो यन्त्रवाहाः ।
कूपस्तम्भैर्निबद्धैश्चलदनिलपटैश्चालितं चानिलेन
तत्रारूढं सुसैन्यं व्रजति जलनिधौ तोयदुर्गक्षयार्थम् ।।१३४।।
एके पीठेऽब्धिकोणे चलदनिलपटः स ध्वजस्तम्भबन्धः
पक्षे पृष्ठे मनुष्यैः स्खलितमपि महौ रज्जुना मूर्ध्नि गच्छन् ।
वातेनोद्धूयमानो व्रजति नभसि वै शैलदुर्गस्य मूर्ध्नि
तस्मान्मुक्ताग्नितैलं दहति रिपुबलं सर्वदुर्गं समन्तात्
।।१३५।।
चक्रं मूलेऽरघट्टं प्रभवति कणये चाग्रतश्चक्रमन्यत्
द्विद्वयङ्गुल्यन्तराले पुनरपि रचितं मण्डलाग्रे समन्तात् ।
चक्रं सार्धद्विहस्तं भवति च कणयश्चोर्ध्वतोऽन्यः स यष्टिर्
यष्टयग्रे तीक्ष्णखड्गं भ्रमति लघुतया भ्रामिते यन्त्रमूले
।।१३६।।
रज्जुक्या[१] वातयन्त्रं व्रजति हि गगने सुप्रदेशात् क्रमेण
दुर्गोर्ध्वे शत्रुवेश्मप्रतिगतिनियतां रज्जुकी नामयित्वा[२] ।
भूमौ मानं तया वै कथितमपि भवेच्छृङ्गभेदे रिपूणां
शृङ्गं दग्ध्वा समन्ताद्रिपुभवनतले मण्डपेऽग्निं प्रदद्यात्
।।१३७।।
चक्राणां मूर्ध्नि भागे रचितमपि महामन्दिरं लोहकाष्ठैर्
वृत्ताकारं समन्तात् पिहितमपि फलैः चर्मभिर्माहिषैश्च ।
मानुष्यैश्चाल्यमानं व्रजति सममहौ [३]खादिकां यावदेतत्[३]
तत् खानि पूरयित्वा प्रविशति सहसा कोट्टभित्तौ
प्रतोल्याम् ।।१३८।।
पीठे कीलद्वयं वै सगुणमपि धनुर्निश्चलं यन्त्रयित्वा
पृष्ठे द्वौ लोहकीलौ सुरुचितकणयेऽप्यङ्गुलीकार्धचक्राः ।
अङ्गुल्यग्रे[४] गुणेन प्रवर[५]समशरा तीक्ष्णनाराचकानां
मुक्ताः संग्रामकाले सगुह[६]गजतनुर्भेदयित्वा प्रयान्ति
।।१३९।।
द्वौ स्तम्भौ भूमिगर्भे दृढमपि निहतौ रज्जुभिर्वेष्टयमानौ
रज्ज्वोर्मध्येऽसिमुष्टिर्विशति सवलया वर्त्तितानेकवर्त्ते[७] ।
तन्मध्ये खड्गमुष्टिः प्रभवति नियता निश्चला कीलिता च
मुद्रावर्तेन सार्धं पिहितमसिवरं स्तम्भितं चाग्रभागे ।।१४०।।
तस्योर्ध्वे छिद्ररेखा भवति च फलके निर्गमश्चालितस्य
खड्गोर्ध्वे देय एकस्त्वयसकृतलघुश्चन्द्रमा मध्यभागे ।
पादो यस्येन्दुमूर्ध्नि प्रपतति सहसा छिद्यते सोऽसिना च
कोट्टद्वारावसाने नरपतिभवने यन्त्रमेव प्रहारि ।।१४१।।
अक्षोर्ध्वं मूलपीठं भवति रविभुजैश्चक्रमानं नवांशं
कोणे स्तम्भार्गलाभिर्विषमसमरथो सार्धमानेन पीठात् ।
भागार्धे योधभूमिर्विषमसमधुरा वाजिनां वा गजानां
तस्माच्चिह्नार्धभूमावुपरि विरचितादर्शहारा ध्वजाद्याः
।।१४२।।
सार्धैकद्वित्रिभागा शशिकरशिखिनो मूलपीठार्गलानां
वृत्ता सार्धैकभागैः क्रमर[८]रथमही नन्दिभेदैः समा स्यात् ।
साधारं चक्रमानं तुरगगजवशात् सार्धहस्तं द्विधा च
देवानां पद्मजातिः सुरसुतविहितो नन्दिजातिर्नराणाम्
।।१४३।।
अष्टाम्भोध्यक्षिचक्रैस्त्रिविध इह महास्यन्दनोर्ध्वः समस्त्र
दिव्योऽर्कस्यैकचक्रो विषमहयरथश्चासुराणां विनाशः ।
युद्धे वैवर्त्तिकः स्याद्विषमसममहास्यन्दनः क्षत्रियाणां
भग्नोर्ध्वः संमुखो वै समविषमरणे पृष्ठभङ्गी समः
स्यात् ।।१४४।।
षट्पञ्चाब्ध्यग्निभागैः प्रभवति च समा छिद्रिता
स्तम्भकोटिर्
मूलादूर्ध्वार्धभागो भवति पुरवशाच्चामराणां विमाने ।
एवं भूमौ नृपाणां त्रिविधपुरवशाद्देशयात्रोत्सवे च
हस्तार्धस्थान्तरेण प्रभवति हि महाभ्रामरी सर्वदिक्षु
।।१४५।।
चक्रोर्ध्वे स्तम्भमूर्ध्नि त्रिविधपुरवशाद्दोलकाः सर्वदिक्षु
द्व्यष्टावष्टौ ततोऽर्धादिगृतुयुगभुजाधार एष त्रिभूमौ ।
ऊर्ध्वेऽधो भ्राम्यमाणे भुजधृतकणये योषितामासनानि
अन्तर्बाह्ये निवेष्टान्यध उपरि गतान्यष्टदिक्चालितानि

ऊर्ध्वाधो वक्रमानं
नालाग्रे कुम्भरूपे
तोयाकृष्टिं करोति
उद्याने वाटिकायां
दुष्टानां साधनार्थं
पूर्वोक्तं चादिबुद्धे
तन्मध्ये किञ्चिद
स्वस्थाने रक्षणार्थं
मद्यक्षाराब्धिमध्ये
त्रैलक्षे योजने च
खण्डैकं[१०]योजनान
कैलासं तस्य मध्ये

भूमौ कैलासखण्डं
बाह्ये चैकैकयन्त्रं
सव्यार्धे सम्भलाख्
कोटिग्रामैर्निबद्धो

एकद्वित्र्यब्धिभेदैः
भिन्नश्चक्री नरेन्द्रै
चक्री चार्धा च ख
बाह्ये कालस्य भे

सप्ताब्ध्यक्ष्यद्रिवा
मत्स्यः कूर्मो वरा
रामः कृष्णस्तथा
द्वात्रिंशद्विष्टरान्ते

अद्रोऽमोघोरनादी
म्लेच्छोऽसौ श्वेतव

संभूतिः सप्तमस्य
यस्यां लोकोऽसुरां

---

[१] ने. रजुज्या [२] ने. मानयत्वा [३-३] ने. खानिका यांवदेतत् [४] ने. °ग्र° [५] ने. प्रचुर° [६] के. सगुल° [७] ने °र्त्तिः [८] ने. कमल° [९] के. सं
[१२] ने. आर्द्रोमोघो वराही [१३] ने. सौधक:

॥१४६॥

ऊर्ध्वाधो वक्रमानं भवति च नलिकाकारयन्त्रं समन्तात्
नालाग्रे कुम्भरूपे शुषिरमपि भवेन्नाडिरन्ध्रप्रमाणम् ।
तोयाकृष्टिं करोति स्खलितमपि जलं मोक्षितं कुम्भरन्ध्राद्
उद्याने वाटिकायां व्रजति सममहौ नीयते यत्र तत्र ॥१४७॥
दुष्टानां साधनार्थं प्रवर भुवि तले धार्मिकाणां जयार्थं
पूर्वोक्तं चादिबुद्धे त्रिभुवनगुरुणा यत् सुचन्द्रस्य सर्वम् ।
तन्मध्ये किञ्चिदत्र स्फुटमिह विषये देशितं ते मयाद्य
स्वस्थाने रक्षणार्थं कुरु सकलमिदं द्वेषलोभैर्न सूर्यः ॥१४८॥
मद्यक्षाराब्धिमध्ये मुनिमहिवलये संस्थितां[9] कर्मभूमिं
त्रैलक्षे योजने च भ्रमति नरपतिः सूर्यखण्डान् क्रमेण ।
खण्डैकं[10] योजनानां वसुदलसहितं पञ्चविंशत्सहस्रं
कैलासं तस्य मध्ये वरहिमगिरिणा वेष्टितः सर्वदिक्षु

॥१४९॥

भूमौ कैलासखण्डं हिमगिरिसहितं तत्र भागं समन्ताद्
बाह्ये चैकैकयन्त्रं[11] दिनकरविषयैर्भूषितं द्वीपदेशैः ।
सव्यार्धे सम्भलाख्यं मुनिवरनिलयं ग्रामकोट्याधिवासं
कोटिग्रामैर्निबद्धो भवति हि विषयो मण्डलं ग्रामलक्षैः

॥१५०॥

एकद्वित्र्यब्धिभेदैः सरसरविजनैः पञ्चलोकादिभेदैर्
भिन्नश्चक्री नरेन्द्रो भ्रमति भुवि तलेऽन्वेषणीयः सुविज्ञैः ।
चक्री चार्धी च खण्डी विषयनरपतिर्मुद्रहस्तस्ततोऽन्यो
बाह्ये कालस्य भेदः खलु भवति यथा लोकनाथस्य तद्वत्

॥१५१॥

सप्ताब्ध्यक्ष्यद्रिवारा मुनय इह तथा सात्त्विका दिव्ययोनिर्
मत्स्यः कूर्मो वराहो नरहरिसहितो वामनो यामदग्निः ।
रामः कृष्णस्तथाष्टौ दनुकुलभयदा राजसा भूतयोनिर्
द्वात्रिंशद्विष्टरान्ते भवति दनुरिपुश्चक्रपाणिः शतायुः

॥१५२॥

अद्रोऽमोघोरनादी[12] दनुभुजगकुले तामसान्येऽपि पञ्च
म्लेच्छोऽसौ श्वेतवस्त्री मधुपतिमथनी योऽष्टमः सोऽन्धकः[13] स्यात् ।
संभूतिः सप्तमस्य स्फुटमखविषये वागदादौ नगर्यां
यस्यां लोकोऽसुरांशी निवसति बलवान्निर्दयो म्लेच्छमूर्तिः

°र्तिः [8] ने. कमल° [9] के. संस्थिता [10] के. खण्डैक° [11] के. °पत्रं



॥१५३॥

[1]उष्ट्राश्वौ गाश्च[1] हत्वा स रुधिरपिशितं शुद्धपक्वं हि किञ्चित्
गोमांसं सूततोयं घृतकटुकसमं तण्डुलं शाकमिश्रम् ।
एकत्वं वह्निपक्वं नवफलसहितं यत्र भोज्यं नराणां
पानं चाण्डं खगानां भवति नरपते तत् पदं चासुराणाम्

॥१५४॥

बिन्दुशक्त्याञ्जनेयो गरुडसुरसरिन्नारदः कामधेनुः
दुर्गा विद्वत्सु विद्याक्षरपरमकला दिव्यभाषाशरीरा ।
एतैः सञ्चाररूपैरवतरति भुवि ज्ञानकायो जिनस्य
भूतं भव्यं भविष्यत् प्रवदति सकलं वेदतर्कादिशास्त्रम्

॥१५५॥

श्रीमान् राजन्कलापे कतिपयदिवसैः सम्भलाख्ये प्रसिद्धे
शैलावेष्टे चतुर्दिक्शरगुणितशते योजनानां प्रमाणे ।
स्वस्थाने यास्यसि त्वं प्रवरनरपतिं स्थापयित्वा सुरेशं
सप्तश्रीशाक्यवंशे प्रकटनृपतयश्चाष्टमः श्रीयशश्च

॥१५६॥

सोऽयं श्रीमञ्जुवज्रः सुरवरनमितो वज्रगोत्रेण कल्की
दत्वा वज्राभिषेकं सकलमुनिकुलान्येककल्कं करिष्यत् ।
सम्यगाज्ञातिरूढो दनुकुलभयदः श्रीयशः सेल्लपाणिः
सत्त्वानां मोक्षहेतोः प्रकटमपि महौ कालचक्रं करिष्यत्

॥१५७॥

तन्मध्ये पञ्चविंशत्क्रमपरिगणिते विष्टराणां[2] युगान्ते
कल्कीगोत्रे सुरेशः सुरवरनमितो रौद्रकल्की भविष्यत् ।
साधूनां शान्तिरूपः सुखद इति तथैवान्तको म्लेच्छजातेः
शैलाश्वारूढचक्री हनदरिसकलं[3] सेल्लहस्तोऽर्कतेजाः

॥१५८॥

कल्कीगोत्रस्य मध्ये करगुणितयुगे पुत्रपौत्रेऽप्यतीते
तस्मिन् काले भवेद्वै खलु मखविषये म्लेच्छधर्मप्रवृत्तिः ।
यावन्म्लेच्छेन्द्रदुष्टः[4] सुरवरनमितो रौद्रकल्की च यावत्
तस्मिन् काले द्वयोश्च क्षितितलनिलये रौद्रयुद्धं भविष्यत्

॥१५९॥

युद्धे म्लेच्छान् हनन् यः सकलभुवि तले चातुरङ्गैः स्वसैन्यैः

[1-1] ने. के. दुष्टाश्वौ गासु [2] ने. विस्तराणां [3] के. °षुबलं
[10] के. °सहितं [11] ने. च [12] ने. शून्यैर्

कैलासाद्रौ युगान्ते सुररचितपुरे चक्रवर्त्यागमिष्यत् ।।
रुद्रं[5] स्कन्दं गणेन्द्रं हरिमपि च सखीन् दास्यते कल्किनश्च
शैलाश्वान् वारणेन्द्रान् कनकरथनृपान् शस्त्रहस्तान् भटांश्च
।।१६०।।
शैलाश्वैर्वायुवेगैर्गणगुणितगुणैः कोटिभिर्विश्ववर्णैर्
वेदाख्यैर्लक्षसंख्यैर्मदमुदितगजैः स्यन्दनैर्भूतलक्षैः ।
षड्भिश्चाक्षोहिणीभी रसनवतिकुलैर्मौलिबद्धैर्नरेन्द्रैर्
एतत् सैन्येन कल्की हरिहरसहितो म्लेच्छनाशं करिष्यत्
।।१६१।।
हन्तव्यं म्लेच्छवृन्दं वरकटकभटैर्वारणेन्द्रैर्गजानां
शैलाश्वैः सैन्धवानां समविषमरणे पार्थिवैः पार्थिवानाम् ।
अश्वत्थामं महाचन्द्रतनयहनूमांस्तीक्ष्णशस्त्रैर्हनिष्यत्
रुद्रो म्लेच्छेन्द्रनाथं सकलदनुपतिं कृन्मती रौद्रकल्की
।।१६२।।
हत्वा म्लेच्छांश्च युद्धे हरिहरसहितः सर्वसैन्यैक[6]कल्की
कैलासाद्रौ व्रजिष्यत् सुररचितपुरे संस्थितो यत्र चक्री ।
तस्मिन् काले धरण्यां सकलजनकुलं धर्मकामार्थपूर्णं
सस्यान्यारण्यजानि स्थिरफलनमितास्ते भविष्यन्ति वृक्षाः
।।१६३।।
उच्छन्ने म्लेच्छवृन्दे परिजनसहिते[7] मानवाब्दे शतार्धे
कल्की सिद्धिं व्रजिष्यत् सुररचितपुरे तुङ्गकैलासपृष्ठे ।
पुत्रो ब्रह्मा सुरेशस्त्रिदशनरगुरोर्युग्मधर्मे भवेतां
ब्रह्मा पृष्ठैकखण्डे भवति नरपतिः सव्यभूम्यां सुरेशः
।।१६४।।
कृत्सव्यान् म्लेच्छधर्मं त्रिभुवनगुरुकश्छेदयित्वा समस्तं
स्थित्वाब्दाष्टौ शतानि व्रजति सुखपदं ब्राह्मणं स्थापयित्वा ।
भूयस्तस्यैव मध्ये भवति नरपते[8] वर्णभेदः सुतानां
तेषां मध्ये सुरेन्द्रा नरपतिमुनयः प्राकृतान्ये भवन्ति
।।१६५।।
म्लेच्छानां नाशहेतोर्व्रजति सुरपतिर्द्वादशेन्द्राभियुक्तः
खण्डे खण्डे च चक्री व्रजति सुखपदं म्लेच्छधर्मं निहत्य ।
पुत्रो ब्रह्मा सुरेशस्त्रिदशनरगुरोः पृष्ठतश्चात्र[9] तद्वत्
पृष्ठे ब्रह्मादिवंशाः त्रिविधभुवि तलेऽनेकभेदा भवन्ति
।।१६६।।
ब्रह्मादौ मानवाब्दाष्टदशशतयुतं चासुरे तन्नराणां
तस्यार्धं काश्यपस्य प्रवर भुवितले नारसिंहस्य चार्धम् ।
षष्टया हीनं तथैव प्रतियुगसमये वामनादौ हरेश्च
कल्पान्तं यावदायुष्प्रभवति शतैकाब्दसंख्या जनस्य
।।१६७।।
सर्वं सर्वेषु खण्डेष्वपि युगसमयान् म्लेच्छधर्मप्रवृत्तिर्
वर्षास्वैकं शतं वै स्थितिरपि च ततो म्लेच्छधर्मस्य नाशः ।
तस्माद्विंशत्सहस्रं करशतरहितं[10] बुद्धधर्मप्रवृत्तिः
कृत्त्रेताद्वापरं वै वहति कलियुगं शक्तिमानेन भूम्याम्
।।१६८।।
उत्पत्तिर्लोकधातोर्ग्रहचरणसमा सम्भवश्चक्रिणश्च
म्लेच्छानां धर्मनाशः परमसुखपदे कल्किना मार्गदानम् ।
एतत् सर्वं यथार्थं कथितमपि मया ते सुचन्द्र त्रिकालाद्
भूयः किं पृच्छसि त्वं सकलजनहितार्थं च मां मोक्षहेतोः
।।१६९।।

**।। इति श्रीमदादिबुद्धोद्धृते श्रीकालचक्रे लोकधातुविन्यासपटलः प्रथमः ।।**

## [ अध्यात्मनिर्णयो नाम द्वितीयः पटलः ।। ]

न ज्ञातं विश्वमानं जिनजनक मया यत्त्वया देशितं च
भूयोऽहं श्रोतुकामस्त्रिभुवनसकलं देहमध्ये कथं स्यात् ।
श्रुत्वा सौचन्द्रवाक्यं प्रवदति सुगतः साधुकारं प्रदाय
सत्त्वानां मोक्षहेतोः परमकरुणया विश्वमानं स्व[11]देहे ।।१।।
पृथ्वी तोयाग्निवाताः कुलिशसुरधनुर्वायवो राशिचक्रं
चन्द्रार्कौ राहुमेरू फणिमनुजसुरा वासचक्राः सताराः ।
संक्रान्तिर्मासपक्षा दिननिशितिथयो देहमध्ये समस्तं
ज्ञातव्यं स्वस्ववर्णैस्त्रिविधविभुगतिर्योगिनां शून्यभेदैः ।।२।।
देहेऽस्मिन् धातुवृन्दं भवति हि सकलं षड्रसाहारपानाद्
भूतेभ्यः षड्रसाश्च प्रकटितनियतं भूतवृन्दं खधातोः ।
शून्ये[12] ज्ञाने विमिश्रं भवति समरसं चाक्षरं शाश्वतं च

---

स्तराणां [3] के. °षुबलं, ने. °सवलं [4] ने. °दुष्टं [5] ने. रुद्र° [6] ने. °सैन्येन [7] ने. °तो [8] ने. °तेर् [9] ने. °श्चात्र
शून्यैर्

एवं भूतस्थशान्तं त्रिविधभवगतं वेदितव्यं स्वकाये ॥३॥
बीजं धत्ते धरित्री कमलगतमतो रोहयत्यम्बु पश्चात्
तेजोबोधं[1] करोति ग्रसति रसरसं मारुतो वृद्धिमेव[2] ।
वृद्धे खं चावकाशं ददति नरपते कालतः सिद्धिरेव ।
दिव्याः कुर्वन्त्यवस्थां प्रसवनसमये बालकादौ च काले ॥४॥
बीजस्य क्ष्मा करोति स्फुटगुरुघनतां तोयमेव द्रवत्वं
तेजःपाकं करोति प्रवर दशविधो मारुतो वृद्धिमस्य ।
वृद्धेर्भूयोऽवकाशं ददति[3] हि गगनं कालतः पुष्टिरेव[4]
नानाभावैरनेकैः सतनुरवमनः शक्तयः स्फारयन्ति॥५॥
गुह्याब्जे रक्तमध्ये पतितमपि यदा बोधिबीजं सबीजं
मत्सः कूर्मो वराहो भवति नरहरिर्वामनो वाम[5]रामौ ।
कृष्णो बुद्धो नरेन्द्रो भवति दशविधं चाप्यवस्था दशैता
गर्भे तिस्रस्तथैका प्रसवनसमये बालकालेऽपि च द्वे ॥६॥
कौमारे यौवनेऽन्या प्रभवति विपुलैका च सम्यक् तथैका
वृद्धत्वेऽप्येकशान्ता भुवन[6]निधनता चान्तिमा गर्भजानाम् ।
मत्स्याकारस्तु मात्स्ये भवति कतिदिनं कूर्मभावस्तु कौर्म्ये
वाराह्ये तस्य सूर्यायतनमपि भवेन्नारसैंह्ये प्रसूतिः ॥७॥
वामन्ये[7] बालभावो द्विनृपतिदशनान्युद्भवं यान्ति राम्ये
भूयो राम्ये पतन्ति स्फुटमपि कपटं कारयेत् सैव कार्ष्ण्ये ।
बौद्धे शान्तिं करोति व्रतमपि नियमं याति मृत्युं च कल्क्ये
शुक्रैर्मज्जास्थिनाडी भवति रजसि वै चर्मरक्तं च मांसम्
॥८॥

रक्तं बीजं प्ररोहत्यमृतरसगतं गर्भमध्यैकमासे
पश्चाद्बीजा[8]ङ्कुरस्य सुहृदि दशविधा नाडिकात्यन्तसूक्ष्माः ।
नाभौ चाष्टाष्टकान्याः करचरणमुखेषूर्ध्वतः सर्प्यमाणाः
मासे पूर्णे द्वितीये करचरणमुखोद्भेदनं किञ्चिदत्र ॥९॥
हस्तौ पादौ च कण्ठो भवति समशिरः पूर्णमासे तृतीये
सूक्ष्मा मासे चतुर्थे करचरणमुखे नाडिका कण्ठदेशे ।
मांसान्यसृक्त्वचास्थीनि खरसशिखिनः पञ्चमे सन्धयश्च
षष्ठे मासे च मांसं भवति च धिरं वेदना सौख्यदुःखम्
॥१०॥
भ्रूकेशा रन्ध्रलोमान्यपि च मुनिवरे नाडिकाः सावशेषाः
मासादूर्ध्वं हि जाताः प्रतिदिवसवशाच्छून्यशून्याक्षि[9]संख्या ।

मर्माण्यस्थीनि मज्जा भवति च रसना मूत्रगूथेऽष्टमे च
रन्ध्राख्ये घोरदुःखं प्रसवनसमये योनिना पीडितस्य ॥११॥
गर्भे गर्भस्थदुःखं प्रसवनसमये बालभावो[10]ऽपि दुःखं
कौमारे यौवने स्त्रीधनविभवहृतं क्लेशदुःखं महद्यत् ।
वृद्धत्वे मृत्युदुःखं पुनरपि भयदं षड्गतौ रौरवाद्यं
दुःखाद् गृह्णाति दुःखं सकलजगदिदं मोहितं मायया च
॥१२॥

संसारे मानुषत्वं क्वचिदिति हि भवेद्धर्मबुद्धिः कदाचित्
तस्माद्बुद्धेऽनुरागो भवति शुभवशादादियाने प्रवृत्तिः ।
तस्माच्छ्रीवज्रयाने क्वचिदखिलमतिर्वर्तते भावनायां
तस्माद्बुद्धत्वमिष्टं परमसुखपदे हा प्रवेशोऽतिकष्टम् ॥१३॥
गर्भे संशुद्धकायः प्रसवनसमयाद्दन्तभावार्थधर्मो
दन्तानां वै प्रपातः प्रभवति नृप संभोगकायो जिनस्य ।
तस्मान्निर्माणकायः प्रकटितनियतो मृत्युसीम्नो नराणां
गर्भे बाह्ये चतुर्धा भवति पुनरसौ ज्ञानविज्ञानभेदात् ॥१४॥
विज्ञानं चन्द्रसूर्यावपि कमलगताः शुद्धकायः स गर्भे
धातुस्कन्धोद्भवो यो भवति दशविधो धर्मकायो जिनस्य ।
तस्मात् संभोगकायो भवति गुणवशाच्छ्रोत्रशब्दादिजाते
तस्मात्केशादिजाते प्रसवनसमयश्चात्र निर्माणकायः ॥१५॥
जाते श्वासोद्भवो यः प्रभवति नियतः शुद्धकायः स एव
तस्माद्दन्तोद्भवो यः स्फुटमिति[11] वचनं धर्मकायं तथैव ।
तस्मात्पाते द्विजानां[12] प्रभवति नृप सम्भोगकायो जिनस्य
दन्तेभ्यो मृत्युसीम्नो भवति जिनपतेर्बाह्यनिर्माणकायः ॥१६॥
गर्भे श्रीकायवज्रं प्रथममिह भवेद्वाक्स्वरूपं प्रसूते
चित्तं दन्तोद्भवे स्यात् पुनरपि पतनादुद्भवे ज्ञानवज्रम् ।
ज्ञानं विज्ञानमिश्रं रविशशिसहितं ज्ञानवज्रादिसर्वं
गर्भे रूढं क्रमेण प्रभवति बलवत्कायवज्रादिना च ॥१७॥
पृथ्वीगर्भे हुताशो भवति च धरणी मारुतः शून्यगर्भो
[13]वायोर्भूमे स[13] गर्भो भवति हि सलिलं निःस्वभावः
स्वभावम् ।
भूमेराधार आपो ज्वलन इह जलस्यानिलः पावकस्य
वायोः शून्यं नरेन्द्र प्रभवति हि यथाधार आधेयभूतः ॥१८॥
स्कन्धाधारो हि भूतं भवति वरतनौ भूतवृन्दस्य नाड्यो

नाडीनां प्राणवायुर्भ
तच्चित्तं द्विस्वभावं
भर्ताधारस्तयोश्च त्रि
गन्धोत्पत्तिर्धरण्यामि
वायौ स्पर्शस्य शान्ते
शून्यं गृह्णाति शब्दं
गन्धं वह्निस्व[14]रूपं

सिद्धं रूपं धरण्यां
वह्नौ वा[15] वेदना
विज्ञानं ज्ञानमिश्रं स
धातुस्कन्धादिसर्वं भ

श्रोत्रं वज्रस्वभावं
घ्राणो भूमिस्वभावो
चक्षुस्तोयस्वभावं
एवं श्रोत्रादि सर्वं भ

मात्सर्यं ज्ञानधातौ
ईर्ष्यावज्रं हि वायौ
तोये श्रीमानवज्रं
वाग्घस्तौ पादपायू
आपानो ज्ञानधातौ
वायोर्मध्ये समानः
भूम्यां नागोऽथ कूर्म
चत्वारो वायुवह्न्यो

उष्णीषः शून्यधातौ
हृत्पद्मं वायुधातौ प्र
तोये भ्रूमध्यपद्मं व
षट्सन्धिः पादपाण्य

भूम्यादौ पञ्चधातौ

---

[1] ने. °वाधं  [2] ने. °मस्य  [3] ने. दहति  [4] ने. सृष्टिरेवं  [5] ने. राम°  [6] ने. भवति  [7] ने. वामेन्ये  [8] ने. °द्वज्रा°  [9] ने. °स्ि
[12] के. ने. नृपाणां  [13-13] ने. °भूमेश्च  [14] ने. वह्निश्च  [15] के. वे  [16] ने. स्कन्ध°  [17] ने. °वात्त°  [18] ने. धनञ्चः  [19] ने.

नाडीनां प्राणवायुर्भवति दशविधश्चेतना प्राणवायोः।
तच्चित्तं द्विस्वभावं भवति गुणवशात् स स्वभावास्वभावं
भर्ताधारस्तयोश्च त्रिभुवननमितोऽनाहतः सर्वगो यः ॥१९॥
गन्धोत्पत्तिर्धरण्यामपि शिखिनि रसस्योदके रूपधातोर्
वायौ स्पर्शस्य शान्ते त्वपि भवति खस्याम्बरे धर्मधातोः।
शून्यं गृह्णाति शब्दं खलु जिनजनको धर्मधातुं च वायुर्
गन्धं वह्निस्व[14]रूपं रसमपि सलिलं स्पर्शमेवं धरित्री
॥२०॥
सिद्धं रूपं धरण्यां त्रिभुवननिलये चोदके सिद्धसंज्ञा
वह्नौ वा[15] वेदना च प्रभवति पवने सिद्ध[16]संस्कार एव।
विज्ञानं ज्ञानमिश्रं स गगनकुलिशे सिद्धमेवात्र काये
धातुस्कन्धादिसर्वं भवति च रजसा बोधिचित्तस्य योगात्
॥२१॥
श्रोत्रं वज्रस्वभावं भवति नरपते चित्तमाकाशभावं
घ्राणो भूमिस्वभावो भवति च रसना वह्निभावा तथैव[17]
चक्षुस्तोयस्वभावं त्रिभुवननिलये वायुभावश्च काय
एवं श्रोत्रादि सर्वं भवति गुणवशात् ज्ञानविज्ञानयोगात्
॥२२॥
मात्सर्यं ज्ञानधातौ भवति वरतनौ चाम्बरे द्वेषवज्रं
ईर्ष्यावज्रं हि वायौ प्रकटितमनले रागवज्रं तथैव।
तोये श्रीमानवज्रं प्रकृतिगुणवशान्मोहवज्रं धरण्यां
वाग्घस्तौ पादपायू मरुदनलजलक्ष्मासु सर्वे बभूवुः ॥२३॥
आपानो ज्ञानधातौ त्रिविध इति भवेत् प्राणवायुश्च शून्ये
वायोर्मध्ये समानः शिखिनि पुनरुदानोऽम्भसि व्यान एव।
भूम्यां नागोऽथ कूर्मोऽपि कृकरपवनो देवदत्तो धनञ्जः[18]
चत्वारो वायुवह्न्योरपि पयसि महौ संभवन्ति क्रमेण
॥२४॥
उष्णीषः शून्यधातौ भवति सुरनृणां ज्ञानधातौ च गुह्यं
हृत्पद्मं वायुधातौ प्रकटितशिखिनि वै कण्ठचक्रं स्फुरद्वै[19]।
तोये भ्रूमध्यपद्मं वसुवसुदलकं नाभिपद्मं च भूम्यां
षट्सन्धिः पादपाण्योर्महिजलहुतभुग्मारुतेषु त्रिसंख्याः
॥२५॥
भूम्यादौ पञ्चधातौ त्रिविधगुणवशात् पादपाण्योर्बभूवुर्

[5] ने. °द्वज्रा° [6] ने. °स्थि° [10] ने. °भावे° [11] ने. °मपि
[15] ने. धनञ्चः [16] ने. °द्धि



अङ्गुल्योऽङ्गुष्ठकाद्यास्त्रिगुणितदशकाः पर्व[1]रूपाः
समस्ताः।
संग्राह्यास्ता नखान्ताः पुनरपि दशनान्येव तत्त्वप्रभेदैर्
अन्यद्यल्लोमकान्तं[2] भवति वरतनौ तत्तदेवं च धातौ ॥२६॥
गुह्योष्णीषे च नाभौ सहजजिनतनुर्निःस्वभावास्वभावा
हृच्चक्रे धर्मकायो भवति हि नृप संभोगचक्रे च भोगः।
बिन्दौ निर्माणकायो भवति गुणवशाच्चाधिदैवक्रमेण
हृच्चक्रं कण्ठचक्रं शिरसि च कमलं धर्मसंभोगशुद्धम् ॥२७॥
नाभौ कण्ठे च गुह्ये शिरसि च हृदये तद्वदुष्णीषमध्ये
मातुर्भर्तुः क्रमेण त्रिविधमपि भवेत् कायवाक्चित्तवज्रम्।
चक्रं रत्नं खपद्मं जलजमसिवरं[3] षट्कुलं[4] वज्रयुक्तं
तान्यूर्ध्वाधस्त्रिनाड्यस्त्रिविधपथगताश्चन्द्रसूर्याग्निभेदैः
॥२८॥
काये भावप्रवेशः खमिव समरसो भावमध्ये च कायो
ज्ञातव्यो योगयुक्तैः प्रकृतिगुणवशाद्धातुवर्णादिभेदैः।
पीतः कृष्णश्च वर्णस्त्वरुण इति सितो भूमिवाताग्नितोये
ज्ञानाकाशे च नीलो भवति हि हरितः कायभावप्रभेदात्
॥२९॥
प्रज्ञोपायोऽस्थिमांसं ससलिलरुधिरं पावको मूत्रमेव
वातो विट्शून्यशुक्रं भवति वरतनौ श्रीरजश्चित्तमेव।
श्रोत्राच्छन्दादयोऽन्ये स्वजिनकुलवशाद्वाक्स्वरूपादयश्च
एवं देव्यः[5] सबुद्धा विषयविषयिणो मण्डले वेदितव्याः
॥३०॥
नाडीनां षट्सहस्रं दिनकरगुणितं गर्भमध्ये प्रहृत्य[6]
वर्षे पूर्णे च वृद्धिं त्यजति शशधरोऽर्कश्च वृद्धिं करोति।
वर्षेषु द्वादशेषु त्यजति दिनकरो धातुवृद्धिं स्वदेहे
नाडीच्छेदं प्रसूते भवति दिनदिने युग्मसंख्या क्रमेण ॥३१॥
श्रीभूतानीन्द्रियाणि प्रभवति दशकं पञ्च कर्मेन्द्रियाणि
तन्मात्राः पञ्च चोक्ताः सगुणमपि मनो बुद्ध्यहङ्कारदिव्याः।
तत्त्वान्येतानि देहे त्रिभुवननिलये भुक्तिरेषा विभोश्च
पञ्चस्कन्धात्मकस्य त्रिविधभवगतस्यात्मकर्मार्जितस्य
॥३२॥

[1] के. पञ्च° [2] ने. °कान्ते [3] क. °धरं [4] क. °कलं
[12] ने. नाभि° [13] ने. नैक° [14] के. वहने [15] ने.
[21] ने. °भङ्गं [22] ने. क्रोधं [23] ने. °सन्तं [24] ने. सूक्ष्मानि

र्त्रे[1]रूपाः
समस्ताः।
तत्त्वप्रभेदैर्
ं च धातौ ॥२६॥
भावास्वभावा
क्रे च भोगः।
धदैवक्रमेण
भोगशुद्धम् ॥२७॥
दुष्णीषमध्ये
ाश्चित्तवज्रम्।
ं वज्रयुक्तं
सूर्याग्निभेदैः
॥२८॥
ये च कायो
ादिभेदैः।
मिवाताग्नितोये
ायभावप्रभेदात्
॥२९॥
मूत्रमेव
ग्रश्चित्तमेव।
स्वरूपादयश्च
वेदितव्याः
॥३०॥
प्रहृत्य[6]
वृद्धिं करोति।
स्वदेहे
्या क्रमेण ॥३१॥
कर्मेन्द्रियाणि
द्धयहङ्कारदिव्याः।
षा विभोश्च
कर्मार्जितस्य
॥३२॥

पृथ्वी काठिन्यमम्बुद्रवमपि हविरुष्णं च वायुर्लघुत्वं
छिद्रं शून्यं दृढास्थि त्वमरगिरिवरो[7] वृष्टिरत्रामृतं स्यात्।
वज्रं शब्दश्च चापं विडपि च घटिका श्वासनिःश्वासयुग्मं
युग्मैः संक्रान्तिरेका द्विगुणनवशतैर्ज्योतिषो रन्ध्रभेदाः ॥३३॥
नक्षत्रं दन्तपंक्तिस्त्वनुदिनघटिकाः सन्धिभेदा भवन्ति
[8]नाड्यो नाड्यान्त्र[8]मेघास्त्वपरशशिकला धातवो द्विस्वभावाः।
लोमा यूका च शुक्रं[9] कृमिकुलसहितं भूतयोनिश्चतुर्धा
नन्दाद्यं गुल्फ[10]पर्वं हृदयमपि[11] शिरो गुह्य[12]पद्मं च शक्तिः ॥३४॥
ब्रह्माण्डं स्वर्गलोको वरकरचरणौ मर्त्यपाताललोकौ
अब्धिद्वीपाश्च शैला द्रवमृदुकठिना धातवस्त्रिस्वभावाः।
क्षाराब्धिर्मूत्रमेषां शिखिचलवलयं रक्तचर्माणि राजन्
केशाः सिद्धाः समस्तास्त्रिभुवननिलयेऽनेक[13]भेदैश्च सिद्धाः ॥३५॥
हृत्कण्ठे नाभिपद्मे पविरविशिखिनः स्फुरन्ति क्रमेण
धन्वाकारे च वृत्ते त्वनुदिनहवने[14] चाब्धिकोणे च कुण्डे।
तेषामूर्ध्वेऽपराग्निः स्फुरदमलकरो ज्ञानमूर्तिस्तमोऽन्ते
यस्मिन् सूर्यो न विद्युत्तपति शशधरो न ग्रहास्तारकाद्याः ॥३६॥
वारा हृत्पद्मपत्रे प्रकटितघटिका नाभिपद्मे च षष्टिर्
भ्रूमध्येऽहः पदं वै मनुरपि नृप संभोगचक्रेऽपि चर्क्षम्।
ऋक्षाणां नाभिपद्मं पुनरपि घटिका योगिना वेदितव्या
नाड्यः पाणीपलानि स्फुटसकलतनौ हस्तपादादिसन्धौ ॥३७॥
नाड्यब्जे सूर्यपत्रे भ्रमति परकला संक्रमन्ती क्रमेण
संक्रान्तिः प्राणयुग्मैर्द्विगुणनवशतैः कर्किलग्नैर्नरेन्द्र[15]।
यस्मिन्लग्ने स्थितोऽर्को भ्रमति दिननिशं तत्र सा वेदितव्या
ज्ञातव्यं लग्नमानं धनमृणविषुवं चायनं सव्यवामम्[16] ॥३८॥
एकैके पद्मपत्रे प्रवहति धरणी पश्चिमे चोत्तरेऽम्बु
वह्निः सव्ये च पूर्वे प्रवहति पवनः पत्रमध्ये च शून्यम्।
संक्रान्तिः पञ्चभेदैः प्रवहति विषुवं हीननिश्वासषष्ठिर्
एवं संक्रान्तिभेदाः प्रतिदिनसमये लग्नभेदैर्भवन्ति ॥३९॥
शून्याद्यं पञ्चतत्त्वं प्रवहति नियतं चोत्तरे क्ष्मादिसव्ये
राह्वग्नी चन्द्रसूर्यौ बुधमहितनयौ दैत्यमन्त्री गुरुश्च।
केतुर्मन्दश्च खादिष्विति दशपतयः क्षेत्रिणो मण्डलेषु
षण्मासं चन्द्र ईशो भवति नरपते चोत्तरे दक्षिणेऽर्कः ॥४०॥
तस्योर्ध्वं हृत्प्रदेशे वसुदलकमले संस्थितं नाडिचक्रं
प्राणाद्यं वायुवृन्दं रविशशि[17]शिखिनो वामसव्ये च मध्ये।
वामे नाडी शशाङ्का वहति खलु सिता दक्षिणे रक्तसूर्या
मध्ये कालाग्निरूपा प्रवहति विषुवे हीननिश्वासषष्टिः ॥४१॥
प्राणोऽपानः समानः कमलवसुदले मारुतश्चाप्युदानो
व्यानो नागश्च [18]कूर्मः स[18] कृकरपवनो देवदत्तो धनञ्जः।
इत्येते नाडि[19]चक्रे दशविधपवनाः संस्थिताः कर्मभेदैः
शंखिन्यन्तं त्विडाद्यं स्वहृदयकमलं नाभिचक्रं समस्तम् ॥४२॥
प्राणः प्राणं करोत्यर्कशशिपथगतस्त्वन्नपानं समस्तं
आपानो नेत्यधस्तात् सकलरससमं नेति काये समानः।
काये स्पन्दत्युदानो मुखकरचरणैर्गीतनाट्यं[20] करोति
व्यानो व्याधिं करोति प्रकृतिगुणवशाद्गात्रभङ्गस्[21] तथैव ॥४३॥
नागोऽप्युद्गारमेव स्फुटकरचरणात् संकुचत्कूर्मवायुः
क्रोध[22]क्षोभं समस्तं स कृकरपवनो जृम्भिकां देवदत्तः।
कायं पञ्चत्वगन्तं[23] त्यजति न नृपते वायुरेको धनञ्जः
एवं प्राणादि सर्वे प्रकृतिगुणगणान् वायवो न त्यजन्ति ॥४४॥
पिङ्गाः सूक्ष्मास्त्विडा[24]द्यास्त्रिविधपथगता रोहिणी हस्तिजिह्वा
पूषा षष्ठी जयोऽगापि[25] च वसुनवमेऽलम्बुषा श्रीकुहे च।
दिक्संख्या शङ्खिनी या स्रवति नरपते बोधिबीजं सुखान्ते
एतच्छ्रीनाडिचक्रं भवति बहुविधं सन्धि[26]भेदैरनेकैः

---

°धरं [4] क. °कलं [5] ने. दैत्यः [6] ने. प्रहृष्ट [7] ने. °धरो [8-8] ने. नद्यो नाद्यात्र° [9] ने. शुक्लं [10] ने. °गुष्ठ [11] ने. कमलमपि
के. वहने [15] ने. कल्किलग्ने नरेन्द्र [16] ने. °वामे [17] ने. शशिरवि° [18-18] ने. कूर्मोऽपि [19] ने. नाभि° [20] ने. °वाद्यं
न्तं [24] ने. सूक्ष्मान्विता [25] ने. जयामापि [26] ने. कर्म°

॥४५॥
इन्द्रे[1]ऽग्नौ यम्य[2]दैत्ये सवरुणपवने यक्षरुद्रे च मध्ये
एषु स्थाने च शक्तिर्भ्रमति दिननिशं तत्स्वरूपं भजन्ती।
तस्योर्ध्वं कण्ठदेशे ग्रहगणसहितं संस्थितं चर्क्षचक्रं
ब्रह्माण्डे श्रीललाटे सुरपरिकरितः श्वेतबिन्दुं स्रवन् वै
॥४६॥

मूले पृथ्व्यम्बु वामे प्रभवति हुतभुग्दक्षिणे मूर्ध्नि वायुर्
मध्ये व्योम द्वयोश्च प्रभवति विषुवं नाशरन्ध्रे क्रमेण।
भिन्दन्त्येतानि शक्तिर्व्रजति वरपदं द्वादशान्तं कलान्तं
क्षेत्राद्या हस्तपादे करकमलपुटेऽङ्गुष्ठकान्ताः समस्ताः
॥४७॥

चक्री वज्री स्वदेहे सुरवरपतयो द्वादशाङ्गाः प्रसिद्धाः
सम्यग् ज्ञानं हि कल्की गजतुरगरथाः किंकरा आर्यमाणाः।
प्रत्येकं रुद्रसंज्ञा प्रभवति हनुमान् श्रावकं प्राणिनां च
पापं म्लेच्छेन्द्रदुष्टस्त्वकुशलपथि यत्[3] क्रन्मतिर्दुःखदाता
॥४८॥

अश्वत्थामा त्वविद्या दनुबलसकलं मारपक्षश्चतुर्धा
संहारस्तत्र युद्धे भवभयनिधनं श्रीजयो मोक्षमार्गः।
कैलासे धर्मदानं भवभयहरणं द्रव्यपूर्णा च पृथ्वी
पुत्रो ब्रह्मा सुरेशस्त्रिदशनरगुरोः पृष्ठतश्चाग्रणी यः ॥४९॥
मञ्जुश्री लोकनाथस्त्रिभुवनविजयी श्रीरजो बोधिबीजं
पृष्ठे ब्रह्मादिवंशा विविधमहितलेऽनेकबुद्धा विशुद्धाः।
एवं म्लेच्छेन्द्रयुद्धं भवति हि नियतं देहिनां देहमध्ये
मायारूपं तु बाह्ये खलु मखविषये म्लेच्छयुद्धं न[4] युद्धम्
॥५०॥

कालाब्दे वह्निसंख्येऽब्द[5]दिनगणहते षट्कुलं चायनाङ्गात्
षट्त्रिंशन्मासभेदाद्रसगुणितरसाद्योगिनीनां कुलानि।
वारच्छेदे न लब्धाः प्रकटितनियता देवताः कालचक्रे
पक्षच्छेदेऽभिधानं भवति नरपते देवतादेवतीभिः
॥५१॥

मायाजालं दिनाङ्गास्त्रिविधमपि भवेद्रन्ध्रभेदैश्च सम्यग्
भूयो भूतार्णवैः स्यात् शिखिजलनिधिभिः श्रीसमाजोऽर्तु-
भेदाः।

तत्त्वाख्यं षड्विहीनं[6] त्वपरमपि तयोरर्धभेदैर्विभिन्नैर्
भूयो मिश्रो द्विभेदस्त्रिदशनवदिशाभिश्च रन्ध्रैः सतत्त्वैः
॥५२॥

चक्रांशे[7] षड्दिना ये खलु दिवसगणे वारभागेन लब्धाः
षण्मुद्रा वज्रिणस्तास्त्वपरदिनगणः कायवाक्चित्तमुद्राः।
प्रज्ञाकाये त्रिलग्नाः प्रकटितनियता योगिनी योगतन्त्रे
शक्तिः क्रोधा क्रमेण प्रभवति दशकं पञ्चकं बुद्धदेव्यः
॥५३॥

रूपाद्यक्षादिषट्कं पुनरपि नृपते देववृन्दं द्विषट्कं
योगिन्यो नागचण्डाष्टकमिति भवने सर्वमेतद्द्विगुण्यम्।
एतच्छ्रीकालचक्रं चतुरधिकशतं तस्य चार्धं त्रिधातौ
सूर्यांशे या च षष्टिः प्रतिदिनघटिका निर्गता मासमध्ये
॥५४॥

योगिन्यस्ताः समस्तास्त्रिभुवननिलये लग्नमिश्रा द्विगुण्याः
सूर्यांशेऽह्नः प्रभिन्नं द्विगुणितमपि यद्योगिनीवृन्दमत्र।
पिण्डीभूताः समस्तास्त्रिगुणरविदिनाः साभिधाना भवन्ति
चन्द्रे पक्षप्रभेदो भवति दिनकरे वर्षभेदः समस्तः ॥५५॥
एवं तन्त्रादिबुद्धे खकरनृपतयो देवतादेवतीनां
प्रज्ञोपायं निशाह्नं भवति समविभागोऽर्धरात्रे दिनार्धे।
येन ज्ञातं स्वदेहे दिननिशिसमयैर्माससंक्रान्तिभेदैः
स श्रीमान् मञ्जुवज्रो भवभयमथनो जन्मनीहैव बुद्धः
॥५६॥

त्रिंशद्भागेन तस्मात् त्रिगुणितनियता देवताः कालचक्रे
मुद्राषट्कं च बाह्यं पुनरपि नियताश्चक्रनाड्यस्तथैव।
उष्णीषेऽङ्घिहृद्दोऽष्टौ शिरसि नृपतयो दन्तसंख्या च कण्ठे
नाभौ चाष्टाष्टगुण्या द्विगुणनृपतयो गुह्यमध्ये प्रसिद्धा
॥५७॥

षण्णाड्यश्चक्ररोधाद्दशविषयहराः संनिपातस्व[8]भावा
भूयो भूयो द्विगुण्याः पुनरपि गुणिताः श्लेष्मपित्ता-
निलाङ्गाः।
एता वै मृत्युदात्र्यौ गुरुनियमवशादायुरारोगदाश्च
षट्चक्रे कालनाड्यो मरणभयहरा योगिनां नात्र चित्रम्
॥५८॥

उष्णीषेऽङ्घिर्ललाटे
कण्ठे दन्ता हृदब्जे
नाभौ गुह्यो[9]ऽङ्घिष
गुह्येऽन्यो[10] दिक्च

षण्णाड्यश्चक्ररोध
देहे ता रक्षणीया[11]
षट्सु प्राणप्रवेशो य
सूक्ष्मायां न प्रविष

प्राणो यद्येकनाडच
अव्युच्छिन्नैकपक्षं
अव्यु[12]च्छिन्नैकम
एवं योगी स्वदे

पञ्चभ्यः पञ्चवि
तस्मादेकोत्तरेण वि
काले पौष्णे समस्
मासास्ते[15]ऽह्नानि

स्वस्थानाद्राशिचक्र
वर्षैर्मासैर्दिनैश्च ि
पौष्णाद्यैर्हानितुल्य
षट्त्रिंशद्भिर्दिना

पूर्वे बाणाग्निलोक
तस्मात् सारोहण
नेत्राहिशैलबाणं
तस्मात् तिथ्या

कालाब्दं यावदेक
चन्द्राख्ये सूर्यमा
भूयः संक्रान्तिभे

[1] के. इन्द्रो [2] ने. याम्य° [3] ने. यथयः (?) [4] के. स्व [5] ने. °ब्दा [6] ने. तद्विहीनं [7] ने °गे [8] ने. °स्तु°
[12] ने. अप्र° [13] ने. °र [14] ने. समस्तै° [15] ने. मास्यस्ते [16] ने. °कां

उष्णीषेऽब्धिर्ललाटे जलधिहतयुगाः श्लेष्मधातुप्रकोपाः
कण्ठे दन्ता हृदब्जे नयनहतयुताः पित्तधातुप्रकोपाः ।
नाभौ गुह्ये[९]ऽब्धिषष्टिर्नृपतिरपि तथा वायुधातुप्रकोपा
गुह्येऽन्यो[१०] दिक्च षट्कं प्रकटितनियताः संनिपाता निरोधाः ॥५९॥

षण्णाड्यश्चक्ररोधात् त्रिविधपथगताश्चन्द्रसूर्याग्निभेदैर्
देहे ता रक्षणीया[११] गुरुनियमवशान्मृत्युदाः प्राणिनां याः ।
षट्सु प्राणप्रवेशो यदि भवति नृणां मृत्युहानिस्तदा वै
सूक्ष्मायां न प्रविष्टे क्रमरणविषयश्छिद्यते योगिभिश्च ॥६०॥

प्राणो यद्येकनाड्यां वहति दिननिशं जीवितं कालवर्षम्
अव्युच्छिन्नैकपक्षं वहति यदि नृणां जीवितं सार्धवर्षम् ।
अव्यु[१२]च्छिन्नैकमासं वहति नरपते जीवितं च त्रिमासं
एवं योगी स्वदेहे शशिगतिमरणं ज्ञायते कालचक्रे ॥६१॥

पञ्चभ्यः पञ्चविंशद्दिवसगतिरुहा रोहते पञ्चवृद्ध्या
तस्मादेकोत्तरेण त्रिगुणितदशकं त्र्युत्तरं[१३] यावदेव
काले पौष्णे समस्ता[१४]स्त्रिनयनशशिनः षट्त्रियुग्मेन्दवो ये
मासास्ते[१५]ऽहानि शेषास्तिथिदिशिषुगुणाद्धीन्दवो जीवितस्य ॥६२॥

स्वस्थानाद्राशिचक्रं त्यजति परकलाहानि शेषैश्च तुल्यैर्
वर्षैर्मासैर्दिनैश्च त्रिनयनशशिभिः षट्त्रियुग्मेन्दुभिश्च ।
पौष्णाद्यैर्हानितुल्यैस्तिथिदिशिषुगुणैः कर्णिकायां प्रविष्टैः
षट्त्रिंशद्भिर्दिनान्ते भवति दिनकरारिष्टयोगेन मृत्युः ॥६३॥

पूर्वे बाणाग्निलोकं त्यजति दिनगणं सूर्यवर्षत्रयस्य
तस्मात् सारोहणं वै शरयुगशिखिनं खाद्रिचन्द्रं तृतीये ।
नेत्राहिशैलबाणं वसुकरमपरं सप्तमे रोहणं च
तस्मात् तिथ्यादि सर्वं दिनगणमपि यत् कर्णिका[१६] यावदेव ॥६४॥

कालाब्दं यावदेका दिवसगतिवशाद् रोहते संभ्रमन्ती
चन्द्राख्ये सूर्यमार्गे विषमसमदिनैरेकवृद्ध्या क्रमेण ।
भूयः संक्रान्तिभेदाद्विषमसमदिनैर्द्वादशारे करोति

ने °गे  [८] ने. °स्तु°  [९] ने. गुह्ये°  [१०] ने. °न्या  [११] ने. °र्यो



सार्धं मासं हि यावत् त्रिगुणितदशकं जीवितं च त्रिरात्रम् ॥६५॥

श्वासालिप्तांश्च नाडीं दिननिशिसमयान् रोहते संक्रमेण
सप्ताब्दैश्चायनांशादयनगतिवशात् षष्टिसंवत्सरैश्च ।
त्रिंशद्वर्षैस्त्रिमासाद्दिवसगतिवशात् कालवर्षैस्त्रिपक्षैर्
द्वात्रिंशत्सार्धभक्तैर्भवति दिनगणे रोहणं बाल[१]चक्रात् ॥६६॥

पक्षे पक्षे च नाडी नव[२]हतभुजगश्छिद्यते[३] नाभिचक्रे
संधावेकैकनाडी त्यजति शिखिदिनैः कर्मचक्रे क्रियाख्ये ।
कण्ठे नक्षत्रनाडी[४] त्यजति दिनदिनैर्मासमध्ये क्रमेण
बिन्दुस्थः पक्षमध्ये त्यजति शशिपदे[५] वारनाडी[६] हृदिस्थः ॥६७॥

वर्गेभ्यः सस्वरेभ्यः क्रमति दिनवशाच्चायनं[७] राशिभेदैः
पश्चादेकोत्तरेणोत्क्रमति दिनदिने कालवर्षं हि यावत् ।
छिन्नेऽब्दे पक्षमध्ये स्वरदिवसवशाद् रोहणं च क्रमश्च
निश्वासोच्छ्वासहानिर्दिननिशिसमये जीवितं चैकरात्रम् ॥६८॥

नाभौ कण्ठे ललाटे स्वहृदयकमले नाडिकाः सावशेषास्
तिष्ठत्यर्को रसोऽग्निः स्वहृदयकमले सार्धनाडी तथैव ।
पाणेः पादस्य सन्धौ तिथिगुणितयुगा यद्दिनं यावदेव
अन्ते सर्वत्र सूक्ष्मा प्रवहति[८] दिवसं च त्यजन्ती हृदब्जम् ॥६९॥

षट्त्रिंशद्भिः सहस्रैर्वसति दिनगणे रोहते कालनाडी[९]
यां यां सूर्येन्दुशक्तिर्दिननिशिसमये पूरितं[१०] स्वस्वचारैः ।
शुक्रेऽह्नः सूर्यचारे त्वृणमपि च भवेच्चन्द्रमध्ये तदर्धं
नक्षत्राहःप्रभेदै रविशशिचरणं शून्यमासे च मृत्योः ॥७०॥

प्राणा देहे वि[११]काये प्रकटितविषुवे वेदपादोनषष्टिः
सर्वे संक्रान्तिभेदैः प्रतिदिनसमये नाडियुग्मं निहन्ति ।
भूयो भूयोऽब्दमध्ये रविशशिचरणात् शून्यनेत्राद्रिसंख्या
एवं कालं[१२] शताब्दैः[१३] क्रमति सुरनृणां स्वायुषं स्वस्वमानैः ॥७१॥

[१] ने. काल°  [२] ने. च  [३] ने. भुजगे छिद्यते  [४] ने °नाडीं
[१२] ने. कालः  [१३] ने. °ब्दैः  [१४] के. दुष्टं  [१५] ने. व्याधिः
[२२] ने. °संज्ञे  [२३] ने. नृपवसुदन्तांश्च  [२४] ने. °वर्गा वि°

जीवितं च त्रिरात्रम्
।।६५।।
ान् रोहते संक्रमेण
ट्संवत्सरैश्च ।
लवर्षैस्त्रिपक्षैर्
हृणं बाल[1]चक्रात्
।।६६।।
ग्रते[3] नाभिचक्रे
र्मचक्रे क्रियाख्ये ।
समध्ये क्रमेण
वारनाडी[6] हृदिस्थः
।।६७।।
ायनं[7] राशिभेदैः
नवर्षं हि यावत् ।
रोहणं च क्रमश्च
जीवितं चैकरात्रम्
।।६८।।
डिकाः सावशेषास्
सार्धनाडी तथैव ।
यद्दिनं यावदेव
त्यजन्ती हृदब्जम्
।।६९।।
हते कालनाडी[9]
रेतं[10] स्वस्वचारैः ।
न्द्रमध्ये तदर्धं
मासे च मृत्योः
।।७०।।
वेदपादोनषष्टिः
ड्युग्मं निहन्ति ।
शून्यनेत्राद्रिसंख्या
सुरनृणां स्वायुषं
स्वस्वमानैः ।।७१।।



दष्टं[14] व्याधि[15]प्रहारो यदि भवति नृणां कालनाड्यां कदाचित्
शीघ्रं तेनाश्रयेण प्रविशति सहसा[16] मूलचक्रेषु कालः ।
रुद्ध्वा[17] चक्रेषु नाडी[18] रविशशिगमनं छेदयित्वा क्रमेण[19]
मध्ये सूक्ष्माश्रितं[20] यद्धरति नरपते जीवितं प्राणिनां च ।।७२।।

हृत्पद्मे श्रीललाटे चरति शशिपदं भूतदिग्वासराख्यं
संभोगे नाभिचक्रे नवदशसहितं रुद्रयुग्मं जिनाख्यम् ।
तत्त्वाख्यं सप्तरात्रात् त्यजति पुनरसावुत्क्रमन्यः शशाङ्को
बिन्दौ पूर्णो प्रकृत्या[21] प्रविशति हृदये शुक्लपक्षे क्रमेण ।।७३।।

भूयः कृष्णे च तद्वद्व्रजति पदपदान्नाभिपद्मं च यावद्
अष्टारे षोडशारे हृदि शिरसि तथा कृष्णशुक्लाब्ज-सङ्गम्[22] ।
कण्ठे द्वात्रिंशदारं द्विगुणितमपरं रक्तपीतं च नाभौ
द्व्यष्टम्यौ नाभिकण्ठे शिरसि च हृदये श्वेतकृष्णा च पूर्णा ।।७४।।

आद्यास्त्रिंशत् स्वरा ये हयरवलयुता बिन्दुभिः श्रीविसर्गैर्
भिन्ना षष्टिर्बभूवुर्युगवसुनृपदन्ताश्च[23] ते केसराग्रे ।
बिन्द्वाकारैर्विसर्गैर्वरकमलदले कादिवर्गादि[24]भिन्ना
विंशत्येकं शतं च प्रहरगतिवशाद्रोहते क्षीयतेऽर्कः ।।७५।।

पक्षे चन्द्रः स्वचारै ऋणमपि कुरुते वासराख्यं पदं च
भूयो मासद्वयेन त्वपरमपि दिनं वर्धते वर्षयोगात् ।
पूर्णेऽब्दे षड्दिनं[25] स्यादपरमपि तथा वर्धते मृत्युसीम्न
एवं सूर्यस्य राजन् द्विगुणमृणमिदं वर्धते वर्षवर्षात् ।।७६।।

षट्श्वासैरेकलिप्ता प्रभवति घटिका षष्टिपाणीपलैश्च
षष्टिर्नाड्यो दिनस्य त्रिगुणितदशभिर्वासरैर्मासमेकम् ।
षण्मासैश्चायनं स्याद्द्विगुणितमयनं वर्षमेकं प्रसिद्धम्
आयुः पुंसां शताब्दादृणगतिषु गतं कालनाडीवशेन ।।७७।।

त्रैलोक्ये नास्ति योगी त्वसुरसुरनृणां पूरितुं यः समर्थश्
चन्द्रादित्यौ स्वदेहे चरति दिनगणं नैव चन्द्रः स्वचारैः ।
सूर्यश्चर्क्षाणि सर्वाणि चरति भुवने वर्षमध्ये क्रमेण
वर्षे वर्षे त्वृणेन ग्रसति स भुवनं कालचक्रैकवीरः ।।७८।।

छिन्ना यद्येकनाडी भवति नरपते मूत्रमम्बुत्वमेति
तन्मात्रां पञ्चरात्रात् त्यजति परकला पिण्डविच्छेदकाले ।
शब्दं कर्णे रसं च त्यजति खलु मुखे तारकामक्षिमध्ये
गन्धं घ्राणे नराणां करचरणतनौ चोष्णभावं क्रमेण ।।७९।।

नासाग्रं लम्बमानं शिरसि धृतभुजो दृश्यते तत्स्वरूपो[26]
लाक्षारागप्रघृष्टेऽप्युभयकरतले नैव रागं करोति ।
आदित्यः कृष्णवर्णः परिणतशशभृद्दृश्यते पीतवर्णो
मूत्रं देहश्च शीतो भवति नरपते तद्दिने मृत्युरेव ।।८०।।

जिह्वाधः कालसूत्रं प्रभवति नयने ब्रह्मरेखातिसूक्ष्मा
श्वासश्चन्द्रार्कमार्गे स्फुरति नरपते द्वे कपोले तथैव ।
कक्षाविष्टं स्तनोर्ध्वं ग्रहगणसकलं दृश्यते स स्फुलिङ्गं
स्तब्धग्रीवा सगात्रा भ्रमणमपि तनौ लक्षणं दृष्ट-[27] मृत्योः ।।८१।।

उत्पत्तिं यः करोति प्रसवनसमयं[28] बालकौमाररूपं
संहारं सैव लोके पुनरपि कुरुते कालचक्री न सूर्यः ।
चन्द्रादित्यादिदेवान् ग्रसति स भगवान् रात्रिभागे स भूतान्
भूयो मुञ्चत्यनन्तामपि दिनसमये सृष्टिहेतोः क्रमेण ।।८२।।

शब्दाद्यं कर्मषट्कं भवति हि करणं त्विन्द्रियाणां च षट्कं
वर्षा मासाश्च पक्षा दिननिशितिथयश्चन्द्रसूर्यो च कर्त्ता ।
तेषां संहारकर्ता त्वपर इति भवेत् सृष्टिकर्ता न कर्ता
व्योमव्यापी खवज्री विषयविरहितो निर्गुणो निःस्वभावः ।।८३।।

---

ागे छिद्यते [4] ने °नाडीं [5] ने. °पदं [6] ने. °नाडीं [7] ने. दिनकरश्चायनं [8] ने. प्रभवति [9] ने. °नाडीं [10] ने. °तुं [11] ने. °पि
के. दुष्टं [15] ने. व्याधिः [16] ने. सहसात् [17] ने. बुद्धा [18] ने. नाडीं [19] ने. भ्रमेण [20] ने. °मृतं [21] के. °त्य, ने. °त्ये
च [24] ने. °वर्गा वि° [25] ने. यद्दिनं [26] ने. °पे [27] ने. दुष्ट° [28] ने. °समये

गन्धो वर्णो रसं स्पर्श इति च धरणी तोयवह्निश्च वायुर्
अष्टौ वै रूपिणः स्युः समुदितविषया एकमुख्याः समस्ताः ।
एतत् त्रैलोक्यकृत्स्नं स्फुरणनिधनतां याति कालप्रभावात्
शब्दः शून्यं ह्यरूपं भवति नरपते धर्मधातुर्मनश्च ॥८४॥

बध्नात्यात्मा विकल्पैः प्रकृतिगतगुणैः कोषकारेव कीट
आत्मानं चात्मना वै पुनरपि मनसा मुञ्चते निर्विकल्पात् ।
तस्माद्राजन् स्वकर्मप्रकृतिगुणवशाद्दुःखसौख्यं करोति
कः कर्ता किं करोति प्रकृतिविरहितो मुह्यतेऽज्ञानलोकः ॥८५॥

पृथ्वीतोयाग्निवाता गगनमपि गुणा बुद्ध्यहंकारचित्तं
स्थूला सूक्ष्मा परा च त्रिविधगुण[1]गता वर्णबिन्द्वादिभेदैः ।
स्थूला स्थूलेन्द्रियेषु प्रकृतिरधिगता सूक्ष्मचित्ते च सूक्ष्मा
ज्ञाने च ज्ञानमूर्तिः प्रकृतिरविकृतिर्जीवभूता न भूताः ॥८६॥

आद्या शून्यानि पञ्चप्रकृतिरविकृतिः श्रीकलाबिन्दुनादं
कालं चित्तं च बुद्धिः प्रकृतिरपि तथान्ये स्वरा मारुताद्याः ।
स्थूला वर्गाक्षराणि त्रिगुणितदशकं षोडशान्ये विकारास्
तेषां मध्ये न वज्री प्रकृतिरविकृतिर्व्यापको निःस्वभावः ॥८७॥

संसारे सौख्यदुःखं प्रकृतिगुणगतं चास्ति तत्कर्मजं च
स्थूलं सूक्ष्मं च शान्तं त्रिविधमपि भवेत् कर्म चैतन्नराणाम् ।
कर्ता चाहं वि[2]कर्म त्वपरपशुपतिश्चास्ति कर्तेति कर्म
नाहं कर्ता परो वा प्रकृतिविरहितो ज्ञायते तच्च कर्म ॥८८॥

तस्मात्कर्त्ता न कश्चिद्ददति[3]न हरति प्राणिनां सौख्यदुःखं
संसारे पूर्वकर्म प्रभवति फलदं यत् कृतं[4] त्रिप्रकारम् ।
मूर्खाणां बुद्धिरेषा ददति [5]स हरते[5] सृष्टिसंहारकर्ता
देहे छिद्रं न पश्यत्यपरमिति शुभं हार्यमाणं स्वकाक्षैः ॥८९॥

इच्छाशक्तिः क्रियायाः स्वमनसि जगतो ज्ञानशक्तिस्तृतीया
भावालोकं प्रवेशं समरसकरणेऽर्थोपलब्धिं करोति ।
भूयस्त्यागं चतुर्थी त्रिभुवननमिता अद्वया वै क्रमेण
तासां मध्ये न किञ्चिद्ग्रसति नरपते मुञ्चते नैव वज्री ॥९०॥

आत्मा कर्ता न तत्र प्रभवति नृपते दुःखसौख्यप्रदाता
बन्धो मोक्षो न कश्चिद्भवति नरपते चित्तशक्तिं विवर्ज्य ।
आकाशं कुम्भमध्ये व्रजति न च जनं नीयमानेन यद्वद्
व्योमव्यापी खवज्री विषयविरहितो देहमध्ये च तद्वत् ॥९१॥

एवं कर्मास्तिवादी भवति स भगवानेकशास्ता न कर्ता
सर्वज्ञश्चादिबुद्धस्त्रिभुवननमितः कालचक्री न चक्री ।
ब्रह्मा विष्णुश्च रुद्रः शरणमधिगतो यस्य पादाब्जमूले
तं वन्दे कालचक्रं जिनवरजननं निर्गुणं निर्विकल्पम् ॥९२॥

शान्ते भावेऽमरत्वं भवति नरपते तामसे नारकत्वं
तिर्यक्त्वं राजसे च प्रवर भुवि तले मानुषत्वं च मिश्रे ।
भूतत्वं त्रिप्रकारं रजसि तमसि वै सात्त्विकोऽन्योन्यमिश्रैर्
यद्भावं मृत्युकाले स्मरति च मनसा संभवस्तत्र जन्तोः ॥९३॥

देवत्वं चाष्टभेदैः सुरवरनिलये मानुषत्वं यथैकं
तिर्यञ्चोऽब्धिप्रकाराः खलु नरकगतौ नारकत्वं तथैकम् ।
एषु स्थानेषु जन्तुर्भ्रमति रसगतौ कर्मपाशैर्निबद्धो
नामुक्तो याति मोक्षं परमसुखपदं जन्मलक्षैरनेकैः ॥९४॥

स्कन्धैर्धात्विन्द्रियैश्च त्रिविधभवभयैः पञ्चकर्मेन्द्रियैश्च
तन्मात्रैः कर्मदोषैः सहगुणमनसा बुद्ध्यहङ्कारकाद्यैः ।
एतैर्बद्धो हि जीवो भ्रमति रसगतौ सूक्ष्मभावेन रूपो
भावे त्यक्ते प्रयात्यक्षयपरमपदं यत्र जन्मी न भूयः ॥९५॥

वेदः साङ्गो न विद्यास्मृतिमतसहितस्तर्कसिद्धान्तयुक्तः
शास्त्रं चान्यद्धि तद्वत्कृतमपि कविभिर्व्यासवैश्वानराद्यैः ।
विद्येत्यध्यात्मविद्याक्षरमपि मुनिभिः प्रोक्तमेवात्र लोके

त्रैलोक्यं यत्र कृत

योगीन्द्रोऽप्राप्तयो
श्रीमान् मानुष्यलो
पूर्वाभ्यासेन तेनाह
प्राप्ते ज्ञाने प्रया

ज्ञानोत्पत्तिर्जिनान्
मध्याह्ने चामुराण
सम्यग्ज्ञाने विभङ्
शान्तं रौद्रं च क

मध्याह्नादर्धरात्रि
अन्नं गोमांसभोज
रक्तं श्वेतं च व
धर्मो हिंसा च

भूतानां मिश्रकर्म
धर्मोऽहिंसा च

योगार्थं वा प्रवृ

खाद्यं पेयं च मिश्

ज्योतिः सूर्यार्चिर
चन्द्रो ज्योतिः नि
अर्चिः स्वर्गे सुरा
व्यामिश्रं मर्त्यलो

यो यन्मध्ये प्रवि
तन्मध्ये स्वस्वभा
यावज्जीवस्य भा
तावत् संसारघो

---

[1] ने. °पथ° [2] ने. चि [3] ने. दहति [4] ने. °कृतिं [5-5] ने. सुरपते [6] ने. °क्षर° [7] ने. चा° [8] ने. °मध्ये

त्रैलोक्यं यत्र कृत्स्नं भवति नरपते लीयते यत्र भूयः ॥९६॥

योगीन्द्रोऽप्राप्तयोगः प्रचलितमनसा याति मृत्युं कदाचित्
श्रीमान् मानुष्यलोके प्रवर मुनिकुले जायते योगयुक्तः।
पूर्वाभ्यासेन तेनाहरति पुनरपि ज्ञानयोगं विशालं
प्राप्ते ज्ञाने प्रयात्यक्षय[६]परमपदं यत्र जन्मी न भूयः ॥९७॥

ज्ञानोत्पत्तिर्जिनानां रविदिनसमये चार्धरात्रे निशान्ते
मध्याह्ने चासुराणां शशिनिशिसमये निर्गमे वासरस्य ।
सम्यग्ज्ञाने विभङ्गे भवति च वचनं संस्कृतं प्राकृतं च
शान्तं रौद्रं च कर्म त्रिभुवननिलये पौरुषं प्राकृतं च ॥९८॥

मध्याह्नादर्धरात्रिं दिननिशिसमये भुक्तिकालस्तयोश्च
अन्नं गोमांसभोज्यं बहुविधरसदं पानमण्डस्य शुक्रम् ।
रक्तं श्वेतं च वक्त्रं रविशशिगतिवत्स्वर्गपातालवास-
धर्मो हिंसा च हिंसागुरुनियमवशाद्वज्रदैत्यासनं च ॥९९॥

भूतानां मिश्रकर्म प्रभवति वचनं मिश्रपैशाचिकं च
धर्मोऽहिंसा च हिंसा खलु गुरुनियमाज्जीवघातादि-दोषः।
योगार्थं वा प्रवृत्तिर्भवति भवति नरपते वा[७]निवृत्तिः कदाचित्
खाद्यं पेयं च मिश्रं रविशशिगमनं मिश्रमार्गः परत्रे ॥१००॥

ज्योतिः सूर्यार्चिरब्धौ सितदिनमयनं चोत्तरं चार्धवर्षं
चन्द्रो ज्योतिः निशा का सितमयनमिदं दक्षिणे धूममार्गे।
अर्चिः स्वर्गे सुराणामसितमपि तमो नागलोकोऽसुराणां
व्यामिश्रं मर्त्यलोके भवति नरपते प्रेततिर्यङ्नराणाम् ॥१०१॥

यो यन्मध्ये प्रविष्टो व्रतनियमरतः कर्मपाशैर्निबद्धस्
तन्मध्ये स्वस्वभावाद्भवति नरपते तत्कुले तद्ग्रहेण ।
यावज्जीवस्य भावस्त्रिविधभववशाद्वेदनासौख्यदुःखं
तावत् संसारघोरे भ्रमणमिह नृप स्वर्गमर्त्ये[८] त्वधश्च ॥१०२॥

ने. °मध्ये



काद्यान् वर्गान् समात्रानपि गुणगुणितान्यान्त्रिपक्षस्वरांश्च
त्रिंशद्वै व्यञ्जनानि त्रिविधगतिवशाद्रोहते तानि मृत्युः।
चारान् पञ्चग्रहाणां रविशशिचरणा[१] राहुकेतोः पदं च
द्वात्रिंशद्वर्षपक्षानपि गुणगुणितांश्चन्द्रसूर्याग्निभिन्नान् १०३

पक्षा वर्षत्रयाणामपि शशिनि गुणाः कालवह्न्यब्धिपक्षौ
ऊनीभूता शताब्दे समविषमगतौ शेषपक्षा रवीन्दोः।
लोकाक्ष्यग्न्यक्षिसंख्या दिननिशिसमये भर्तृहीनाः समस्ता
वर्गान् मात्रान् र[२]वीन्द्वोर्भ्रमति[३] गतिवशाद्व्यञ्जनादीनि मृत्युः ॥१०४॥

सार्धं वै चक्रनाडीः शशिपदरहितो गुह्य[४]नाडीविहीना
प्रज्ञोपायप्रभेदैर्दिननिशिसमये भक्ष्यते ताश्च मृत्युः।
एवं वर्गान् स्वमात्रान् स्वरगणसहितान् व्यञ्जनान्येव चारान्
हीने वा मध्यमेऽष्टे शशिरविमरणे व्यञ्जने चाधिदैवे १०५

द्वात्रिंशच्चैकनक्तं स रविशशि[४]गतौ नाडिकाच्छेद एष
भूयस्त्रिंशत्त्रिरात्रैस्त्यजति स कुलिशान् स्कन्धधात्विन्द्रिया-दीन्।
त्यक्त्वा चन्द्रार्कनाडीं प्रविशति शिखिनीं प्राणवायुर्दिनैकं
विच्छेदं यावदेवं क्षितिजलहुतभुग्मारुताकाशधातोः १०६

आदौ संरक्षणीया सकलजिनतनुर्मन्त्रिणां सिद्धिहेतोः
कायाभावे न सिद्धिर्न च परमसुखं प्राप्यते जन्मनीह।
तस्मात् कायार्थहेतोः प्रतिदिनसमये भावयेन्नाडियोगं
काये सिद्धेऽन्यसिद्धिस्त्रिभुवननिलये किंकरत्वं प्रयाति १०७

शून्ये धूमादिमार्गं गुरुनियमवशाद्भावयेद्बिम्ब[६]सीम्नो
नाडीचक्रेषु पश्चात् स्थिरमपि कुरुते प्राणमापानवायुम्।
पश्चादिन्दोर्निरोधं ग्रह इव कुरुते बोधिचित्तस्य योगी
तस्माद्यत्किञ्चिदिष्टं कतिपयदिवसैः प्राप्यते जन्मनीह १०८

मार्त्तण्डेन्दोर्निरोधः समविषमगतौ मध्यमेऽग्नौ प्रवेशः
प्राणापानद्वयोश्च प्रथमदिनगतौ वञ्चनाऽकालमृत्योः।
प्राणेनापूरयित्वा सहकरचरणाङ्गुष्ठपर्वान्निखान्तात्[७]
षट्चक्रे बुद्धदेव्यो भयकरकमला योगिना भावनीयाः १०९

आपानाकुञ्चनेष्टं भवति वरतनौ वातरोगे समस्ते
प्राणायामः कफे स्यात् पुनरपि च तयोर्मुञ्चनं पित्तदोषे[८]।

---

[१] ने. °चरणां [२] ने. °मात्रान्द्र° [३] ने. ग्रसति [४] ने. वार°
[११] ने. °शूलस्य [१२] ने. °ध्रेस् [१३] ने. मूर्च्छा [१४] ने. °रसां
[२२] ने. °र्थं

न्त्रिपक्षस्वरांश्च
तानि मृत्युः।
हुकेतोः पदं च
ग्नभिन्नात् १०३
वह्नचब्धिपक्षौ
रवीन्दोः।
हीनाः समस्ता
ाद्वयञ्जनादीनि
मृत्युः ।।१०४।।
नाडीविहीना
च मृत्युः।
ाञ्जनान्येव चारान्
ाने चाधिदैवे १०५
डकाच्छेद एष
स्कन्धधात्विन्द्रिया-
दीन्।
प्राणवायुर्दिनैकं
काशधातोः १०६
सिद्धिहेतोः
ते जन्मनीह।
येन्नाडियोगं
रत्वं प्रयाति १०७
द्विम्ब[६]सीम्नो
णमापानवायुम्।
चित्तस्य योगी
प्यते जन्मनीह १०८
मेऽग्नौ प्रवेशः
ाऽकालमृत्योः।
न्नखान्तात्[७]
ा भावनीयाः १०९
रोगे समस्ते
ुञ्चनं पित्तदोषे[८]।

ऊर्ध्वाधः संनिरोधो भवति सुखकरः संनिपाते ज्वरे च
नाभ्यूर्ध्वे[९] प्राणवायुः सकलरुजहरो नाभिमूलेऽपरश्च ११०
आकुञ्च्यापानवायुं त्रिविधपथगतं प्राणमेवार्धतश्च
संघट्टे यावदग्निः प्रभवति बलवान् व्याप्नुवत्सर्वकाये।
जग्रीप्लीहार्षरोगानपि जठरगतान् मासयोगान्निहन्ति
ऊर्ध्वश्वासं च काशं त्रिविधमपि विषं नेत्ररोगादिकं च १११
कक्षा सव्यावसव्यं स्तनमपि बलवत्पीडितं प्राणरोधात्
सव्याद्वामासु नाडी प्रवहति[१०] सहसा वामकक्षा च सव्या।
मासार्धेनाप्यरिष्टं हरति मरणदं योगयुक्तश्च योगी
पादौ वज्रासनस्थौ धृतकरकमलौ पृष्ठशृङ्गस्य[११] नाशः ११२
ऊर्ध्वौ पादौ शिरोऽधो व्यपहरति तनौ श्लेष्मरोगं समस्तं
प्रस्रावः प्राणरोधात् कतिपयदिवसैर्मूत्रकृच्छ्रं निहन्ति।
प्रत्यूषेऽनामिकाभ्यां जलविगतमुखे दन्तपंक्तिं प्रघृष्य
नेत्राणामञ्जनं स्यान्नयनरुजहरं तालनं वा जलेन।।११३।।
सुप्तेनोत्ताननाभिधृतकरकमला जीर्णशूलं निहन्ति
गण्डानामुद्भवं वै सहघृतलवणैः स्वेदनं वृद्धिनाशि।
अर्कक्षीरप्रलेपस्त्वथ भवति कदा दन्तकीटः समूलो
व्याघ्री बीजस्य धूमो धृतमिह नलिकाद्यैश्च कीटादिनाशः
।।११४।।
वर्षार्धे श्वेतकुष्ठं हरति वरतनौ मन्त्रिणां किं तदन्यत्
प्रज्ञासङ्गे स्वचित्तं स्खलितमपि सदा प्राणवायोर्निरोधात्।
सप्तत्यब्दां जरां वै हरति स पलितां चार्धवर्षप्रपूर्णे
मुद्रासिद्धिस्तदूर्ध्वं भवति कतिदिनैर्मार्गचित्तप्रसङ्गात् ११५
यच्छब्दो हृत्प्रदेशे भवति वरनृणां श्रूयते श्रोत्ररन्ध्रे[१२]
तस्मादूर्ध्वं हि मूर्च्छा[१३] व्रजति समरसं[१४] त्याजितं
चैकभूतम्।
यच्छब्दं जीवलोके वदति च भवजं तत्तु[१५] देवः शृणोति
विज्ञानं चैव दूरात् श्रवणमपि विभो योगिना भावनीयम्
।।११६।।
कृत्वा पर्यङ्कबन्धं विकसितवदनोऽन्योन्यदन्तं स्पृशेन्न[१६]
आकृष्टो बाह्यवातस्त्वमृतरससमो नाभिचक्रे प्रविष्टः।
संतापं क्षुत्पिपासां हरति वरतनौ संनिरुद्धो विषं च

श्वेतो बिन्दुर्ललाटे स्वरपरिकरितो मुञ्चमानोऽमृतं वा ११७
घ्राणे रन्ध्र[१७]द्वयेन त्वपि पिहितमुखे बाह्यवातः समस्तः
प्राणेनाकृष्य वेगात् तडिदनलनिभो घट्टितोऽपानवायुः।
काले नाभ्यां स योगाद् व्रजति समरसां चन्द्रसूर्याग्निमध्ये
अन्नाद्यं क्षुत्पिपासामपहरति तनौ चामरत्वं ददाति ११८
स्वच्छायामातपस्तामपरमुखरवे स्तब्धदृष्ट्यावलोक्य
पश्चाद्व्योमाभिवीक्ष्येत्समरसपुरुषो दृश्यते धूम्रवर्णः।
षण्मासाभ्यासयोगादवनिगतनिधिं दर्शयेद्भूमिच्छिद्रं
वृक्षच्छायां प्रविश्य त्वपि गगनतले भाविता बिन्दुमाला ११९
या शक्तिर्नाभिमध्याद् व्रजति वरपदं द्वादशान्तं कलान्तं
सा नाभौ संनिरुद्धा दलितदनलनि[१८]भा दण्डरूपोत्थिता च[१९]
चक्राच्चक्रान्तरं वै मृदुललितगतिश्चालिता मध्यनाड्यां
यावच्चोष्णीषरन्ध्रं स्पृशति हठतया सूचिबद्धा ह्यचर्म १२०
आपानं तत्र काले परमहठतया प्रेरयेदूर्ध्वमार्गे
उष्णीषं[२०] भेदयित्वा व्रजति वरपुरं वायुयुग्मे निरुद्धे।
एवं वज्रप्रबोधान्मनसि स विषयात्[२१] खेचरत्वं प्रयाति
पञ्चाभिज्ञास्वभावा भवति पुनरियं योगिनां विश्वमाता१२१
प्राणायामं प्रकुर्याद्धृदि शिरसि तथा यावदग्निव्यथाभूत्
तस्मादूर्ध्वं हि मूर्च्छा व्रजति सुकमले यन्त्रिको वानिलेन।
उष्णीषं भेदयित्वा व्रजति हि मरणं स्कन्धधातून् विहाय
मुद्रासङ्गप्रणष्टो न हि समसुखदो जन्मनीहैव पुंसाम् १२२
मुदोक्ताभावनार्थं दिननिशिसमये नैव रागक्षयार्थं
वाग्वज्रं तर्पणार्थं न खलु मदकरं मन्त्रिणामुक्तमेवम्।
सर्वाहारः सुखार्थे[२२] प्रतिदिनसमयेऽजीर्णहेतोर्न वोक्तः
श्रीचर्यासिद्धिहेतोर्भ्रमणमपि चितौ कीलनार्थं न रात्रौ १२३
अक्षोभ्यं किञ्चिदुष्णं मुखरुजशमनं दन्तशूलं प्रकीटं
प्रत्यूषेऽक्षोभ्यनश्यं शिरसि रुजहरं तोयनश्यं तथैव।
कर्णे नेत्रे प्रविष्टं ह्युभयरुजहरं मूत्रमुष्णं च शीतं
भूतार्त्तेऽक्षोभ्यनश्यं त्रिकटुकसहितं सौख्यदन्तैव दष्टे १२४
विण्मूत्रं शुक्ररक्तं नृ-पलनसहितं भक्षितं चायुदं स्यात्
स ध्यानं पुष्पनश्यं हरति स पलितामङ्गजातां रुजं च।
भुक्तं पञ्चप्रदीपं सकलरुजहरं मक्षिकाच्छर्दिमिश्रं

---

[३] ने. ग्रसति [४] ने. वार° [५] ने. शशिरवि° [६] ने. °येद्विस्व° [७] ने. °खांतां [८] ने. °दोषै [९] ने. नात्युर्ध्वं [१०] ने. प्रभवति
ने. मूर्च्छा [१४] ने. °रसां [१५] ने. तेषु [१६] ने. स्पृशन् [१७] ने. रन्ध्रे [१८] ने. °वि° [१९] ने. गां [२०] ने. °षे [२१] ने. °यान्

स्त्रीपुष्पं शुक्रमिश्रं त्वपहरति रुजं भक्षितं वर्षयोगात्[1] १२५
वातघ्नं क्षारमम्बु प्रभवति मधुरं पित्तशत्रुः कषायः
श्लेष्मघ्नं सर्वतिक्तं कटुकमपि तथा चौषधं वा रसो वा।
श्लेष्मघ्नं छागदुग्धं त्रिकटुकसहितं माहिषं पित्तशत्रुर्
वातघ्नं चोष्णदुग्धं त्रिविधरुजहरं गोपयः सर्पिरेव ॥१२६॥
जातीक्वाथाम्बु चोष्णं मुखरुजशमनं दन्तशूलं च वेलं[2]
तैलं वस्त्वम्बुपक्वं त्रिकटुकलवणैः कर्णरोगस्य नाशः।
आज्यं क्षीरा हि रक्तैः क्वथितमपि सदा घ्राणरोगस्य नाशः
कर्कोटीलाङ्गलीन्द्री हरति सहखरां गण्डमालां प्रलेपात् १२७
कुर्याद्धस्तौ प्रलम्बौ समपदकमले प्राणवायोर्निरोधं
यावद्भूम्यां प्रपातो न हि भवति तनौ मुञ्चनं च ज्वरस्य।
भूयो भूयः समाधौ मरणभयकरान् नाशयेत् कण्ठकान् वै
हृत्पद्मे चन्द्रमूर्ध्नि त्वमलशशिनिभा[3] भाविता विश्वमाता
॥१२८॥
पिष्ट्वा शीताम्बु सूर्यो ज्वरविहितनृणां कण्ठकान् नाशयन्ति
घृष्टं त्वक्षोभ्यमिश्रं हरति भयहरान् वा कपालं ज्वरान्ते।
मन्त्रश्चोङ्कारपूर्वो जलशिखिमरुतां वज्रपूर्वं च नाम
रक्षान्ते नैव कुर्यात् शिरसि गलहृदो नाभिगुह्यादिकेषु॥१२९॥
तुल्यं धात्री च धान्यं त्वपरमपि तथा तिन्तिलीपत्रचूर्णं
तोये चन्द्रार्कयुष्टे खलु विगतमले क्वाथयेत् पादशेषम्।
तत् क्वाथं खण्डमिश्रं पुनरपरदिनात् पीतमेतं त्रिरात्रं
ग्रीष्मे सूर्यांशुदाहं हरति मरणदं सप्तधातौ गतं च ॥१३०॥
हेमार्कं कान्तलोहं पटलजमयसं वाहयेन्मक्षिकेन
बीजार्धेनापि पिष्टिर्मल[4]विगतरसे कारयेत् षट्पलांश्च।
गोतक्रं दारयित्वा खलु खरशिखिना ग्राह्यमेवात्र मस्तं
श्रीपिष्टया कर्णपत्रे क्वथितमपि पुनर्यावदर्धप्रमाणम्।१३१।
उद्धृत्याशुद्धखण्डाष्टपलमथनवत् क्षेपनीयं हि तत्र
तद्भोज्यं सर्वकालं ह्यशनविरहितं चायनं यावदेव।
षण्मासैर्दिव्यदेहो बलिपलितगतो जायते योगयुक्तस्
तस्माद्भोज्यं तदेव प्रतिदिनसमये किन्तु पिष्टया विहीनम्
॥१३२॥
पूर्वोक्तं बीजराजं सममपि तु रसे जारितं सार्धमात्रं
क्षाराम्लैर्मर्दयित्वा बहुविविधविडैर्यावदेकत्वमेति।
पित्ताम्लैर्गन्धिकाढ्यं दरदमपि शिलां मर्दयेत् सूत[5]तुल्यं
तल्लेपात्तारपत्रं व्रजति कनकतां पक्षमप्याधिकेन॥१३३॥
तीक्ष्णं चाकाशजातं त्वलवणयवक्षारबीजं क्रमेण
वृद्धं चार्के द्विगुण्ये समरसकरणा[6]द्दाहयेदर्कशेषम्।
भूयः क्षारेण शुद्धं भवति मृदु तथा गोमयाद्ये निषिक्तं
तारे दत्तं त्रिभागं हतमपि भरितं शुद्धपुष्पत्वमेति ॥१३४॥
एला कर्पूरमाला चलघनफलिनी वायसानादिजं[7] च
कर्कोलं सिंहमूत्रोत्पलफलमृगजा रक्तदैत्यानि पूतिः।
नागासीतं रणं पत्रपलजललतान्यम्बरं वक्रमेतत्[8]
पञ्चद्रव्यैस्तु गन्धं कुरु मृगशशिभिर्धूतपुष्पा स वाद्यैः॥१३५॥
नेत्रेन्द्वग्न्यब्धिबाणा गुणजलधिशरा हस्तचन्द्रेषु नेत्रा
चन्द्राग्न्यब्धीन्दुकाला युगशरनयनाऽब्धीषु नेत्रेन्दुलोकाः।
एलाद्या भागसंख्या क्रमपरिरचिता पञ्चपञ्चप्रकोष्ठैर्
द्रव्यैर्गन्धं भवेत् कक्षपुटपुरगतैः शुद्धभागैर्दिनाख्यैः ॥१३६॥
जात्याद्येलालतानां दलकलसपुरे पातनीयं क्रमेण
लाक्षासर्जं च दुग्धं पुरमपि च सितं धूपकार्येषु धूपम्।
कुर्यात् कर्पूरखण्डैः कुसुमरसयुतैर्वाह्नभागैर्नखैश्च
पिष्टं तद्गन्धतोयैरपि मधुरहितां धूपवर्त्तिं प्रकुर्यात्॥१३७॥
नाभ्यादौ सिंहमूत्रे शशिगगनपुरे पातयेत् स्नानयोगे
ग्रन्थिं[9] व्याघ्रं हरेणुं हतमपि च तथा शङ्खं च[10]त्वग्विभागाः।
धान्यमुर्वी शताङ्कां दममपि मधुरी तद्ववदुद्वर्तने च
पूर्वोक्ते चानिवृत्ते जलजमिव तनुग्रन्थिपर्णं च तैले १३८
चूर्णे ग्रन्थिं च तद्वद्भवति तनुहतं पानवासे मुखे च
त्वग्बोलं ग्रन्थिशङ्खं फलदलपुटपाके च हंसादिके च।
एवं त्रिंशत्प्रभेदैः सुरचितविधिना गन्धधूपादियोगात्
कुर्याद्द्रव्यैर्विशुद्धैः फलपुटपवनैर्वासितैर्वेधितैश्च ॥१३९॥
अष्टाङ्गादौ कषायो भवति दलवशात्तद्द्विगुण्योग्रधूपः
पश्चाद्द्रव्यप्रमाणो गुड इति च भवेद्वर्धते ग्रीष्मयोगात्।
पादांशं शङ्खधूपं मधुकमपि सितां निर्दहेद्द्रव्यतुल्यां
पिण्डं शङ्खप्रमाणं मलयलघुचलं चन्द्रयुक्तं च तद्वत्॥१४०॥
पक्वं गन्धं सपुष्पैः कतिपयदिवसं वासयेद्यावदिष्टं
पश्चाद्वेधं शतांशं त्रिफलशशिमदैः कारयेत् सीसकैश्च।
स्निग्धाम्बु छागमूत्रं कुसुमरससमं क्वाथयेत् पुष्पजातं
मासैकं धान्यपक्वं
गुह्यं गन्धेषु पूतिं
तद्वत्सीतं तुरुष्कं
वेधे कर्पूरनाभित्रि
गुह्यं त्वग्रन्थिपर्णं
शुद्धाब्जं द्रव्यहीनं
पक्वं धूपैः कषायो
द्वौ ग्रासौ खण्डमि
ग्रासस्याद्यावसाने
वासं कृत्वा सुपुष्पै
अस्रावे मृत्कपाले
कृत्वा विस्तीर्णभा
पक्वं षण्मासयोगा
कृत्वा शुद्धिं तिला
पश्चाज्जात्यादिपु
यन्त्रैस्तैलं गृहीत्वा
स्नानेनाभ्यङ्गने[11]

भूभृत्सूर्येन्दुमन्वक्षि
दिग्भूता रन्ध्रषट्
संख्याकोष्ठैश्चतु
श्रीचक्रं मानपृष्ठे
योगिन्योऽष्टाष्टक
गर्भाख्या वासरा
मासाख्या वत्सरा
गर्भे शूलं च पील
जातानां बालतन्त्र
पञ्च क्रूराः कुमा
बाला न गृह्णन्ति
तेषां शान्त्यर्थमसि

कुष्ठोशीरं कसेरुं
पिष्ट्वा शीताम्बुन

---

[1] ने. °योत् [2] ने. वैरं [3] ने. °विधा [4] ने. °मंधि° [5] ने. भूत° [6] ने. सुसमरसकरणा° [7] ने. °रादिजं [8]
[11] ने. °जपलयो [12] ने. नाभ्युद्गते [13] ने. °निलयो [14] ने. चालं

मासैकं धान्यपक्वं भवति मृगसममासवं नाभिविद्धम् १४१
गुह्यं गन्धेषु पूतिं रसनखचपलं धूपयोगेषु गुह्यं
तद्वत्सीतं तुरुष्कं गुरुमपि शशिनं वासकार्येषु पुष्पम् ।
वेधे कर्पूरनाभित्रिफलमदसुरास्नानयोगे च सम्यक्
गुह्यं त्वग्ग्रन्थिपर्णं वनचरसहितं ग्रन्थिमुद्वर्तने च ।।१४२।।
शुद्धाज्जं द्रव्यहीनं मधुकविरहितं गन्धतोयेन पिष्टं
पक्वं धूपैः कषायोग्रसमधुकरजैर्ग्रासवृद्ध्या क्रमेण ।
द्वौ ग्रासौ खण्डमिश्रौ मलयचपलयो[11] लोहकर्पूरयोश्च
ग्रासस्याद्यावसाने मधुकमपि सितां निर्दहेदादिधूपात् १४३
वासं कृत्वा सुपुष्पैः कतिपयदिवसैर्गन्धतोयेन मिश्रम्
अस्रावे मृत्कपाले दृढपिहितमुखे वेष्टिते सिक्थवस्त्रैः ।
कृत्वा विस्तीर्णभाण्डे त्वथ धरणितले पूरिते वालुकाभिः
पक्वं षण्मासयोगाद्भवति जलगतौ नाभिभर्ता स गन्धः १४४
कृत्वा शुद्धिं तिलानां क्वथितजलदलैर्धूपलेपादिभिश्च
पश्चाज्जात्यादिपुष्पैः कतिपयदिवसं वासयेद्यावदिष्टम् ।
यन्त्रैस्तैलं गृहीत्वा नृप निपुणतया स्थापयेत् काचभाण्डे
स्नानेनाभ्यङ्गने[12] वा भवति मदकरं पुष्पतैलं ह्यपक्वम्
।।१४५।।

भूभृत्सूर्येन्दुमन्वक्षिमदनवसवो रुद्रराजाग्नयश्च
दिग्भूता रन्ध्रषट्कं तिथिजलनिधयो[13] लेखनीयास्तु कोष्ठे ।
संख्याकोष्ठैश्चतुर्भिर्जलनिधिशिखिनो लेखयित्वा समस्तं
श्रीचक्रं मानपृष्ठे प्रसवनसमये दर्शयेद्गुर्विणीनाम् ।।१४६।।
योगिन्योऽष्टाष्टकायाः प्रकटमहितले मातरो याः प्रसिद्धा
गर्भाख्या वासराख्या त्रिगुणनवदशैकादशायास्त्रिपञ्च ।
मासाख्या वत्सराख्याः सकलभुवि तले ताः प्रगृह्णन्ति बालं[14]
गर्भे शूलं च पीलां प्रसवनसमयेऽप्येव कुर्वन्ति योनौ १४७
जातानां बालतन्त्रं भवति दिनवशान्मासवर्षप्रभेदात्
पञ्च क्रूराः कुमाराः प्रकृतिगुणवशात् संस्थिताः सर्वसन्धौ ।
बाला न गृह्णन्ति ते वै स्वतिथिभयगतं नैव मुञ्चन्ति राजन्
तेषां शान्त्यर्थमस्मिन् प्रभवति विविधं मण्डले स्नानहोमम्
।।१४८।।

कुष्ठोशीरं कसेरुं तगरकुवलयं केशरं पङ्कजस्य
पिष्ट्वा शीताम्बुना मन्त्रितमपि कुलिशैर्गर्भशूले प्रदेयम् ।

[7] ने. °रादिजं [8] ने. चक्र° [9] ने. ग्रन्थि [10] ने. व



गर्भस्तम्भेऽष्टलोमानि नकुलशिखिनः पोषयित्वा प्रदेयं
दुग्धाज्यं पायसान्नं दधिगुल[1]सहितं दीयते वासरीणाम् १४९
पक्वान्नं पञ्चभिन्नं दधिगुल[2]सहितं पोलिकामोदकांश्च
गन्धं पुष्पं प्रदीपं स्नपनमपि दलैः पञ्चरात्रं प्रकुर्यात् ।
गोदन्तं मेषशृङ्गं मृगनखचिकुरं[3] सर्पनिर्मोकधूपं
बालानां मासजानां कथितमपि बलिं पुष्टिहेतोः समस्तम् १५०
पञ्चान्नं पञ्चखाद्यं जलचरपिशितं गन्धपुष्पं प्रदीपं
मद्यं पूर्वोक्तधूपं स्नपनमपि तथा दिग्बलिं दिग्विभागे ।
बालानां वर्षजानां प्रकटितमवनौ पुष्टिहेतोर्नरेन्द्र
गर्भाद्विर्षत्रिपञ्चो[4]भयप्रतिनियतं योगिनीनां प्रपूजा ।।१५१।।
अङ्गाक्षेपोऽक्षिशूलं मुखकरचरणं पीततां याति सम्यक्
प्रस्रावः पीतवर्णो ज्वर इति च भवेच्छर्दिशोषं च मूर्च्छा ।
ज्ञात्वा चिह्नानि तेषामपि नृप करणं मण्डले होमकार्यं[5]
नो दत्ते मोचयन्ति प्रकृतिगुणवशान्मातरो भूतजाश्च ।।१५२।।
श्वेताङ्गं यस्य सर्वं भवति नरपते फो[6]टकाश्चातिसूक्ष्मा[7]
वक्रग्रीवा सगात्रा स्रवति च रुधिरं वक्त्रगुह्ये गुदे च ।
तस्मिन् पूजां न कुर्याद्भवति हि लघुता मन्त्रिणां मोहितानां
मृत्युस्तस्यास्ति ननं सुरनरभुजगै रक्षितुं शक्यते न ।।१५३।।
नागा यक्षा ग्रहा येऽपि च दनुकुलजा राक्षसा वै पिशाचाः
शाकिन्यो दुष्टलामा नररुधिररता डाकिनीरूपिकाश्च ।
कुम्भाण्डाः क्षेत्रपालास्त्वधिगणपतयः प्रेतवेतालसिद्धाः
सापस्माराः खगेन्द्राः परमसुखकराः पूजिता मण्डले स्युः १५४
क्रूराणां पूजनार्थं भवति नरपते मण्डलं ग्रामबाह्ये
वृक्षस्थाने श्मशाने सुरवरभवने सङ्गमे वा नदीनाम् ।
हस्तं वा द्वौचतुष्कं त्रिदशनवनृपैर्देवतानां प्रमाणैर्
मध्ये त्वष्टारचक्रं भवति गुणवशान्मण्डलादर्धभागम् ।।१५५।।
द्वारं चक्राष्टमानं भवति खलु तदर्धेन वेदी च हाराः
प्राकारा वेदिकार्धा त्रिगुणमपि भवेत्तोरण द्वारमानात् ।
वृत्तं कुण्डं त्रिभागं सितकमलमयं पूरितं श्वेतरङ्गैः
कुर्याच्छ्रीपञ्चरङ्गैः स्वकुलदिशिगतं देवतानां स्वचिह्नम् १५६
वज्रं मध्येऽसिपूर्वे भवति कुलवशाद्दक्षिणे रक्तरत्नं
वामे श्वेतं च पद्मं शतदलसहितं पश्चिमे चक्रचिह्नम् ।
आग्नेय्यां कर्णिका वै कमलदलगता दैत्यकोणेऽङ्कुशः स्याद्

[1] ने. °गुड° [2] ने. °गुड° [3] ने. °चिकुलं [4] के. °पञ्च°
[12] ने. लक्ष्मणः, भोटे ར་ཀླུ་ཧ [13] ने. न च [14] ने. पठेति

ायित्वा प्रदेयं
वासरीणाम् १४९
लकामोदकांश्च
ात्रं प्रकुर्यात् ।
किधूपं
हेतोः समस्तम् १५०
ापुष्पं प्रदीपं
ऽ दिग्विभागे ।
तोर्नरेन्द्र
नां प्रपूजा ।।१५१।।
याति सम्यक्
दशोषं च मूर्च्छा ।
डले होमकार्यं[५]
भूतजाश्च ।।१५२।।
काश्चातिसूक्ष्मा[७]
ागुह्ये गुदे च ।
मन्त्रिणां मोहितानां
शक्यते न ।।१५३।।
ाक्षसा वै पिशाचाः
ज्नीरूपिकाश्च ।
तवेतालसिद्धाः
ता मण्डले स्युः १५४
ग्रामबाह्ये
वा नदीनाम् ।
ां प्रमाणैर्
ादर्धभागम् ।।१५५।।
वेदी च हाराः
ाण द्वारमानात् ।
ं श्वेतरङ्गैः
तानां स्वचिह्नम् १५६
ाणे रक्तरत्नं
मे चक्रचिह्नम् ।
्यकोणेऽङ्कुशः स्याद्

वायव्ये वज्रपाशो भवति नरपते रुद्रपत्रे त्रिशूलम् ।।१५७।।
पूर्वद्वारे च खड्गं कषणघननिभं दक्षिणे वज्रदण्डो
वारुण्ये श्रीगदा च प्रभवति नियतं चोत्तरे मुद्गरं च ।
ज्ञात्वा चित्तानुसारं कुरु सुबहुविधं कालचक्रं हि यावद्
बन्ध्यानां पुत्रहेतोर्ग्रहनिहतनृणां शान्तिपुष्टयर्थमेतत् ।।१५८।।
कुम्भाष्टाभिः सरत्नैर्दलकमलमुखैः सप्तमल्लैरपक्वैस्
तोयैः पञ्चामृताद्यैः स्नपनमपि च निर्मञ्जनं सर्षपाद्यैः ।
गन्धैर्धूपैः प्रदीपैर्विविधफलरसैः श्वेतपुष्पैश्च वस्त्रैः
कृत्वा पूजां विचित्रां पुनरपि च ततो होमयेच्छान्तिहव्यम् १५९
दुग्धध्यानं तिलाज्यं शरशतसमिधः पञ्चदुग्धांघ्रिपानां[८]
अर्घं चावाहनं चारमणमपि तथैवार्चनं पूजनं च ।
कुर्याच्छान्त्यर्थमेतत् प्रवर भुवि तले मातृभिः पीडितानां
षट्त्रिंशद्योगिनीनां भवति नरपते सर्वकालं हि पूजा ।।१६०।।
नैरात्म्यं[९] कर्मपाकस्त्रिभव ऋतुगतिर्द्वादशाङ्ग[१०]प्रतीतेः
संभूतिर्वेदसत्यं द्विगुणितनवकावेणिका बुद्धधर्माः ।
पञ्च स्कन्धास्त्रिकायाः सहज इति तथैवाजता शून्यता च
यस्मिन्नेतद्वदन्ति प्रभवति नियता देशना वज्रिणः सा १६१
यस्मिन् वेदः स्वयंभूर्मुखकरचरणादौ च योनिर्जनस्य
नान्यो धर्मोऽश्वमेधादपर इति भवेद्देशना ब्रह्मणः सा ।
कर्तात्मा कर्म कालः प्रकृतिरपि गुणाः शून्यता नष्टधर्मा
कर्ता हेतुः फलस्य प्रकटितनियता देशना सात्र विष्णोः १६२
षण्मार्गाः पञ्चतत्त्वं परपदमखिलं चापरं मन्त्रदेहं
विद्यात्मा सशिवत्वं[११] त्रिविधपदगतेर्यो जनं त्यागभावः ।
बिन्दोर्भेदः शिवत्वं सकलतनुगतं द्वादश ग्रन्थिभेदा
एतत् सर्वं हि यत्र प्रभवति नियता देशना सा शिवस्य १६३
नास्तीशः कर्मपाकोऽपि च गुणविषयान् भूतवृन्दं हि भुक्ते
तस्याभावे फलं न स्फुटममरगुरोर्देशना वेदितव्या ।
कर्त्रा सृष्टं समस्तं सचरमचरजं तायिनां भुक्तिहेतोः
स्वर्गस्तस्य प्रतोषाद्भवति खलु नृणां देशना रक्षमणः[१२] सा ।।१६४।।
त्रैकाल्यं द्रव्यषट्कं नव[१३]पदविहितं जीवषट्कीयलेशाः
पञ्चान्ये सन्ति काया व्रतसमितिगतिर्ज्ञानचारित्र्यभेदाः ।
जीवः कायप्रमाणो ह्यपरिमितभवैर्ब्रह्मचर्येण मोक्षो
यस्मिन् मोक्षप्रमाणं ह्यपरिनिगदितं देशना सा जिनानाम् ।।१६५।।
वेदोऽसौ न स्वयम्भूस्त्रिभुवननिलये वेदशब्दोऽर्थवाची
ब्रह्मावक्त्रैश्चतुर्भिः प्रकटयति पुरा वेदशब्देन चार्थम् ।
शब्दस्यार्थोऽप्यभिन्नस्त्वथ दहति मुखं किं न शब्दोऽग्निरुक्तस्
तस्माद्वै देशकोऽप्यस्त्यविदितविषयेऽनागतार्थेऽप्यतीते १६६
वेदो नाकाशतुल्यः कृतक इह मुखोच्चारितः स्थानभेदाद्
युक्त्या प्रादेशिकश्च द्विजमुखपठितः सर्वगोऽन्ये पठन्ति[१४] ।
यस्माच्छूद्रादिजातिर्लिखति पठति नासर्वगो वेद एषस्
तस्माद्वेदप्रमाणं न हि भवति नृणां ज्ञानिनां पण्डितानाम् ।।१६७।।
अस्तीशः सर्वकर्ता यदि स च जगतः कर्मभोक्ता न चान्यो
नापीशः कर्मकर्ता यदि स च न भवेत् सर्वकर्ता समन्तात् ।
कर्तान्यत्प्रेरितोऽसौ यदि परमपराधीनता कर्तुरेषा
तस्मात् कर्ता न चेशोऽशुभशुभफलदः प्राणिनां कर्म मुक्त्वा ।।१६८।।
पृथ्वीतोयाग्निवातार्णव इह यदि खे कर्तुरादौ न सन्ति
द्रव्याभावे न विश्वं विषयविरहितः सर्वकर्ता करोति ।
न प्रत्यक्षं परोक्षं विषयविरहितस्यास्य कर्तुः प्रमाणं
संयोगादेव सर्वं भवति नरपते नेच्छया कर्मरूपम् ।।१६९।।
संयोगादिन्दुकान्तेः स्रवति च सलिलं दर्पणे वस्तुबिम्बं
जिह्वास्रावोऽम्लहेतोः स्वरवत इतरः शुद्धबीजाङ्कुरः स्यात् ।
कान्ताच्चायःशलाकाभ्रमणमपि भवेन्नेच्छया किञ्चिदेषां
वस्तूनां शक्तिरेषा त्रिभुवननिलये निर्मिता केनचिन्न १७०
यद्यात्मा सर्वगः स्यादनुभवति कथं बन्धुविश्लेषदुःखं
नित्यश्चायं यदि स्यान्मदनशरहतोऽवस्थतां किं प्रयाति ।
यद्यासीत् सक्रियश्च व्रजति कथमिमां मूढतां सुप्तकाले
एवं वै सर्वगः स्याद्विभुरपि च पुरा सक्रियोऽयं न चात्मा १७१
नास्त्यात्मासंभवो नास्त्यशुभशुभफलं चास्ति कर्ताविहीनं
गन्ता नास्त्यस्ति मोक्षाय[१५] गमनमखिलं चास्ति बन्धो नबुद्धः ।
भावोऽभावोऽपि चास्ति क्षणिकविरहितो निःस्वभावो भवोऽस्ति
एतन्मे सत्यवाक्यं सुरफणिवचनैः संग्रहैर्हन्यते न ।।१७२।।

---

चकुलं [४] के. °पञ्च° [५] ने. °कार्ये [६] ने. फा° [७] ने. शूक्ष्मां [८] ने. दुग्धंप्रिपानां [९] ने. °म्यः [१०] ने. °शाङ्गं [११] ने. सच्छिवत्वं
[१३] ने. न च [१४] ने. पठेति [१५] ने. मोक्षो

यस्तत्त्वं पुद्गलाख्यं वदति तनुगतं तत्स्वभावात् स्वनष्टः
संवृत्या चार्थवादीत्यविदितपरमार्थो ह्यसन्मन्यमानः ।
विज्ञानं मन्यमानस्त्रिभुवनसकलं चैव विज्ञानवादी
योऽनष्टो[1] नष्टपक्षः स भवति करुणाशून्यताज्ञानवादी १७३
यन्त्रः[2] पूर्वाणि कर्माण्यनुभवति कृतान्यैहिकान्यन्यजात्या
यद्येवं कर्मनाशो न हि भवति नृणां जातिजात्यन्तरेण ।
संसारान्निर्गमः स्यादपरिमितभवैर्नैव मोक्षप्रवेश
एतद्धे तायिनां तु प्रभवति हि मतं चान्यजातिप्रहीनम् १७४
भूतैर्यद्येकभूतैः प्रभवति मदिरा शक्तिवत्साक्षिचित्तं
वृक्षाणां किं न हि स्यात् क्षितिजलहुतभुग्मारुताकाशयोगात् ।
नास्त्येषां जन्तुशक्तिस्त्वथ परममृषा भूतसंयोगशक्तिर्
एतच्चार्वाकवाक्यं न हि सुखफलदं मार्गनष्टं नराणाम् १७५
जीवः कायप्रमाणो यदि करचरण[3]च्छेदनान्नश्यते किं
नित्यं कार्य[4]प्रभावादणुरपि च भवेत् स्थूलतां स प्रयाति ।
संसारात् कर्ममुक्तो व्रजति सुखपदं यत् स्थितं लोकमूर्ध्नि
त्रैलोक्यं चाणुभिर्यद्रचितमपि सदा शाश्वतं तन्न कालात् १७६
इत्यादिज्ञानहेतोः प्रकटयति महौ देशनां कालचक्रः
पुंसां चित्तानुसारां मृदुकठिनपरां वासनाया बलेन ।
चित्तं वै भावरागैः स्फटिकवदुपधाद्रागतां याति यस्मात्[5]
तस्माद्धर्मो न कश्चित् स्वपरकुलगतौ योगिनां दूषणीयः १७७
धर्मः सत्त्वोपकारो विषयविरहितश्चापकारोऽप्यधर्मो
हिंसा वेदप्रमाणान्न हि सुखफलदा दुःखदा सर्वकालम् ।
सन्मैत्री मूर्खवाक्यात् परमसुखकरा सर्वसत्त्वानुरक्ता
तस्मात् सत्त्वार्थमेकं कुरु नृप मनसा भावना निःस्वभावम्
॥१७८॥
इन्द्रोऽहं स्वर्गलोके त्रिदशनरगुरुर्भूतले चक्रवर्ती
पाताले नागराजा फणिकुलनमितः सर्वगश्चोत्तमोऽहम् ।
ज्ञानं बुद्धो मुनीन्द्रोऽक्षरपरमविभुर्योगिनां वज्रयोगो
वेदोङ्कारः पवित्रो व्रज मम शरणं सर्वभावेन राजन् ॥१७९॥
त्वं माता त्वं पिता त्वं जगति गुरुरपि त्वं च बन्धुश्च मित्रं
त्वं नाथस्त्वं विधाता हि त्वमघहरणं[6] त्वं पदं संपदां च ।
त्वं कैवल्यं पदं[7] त्वं वरगुणनिलयो ध्वस्तदोषस्त्वमेव
त्वं दीनानाथ चिन्तामणिरपि शरणं त्वां गतोऽहं जिनेन्द्र १८०

**इति श्रीमदादिबुद्धोद्धृते श्रीकालचक्रे**
**अध्यायत्मनिर्णयो नाम पटलो द्वितीयः ॥**

देहे विश्वस्य मानं दिननिशिसमयो माससंक्रान्तिभेदा
नाडीनां सूक्ष्मसंख्या प्रकृतिषु[8] पुरुषस्तीर्थिकानां मतं च ।
वेदः कर्तादिभेदः श्रुतमिति हि मया मण्डलं देशनीयं
श्रुत्वा सौचन्द्रवाक्यं प्रवदति सुगतो मण्डलं कालचक्रम् १
आदौ संसेवनीयो गुरुरपि समयी वज्रयानाधिरूढस्
तत्त्वध्यायी त्वलुब्धो व्यपगतकलुषः क्षान्तिशीलोऽध्ववर्ती ।
शिष्याणां मार्गदाता नरकभयहरस्तत्त्वतो ब्रह्मचारी
माराणां वज्रदण्डः स च धरणितले वज्रसत्त्वः प्रसिद्धः २
मानी क्रोधाभिभूतः समयविरहितो द्रव्यलुब्धोऽश्रुतश्च
शिष्याणां वञ्चनार्थी परमसुखपदे नष्टचित्तो न सिक्तः ।
भोगासक्तः प्रमत्तः स कटुकवचनः कामुकश्चेन्द्रियार्थं
शिष्यैः संबोधिहेतोर्नरकमिव बुधैर्वर्जनीयः स एव ॥३॥
गम्भीरोदारचित्तो गुरुनियमरतस्त्यागशीलो गुणज्ञो
मोक्षार्थी तन्त्रभक्तोऽप्यचपलहृदयो लब्धतत्त्वोऽतिगुप्तः ।
दुष्टानां सङ्गनष्टः सुनिपुणगुरुणा ग्राह्यशिष्यः स एव
प्रज्ञासेकादिहेतोरपर इति पुनर्मध्यमः पुण्यहेतोः ॥४॥
चैत्रान्ते श्वेतपर्वे परहितगुरुणा मण्डलं वर्तयित्वा
देयाः सप्ताभिषेकाः कलुषमलहराः पुण्यहेतोः सुतानाम् ।
पूजा वै योगिनीनां सकलगुणनिधेर्देशनाया निमित्तं
पूजाभावेऽब्दमेकं न हि भवति गुरोर्देशना तन्त्रराजे ॥५॥
सेकार्थं भूपरीक्षां वनपुरनिगमे ग्रामके दिग्विभागं
ज्ञात्वाचार्यः समस्तं त्वशुभशुभफले शान्तिकाद्यं प्रकुर्यात् ।
कुण्डानां लक्षणं वै सकलसरजसां होमकीलादिकानां
शिष्याणां संग्रहं यत् परमजिनपतेर्मण्डलालेखनं च ॥६॥
भूमेर्जातिश्चतुर्धा भवति गुणवशाच्छूद्रविड्राजविप्रा
कृष्णा पीता च रक्ता शशधरधवला वर्णतो वेदितव्या ।
पूतिक्षाराब्जगन्धा भवति वसुमती दिव्यगन्धा क्रमेण
अम्लाक्षारा च शूद्री समधुरकटुके विट्नृपेऽन्या द्विजातिः ७
श्वेताशान्तौ च पुष्टौ भवति घननिभा मारणोच्चाटने च

रक्ताकृष्टौ च व
सर्वस्मिन् कर्मभा
सर्वस्वादा च ग
ऐशान्यां चोत्तरे
आग्नेय्यां पूर्वभा
नैर्ऋत्यां दक्षिण
वायव्यां पश्चिमे
कुण्डं ग्रामाष्टदि
अर्धेन्दुं पञ्चकोण
षट्कोणं चाष्टक
पद्मं चक्रं च कर्त्री
एकद्व्यर्धेकहस्तं
अर्धांशा षड्विभ
ओष्ठश्च[10]चिह्न
वेदीबाह्येऽब्जपत्र
वज्रं वा सर्वकर्म
न्यग्रोधाश्वत्थका
एवं स्फाटिक्यकु
ताम्राख्या हेमकु
वृत्ता द्व्यष्टाङ्गु
षड्ग्रीवाष्टाङ्गुल
पूर्वाह्णादष्टयाम
एवं तत्रार्धयामै
मध्याह्नं चार्धरा
लग्नं क्रूरग्रहस्थं
सक्षीराः शान्ति
विद्वेषे काकपिच्छ
बिल्वोन्मत्तार्धहस
क्षीराज्यासृग्वसा
दुर्वासस्यं च मां
बिल्वं निर्माल्यम
याम्ये नैर्ऋत्यके
आचार्यस्यासनं

---

१ ने. यो नष्टो    २ ने. यन्त्र°    ३ ने. °णा°    ४ ने. काय°    ५ ने. यस्या    ६ ने. तम°    ७ ने. पद
१० ने. ओष्ठे

रक्ताकृष्टौ च वश्ये वरकनकनिभा स्तम्भने मोहने च ।
सर्वस्मिन् कर्मभागे भवति हि हरिता पञ्चमी चान्त्यजातिः
सर्वस्वादा च गन्धा सकलगुणनिधिर्योगिना वेदितव्या ।।८।।
ऐशान्यां चोत्तरे वै भवति भुवि तले शान्तिकं पौष्टिकं[९] च
आग्नेय्यां पूर्वभागे प्रकटितनियतं मारणोच्चाटनं च ।
नैर्ऋत्यां दक्षिणे च स्फुटमपि गदितं वश्यमाकर्षणं च
वायव्यां पश्चिमे वै परमनरपते स्तम्भने मोहनं च ।।९।।
कुण्डं ग्रामाष्टदिक्षु प्रभवति नियतं वर्तुलं चाब्धिकोणे
अर्धेन्दुं पञ्चकोणं प्रकृतिगुणवशात् सप्तकोणं त्रिकोणम् ।
षट्कोणं चाष्टकोणं भवति कुलवशाद्गर्भचिह्नं च तेषां
पद्मं चक्रं च कर्त्री त्वसिरिषुरिति वज्राङ्कुशः शृङ्खला हि १०
एकद्वयर्धैकहस्तं खयुगखनयनं खाग्निखर्त्वङ्गुलं स्याद्
अर्धांशा षड्विभागाद्वरुणरविविभागेन खानिश्च वेदी ।
ओष्ठश्च[१०]°चिह्नावलीस्यादुपरिकुलवशाद्वेदिकायाः समन्ताद्
वेदीबाह्येऽब्जपत्राण्यपि कुरु नृपते शान्तिपुष्टयोर्न चान्ये ११
वज्रं वा सर्वकर्मस्वपि भवति महौ कीलकं चाष्टभेदं
न्यग्रोधाश्वत्थकास्थीन्न...यसखदिरं भूतबिल्वार्कजं च ।
एवं स्फाटिक्यकुम्भा वररजतमयाः श्रीकपालायसाश्च
ताम्राख्या हेमकुम्भाः प्रकटितनियता दारुजा मृण्मयाश्च १२
वृत्ता द्वयष्टाङ्गुलोक्ता द्विगुणितदशकेनोच्छ्रिताद्वयङ्गुलोष्ठाः
षड्ग्रीवाष्टाङ्गुलास्याः शशधरधवलाः शान्तिपुष्टयोर्न चान्ये।
पूर्वाह्लादष्टयामाः प्रतिदिनसमये शान्तिपुष्टयादिके स्युर्
एवं तत्रार्धयामैर्दिननिशिसमये चाष्टकर्म प्रकुर्यात् ।।१३।।
मध्याह्नं चार्धरात्रं दिननिशिसमये शान्तिके वर्जनीयं
लग्नं क्रूरग्रहस्थं मरणभयकरं तद्वदेवं प्रसिद्धम् ।
सक्षीराः शान्तिपुष्टयोः शरशतसमिधो मारणे मानुषास्थि
विद्वेषे काकपिच्छान्यपिचखदिरजाः किंशुकाकृष्टिवश्ये १४
बिल्वोन्मर्तार्धहस्ताः शरशतगणना स्तम्भने मोहने च
क्षीराज्यासृग्वसा स्वेदकुलिशसलिलश्लेष्ममद्यादिहोमे ।
दुर्वासस्यं च मांसं सविषमपि तथा राजिका रक्तपुष्पं
बिल्वं निर्माल्यमाला सुकनककुसुमान्येव शान्त्यादिकेषु १५
याम्ये नैर्ऋत्यकोणे सवरुणपवने यक्षरुद्रेन्द्रवह्नौ
आचार्यस्यासनं वै भवति नरपते शान्तिकर्मादिके च ।

---

[६] ने. तम°  [७] ने. पद  [८] ने. प्रकृति च  [९] ने. पु°



रङ्गं कर्मद्वये स्यादपि भुवि कमले श्वेतकृष्णार्कपीतं
बाह्ये बुद्धप्रभेदैः सुरयमवरुणेषूत्तरे रङ्गभूमिः ।।१६।।
कुण्डे वा मण्डले वा भवति कुलवशाद्रङ्गपातश्च दिक्षु
न्यासाद्यं प्रोक्षणाद्यं स्वहृदयकुलिशोत्सर्जनं देवतानाम् ।
स्फाटिक्याद्यर्घपात्रे वसुदलकमलं द्वादशाङ्गुष्ठकं च
दण्डाग्रेऽञ्जल्यपात्रं भवति च चुलुकं चाहुती होमकार्ये १७
शान्ता क्रूरा सकामा भवति कुलवशाद्देवता स्तब्धमूर्ति
एवं कर्मद्वये स्यात् प्रकटितनियतो मण्डले चाधिदैवः ।
पञ्चाकारो नरेन्द्र त्रिविधभगवतः स्कन्धधात्वादिभेदैः
पञ्चाकारं हि तस्मादपि[१] भवति रजो मण्डले देवतानाम्
।।१८।।
सूत्रं हस्ताष्टकं स्याद्भवति करयवैकेन वृत्तं त्रिवृत्तम्
आचार्याङ्गुष्ठकेन त्रिविधपथगतं सूत्रमेकं न चान्यत् ।
पर्यङ्कः शान्तिकादौ क्रमपरिरचितं वज्रदैत्योत्कटं च
पर्यङ्कार्धं द्विभेदं गुदगतचरणं चासनं कर्मभेदः ।।१९।।
स्फाटिक्यैर्मौक्तिकैर्वा नरखरदशनैर्वास्थिभिः पुत्रजीवैः
पद्माख्येशाक्षि[२]रिष्टैः सुगतकुलवशान्मन्त्रजापेऽक्षसूत्रम् ।
सौगन्धैः श्वेतपुष्पैः सकटुककषणैरर्चनं रक्तपीतैः
शीतो विण्मांसधूपो मधुरुधिरयुतोऽप्युग्रधूपः कषायः ।।२०।।
यन्त्रं न्यग्रोधपत्रे चिति मृतकपटे बाहुपत्रेऽर्कपत्रे
श्रीखण्डैः शालिपिण्डैश्चितिभुवनगताङ्गाररक्तैर्विषेण ।
काश्मीरै रक्तशीतैस्त्रिफलरसनिशा तालकैर्लेखनं स्याद्
दूर्वा शीतास्थिपिञ्जा कनकखदिरजा लेखनी बिल्वजार्का२१
मृन्मन्दे श्रीकपाले त्रिमधुनि रुधिरे सिक्थवेष्टेऽष्टमध्ये
सार्द्रस्थाने पवित्रे चितिभुवनतले चाग्निचापे धरण्याम् ।
यन्त्रस्यारोपणं स्यादशुभशुभवशान्मन्त्रिणा वेदितव्यं
चन्द्रेभे प्रेत उष्ट्रे मृगतुरगपशौ कूर्मदेहे क्रमेण ।।२२।।
श्रीवज्रैः सर्वदिक्षु स्थिरमपि सकलं निर्दहेन्मारवृन्दं
पश्चाच्चक्रे दशारे दिशि विदिशि गतं भावयेत् क्रोधवृन्दम् ।
क्रोधेन्द्रं चक्रमध्ये द्वयधिकजिनकरं वज्रवेगं युगास्यं
तस्माद्यत्किञ्चिदिष्टं गुरुनियमयुतं साधकैः साधनीयम् २३
त्रिप्राकारांस्त्रिवज्रैर्महिवलयगतान् दूरदृष्टयावसाने
प्रातश्छायावसाने क्षितितलनिलयादम्बरे वज्रकूटम् ।
मध्येऽब्जं सूर्यहस्तं भवति युगकरा कर्णिका सासना च

---

[१] ने. °दभि  [२] ने. °शांक्ष°  [३] ने. बोधि°  [४] ने. °शं  [५] ने.

ृष्णार्कपीतं
ूमिः ।।१६।।
पातश्च दिक्षु
नं देवतानाम् ।
ङ्गुष्ठकं च
हुती होमकार्ये १७
ता स्तब्धमूर्ति
ो चाधिदैवः ।
धात्वादिभेदैः
मण्डले देवतानाम्
।।१८।।
ृत्तं त्रिवृत्तम्
न चान्यत् ।
दैत्योत्कटं च
र्मभेदः ।।१९।।
भिः पुत्रजीवैः
त्रजापेऽक्षसूत्रम् ।
रक्तपीतैः
धूपः कषायः ।।२०।।
ोऽर्कपत्रे
ाररक्तैर्विषेण ।
ळकैर्लेखनं स्याद्
खनी बिल्वजार्का २१
थवेष्टेऽष्टमध्ये
चापे धरण्याम् ।
णा वेदितव्यं
क्रमेण ।।२२।।
र्दहेन्मारवृन्दं
भावयेत् क्रोधवृन्दम् ।
त्रवेगं युगास्यं
धकैः साधनीयम् २३
दृष्टयावसाने
रे वज्रकूटम् ।
गका सासना च

आत्मानं तस्य मूर्ध्नि व्यपगतकलुषं योगिना भावनीयम् २४
भूमेर्दिक्षु त्रिवज्रैः प्रथममपि बलिं क्षेत्रपालाय दत्त्वा
पश्चाद्वज्रैश्चतुर्भिर्दिशि विदिशि गतं निर्दहेन्मारवृन्दम् ।
भूमिं चावाहयित्वा ससलिलकुसुमैरर्घमस्यै प्रदेयं
पश्चाच्छुद्धिं यथेष्टां कुरु भुवि निलये प्रार्थयित्वा तु तां च २५
देवि त्वं साक्षिभूत्वा सुरपतिसहिते मारभङ्गे जिनस्य
तस्मात्त्वं पूजनीया सुरवरनमिते गृह्ण गृह्णार्घकं मे ।
भग्नं मारस्य सैन्यं प्रबलमपि यथा बोध[3]हेतोर्जिनेन
शिष्याणां सेकहेतोरहमपि च तथा मारनाशं करोमि ।।२६।।
ये बुद्धाः सर्वदिक्षु व्यपगतकलुषा बोधिसत्त्वाः समस्तास्
ते मां वै पालयन्तु परमकरुणया मण्डले सेकहेतोः ।
तानेवाध्येष्य सर्वान् दृढखदिरमयैः कीलकैः कीलयेत्
क्ष्मां दिक्क्रोधान् दिग्विभागे प्रहरणसहितान् विन्यसेद्
रक्षणार्थम् ।।२७।।
शल्यं साङ्गारशृङ्गे मरणभयकरं भूमिगर्भे निविष्टं
तस्मिन्स्थाने विनाशो भवति गुणवशाच्छोधनीयं हि तस्मात् ।
रत्नं शङ्खश्च काचो विजयसुखकरो मण्डलार्थं हि भूमौ
प्रासादार्थं गृहार्थं प्रकटितनियतश्चात्र योगादिहेतोः ।।२८।।
पूर्णायां भूमिशुद्धिर्ग्रहणमपि तथा संग्रहः पुत्रकाणां
द्वादश्यां सूत्रपातो मदनमनुदिने श्रीरजः पात एव ।
सेकाद्यं[4] पूर्णिमायां ददति वरगुरुर्मारभङ्गे दिने च
तस्मिन् रात्रौ प्रतिष्ठा भवति जिनकुले नान्यरात्रौ प्रतिष्ठा
।।२९।।
अन्ये नक्तं प्रतिष्ठा भवति नरपते शुद्धलग्नैर्ग्रहाद्यैर्
जीवे शुभ्रेऽस्तमेते न हि भवति तदा वै विवाहः प्रतिष्ठा ।
ज्ञात्वाचार्यः समस्तं क्षितितलनिलये लोकलोकोत्तरं च
यद्यत्कार्यं करोति प्रभवति हि शुभं तत्तदेवं समस्तम् ३०
कृत्वा शिष्यस्य रक्षां शिरसि हृदि तथोष्णीषनाभौ च[5] कण्ठे
श्रीगुह्येऽब्दे जिनाद्यैरुभयकुलगतैः कायवाक्चित्तवज्रैः ।
एवं लेखादिकानां प्रकटित[6]नियतैः श्रीस्वरैः पुस्तकानां
सत्त्वानां मोक्षहेतोरमुकमपि विभोर्मण्डलं वर्तयामः ।।३१।।
शुद्धे स्थाने सुपूर्णे सुसमविरचिते कूर्मपृष्ठोन्नते च
एकादौ हस्तमाने युगवसुनृपसाहस्रमेव प्रमाणे ।
सूत्रं वज्रं रजो वै सुरयमवरुणे चोत्तरे वज्रघण्टां
दत्त्वा लब्धे निमित्ते प्रथमपरदिशं मण्डलं वर्तनीयम् ।।३२।।
छिन्ने सूत्रे गुरोश्च क्षतिरपि परिघालङ्घने पुत्रकाणां
वातोद्धूतं रजश्चेत् प्रकटयति भयं राजभङ्गं च राष्ट्रे ।
तद्दृष्ट्वा दुर्निमित्तं पुनरपि च विभोर्मन्त्रजापं प्रकुर्याद्
भूयो लब्धे निमित्ते समविषमपदैः सूत्रपातो विधेयः ।।३३।।
प्रज्ञोपायाङ्गमध्ये भवति स परिघो मण्डले वर्जनीयो
भूमौ संग्रामकाले शिखिपवनगतः सैन्यमध्ये फणीव ।
संग्रामे सैन्यनाशो भवति भुवि तले त्वङ्कयुद्धे प्रहारस्
तस्माद्युद्धे च सेके त्वभिबलपरिघो मन्त्रिणां वेदितव्यः ३४
आद्यैः काद्यैः सवज्रैः सुहृदयकमले चन्द्रसूर्याग्निमूर्ध्नि
ध्यात्वा श्रीकालचक्रं शशधरमदना क्रान्तमालीढपादम् ।
प्रज्ञाभर्त्रा हृदब्जे सरविशशिपुटे स्वस्ववज्राङ्कुशेन
बुद्धानां कृष्यदेवी रजसि समरसा न्यस्तसूत्रे च भाव्याः ३५
सूत्रं वै ब्रह्मसूत्राद्रसनवतिरिदं[7] दिग्विभागे प्रदेयं
सूत्रैरर्धाङ्गुलोक्तैर्भवति वसुयुगैर्मण्डलं गर्भमध्ये ।
गर्भाद्बाह्ये समस्तै रचितमपि महामण्डलं द्वारसीम्नः
प्राकारांस्तोरणाद्यं शिखिचलवलयं दर्शयेद्बाह्यभूम्याम् ३६
चक्रं वाब्जं[8] हि भर्तुस्त्रिगुणमपि भवेद्देवताद्यासनानां
ब्रह्मस्थानेऽर्ककोष्ठैः पुनरपि शशिना स्तम्भवज्रावली स्यात् ।
बुद्धाद्यब्जं चतुर्भिः प्रभवति शशिना बाह्यवज्रावली च
देवी बुद्धान्तराले भवति घटकपालासनं वा त्रिकोष्ठैः ३७
तत्र स्थानाद्रङ्गभूमिर्भवति दिनकरैश्च त्रिरेखं हि यावद्
दिक्कोणेष्वब्धिकोष्ठैः शशिरविकमलान्येव गन्धादिकानाम् ।
सार्धैकेन त्रिरेखं त्वृतुभिरपि रसैर्द्वारनिर्यूहकाश्च
तद्वत्पक्षं कपोलं[9] त्रिभिरपि च महावेदिका स्तम्भमर्धम् ३८
तस्यार्धे नैव कालैर्भवति मणिमया पट्टिकाद्वारभूमिः
सस्तम्भं तोरणं स्यात् त्रिगुणितदशभिर्द्वारमूलादितश्च ।
सूत्रार्धं मूर्ध्नि वर्ज्यं प्रभवति बकुली चार्धहारावसाने
षट्कोणे तोरणार्था वसुकमलयुता पट्टिका योगिनीनाम् ३९
तस्माच्छ्रीरङ्गभूमी रसगुणितयुगैः पञ्चरेखां हि यावद्
दिक्कोणेष्वर्कपद्मं त्रिगुणमनुदलं सूर्यकोष्ठैः प्रकुर्यात् ।
गर्भद्वारं त्रिगुण्यं त्रिविधगुणवशाद् द्वारमप्यत्र बाह्यं
प्राकाराद्यं तथैव त्रिवलयरचनां त्र्यष्टकैश्च प्रकुर्यात् ४०
तेषामाद्यं तु भागे रविशशिनिलयं बाह्यवज्रावली च

---

बोधि° [4] ने. °शं [5] ने. °णाभौ [6] ने. प्रभवति [7] ने. °रियं [8] ने. चा° [9] ने. कपालं

कुर्यात् कोष्ठैस्तदर्धैर्यदनिलवलये मण्डलान्ते च चक्रम् ।
स्तम्भाधो मण्डलं च प्रभवति फणिनां स्यन्दनं देवतीनां
सूर्येश्च द्वारमध्ये नभसि भुवि तले पूर्वभागेऽपरे[1] च ।।४१।।
वज्राद्यैः पञ्चरत्नैः कनकमरकतैर्वि[2]द्रुमैर्मौक्तिकाद्यैः
सव्यैर्वा पञ्चवेदैर्बहुविधमणिभिः पिष्टरङ्गैस्तथैव ।
दिग्भागे रङ्गभूमौ भवति नृप रजःपातनं बुद्धभेदैः
पीतैः श्वेतारुणाद्यैः क्षितिजलवलये वह्निवाय्वोः क्रमेण ४२
पूर्वे श्रीकृष्णभूमिर्भवति रविनिभा दक्षिणे पश्चिमे च
हेमाभा चोत्तरेऽन्या शशधरधवला वज्रिणो वक्त्रभेदैः ।
श्वेता कृष्णा च रक्ता क्रमपरिरचिता पट्टिका हारभूमिः
पद्मानीन्द्रर्कवर्णैरमलशशिनिभा रक्तकृष्णा त्रिरेखा ।।४३।।
मध्ये पद्माष्टपत्रं हरितमणिनिभा स्तम्भवज्रावली स्याद्
ईशे दैत्येऽग्निवाय्वोः शशिरविवपुषौ[3] कृष्णपीतौ क्रमेण ।
शङ्खो गण्डी मणिश्च क्रम इति हि तथा श्वेतकुम्भाष्टसन्धौ
चन्द्रो रक्ताब्जमूर्ध्नि प्रवर दिनसकृत् श्वेतपद्मस्य चोर्ध्वम्४४
रक्ताब्जे दैवतीनां भवति शशधरश्चासनं कर्णिकायां
श्वेताब्जे कर्णिकायां भवति दिनकरो देवतीनां च दिक्षु ।
बाह्ये वज्रावली स्याद्विभुकमलवशाद्वेदिका श्वेतवर्णा
पीता स्तम्भा हिमाभा प्रभवति बकुली तोरणं विश्ववर्णम्४५
श्वेताभा योगिनीनामपि वसुकमला पट्टिका सर्वदिक्षु
दिग्भागे रक्तपद्मं भवति जिनवशात् श्वेतपद्मं हि कोणे ।
चन्द्रादित्यैर्विहीनं द्विगुणमनुदलं चामराणां तथैव
खाद्या या पञ्चरेखाः प्रकृतिगुणवशात्तास्त्रिभागान्तरस्थाः
।।४६।।
स्तम्भाधो द्वारसन्धौ प्रभवति फणिनां मण्डलं मारुताद्यम्
ऐशान्ये दैत्यकोणे क्षितिवलयगतौ चन्द्रसूर्यौ नरेन्द्र ।
बाह्ये द्वारोर्ध्वभागे समृगमपि भवेद्धर्मचक्रं घनाभं
सव्ये रक्तो घटः[4] स्यात् सधनदवरुणे दुन्दुभिर्बोधिवृक्षः ४७
घण्टादर्शा पताकाः शशधरधवलास्तोरणा लम्बमाना[5]
हारार्धः श्वेतवर्णो भवति कुलवशात् स्यन्दनो द्वारमध्ये ।
चक्रं श्वेतं च रक्तं स्वजिनकुलवशान्मारुते द्वारबाह्ये
वज्रज्वाला स्फुरद्भिर्भवति नरपते बाह्यवज्रावली च ४८
स्थूला व्याधिं करोति प्रकटयति कृषा द्रव्यहानिं कुरेखा

छिन्ना मृत्युं च वक्रा सनृपजनपदोच्चाटनं तद्वदेव ।
चिह्ने चिह्नेऽर्कचन्द्रे भवभयमथनी मन्त्रिणां नास्ति सिद्धिर्
गोत्रच्छेदो विमिश्रे रजसि जिनकुलैर्मण्डले वेदितव्यः ४९
यन्त्रोक्तं तन्त्रमध्ये प्रकटमपि जिनैर्मण्डले तन्न देयं
चिह्नं शोभार्थहेतोर्जिनजनककुले मारचिह्नं तदेव ।
तस्मात्तन्त्रोक्तचिह्नं भवति कुलवशान्मण्डले द्वारसीम्नो
हारार्धान्ते प्रकुर्यात्क्षितिवलयतले पद्मकुम्भादिशोभाम् ५०
कृष्णादेः पादवृद्धया भवति च रजसः प्रोन्नतिर्वै यवैकात्
प्राकाराणां त्रिगुण्या दिनकरशशिनो वक्ररेखा द्विगुण्याः ।
गर्भाद्बाह्ये द्विगुण्या भवति नरपते प्रोन्नतिर्मण्डलेऽस्मिन्
हारार्धा ते यवैका क्षितिजलहुतभुग्वायुवज्रावलीषु ।।५१।।
गर्भाद् द्वारादिसीम्नो भवति वसुमतीमण्डले लोकधातोर्
द्वारेभ्यश्चर्चिकान्तं त्रिगुणफणिपुरैः क्षाररत्नालयः स्यात् ।
तस्माज्जैनेन्द्रकोष्ठैरपि शिखिवलयं वायुरेवं ततः स्यात्
तद्बाह्ये तद्विशुद्धया क्षितिजलहुतभुग्मारुता दर्शनीयाः ५२
उष्णीषं वक्त्रकण्ठं त्रिगुणफणिपुरैर्मण्डले शोधनीयं
तस्मान्मेरुः समस्तस्त्रिगुणफणिपुरैर्मेदिनी यावदेव ।
षट्षट्कोष्ठैः क्रमेण स्फुटमहिभुवनं सप्त पातालमेव
एवं भूम्यादि सर्वं पुनरपि च तथा शोधनीयं स्वदेहे ।।५३।।
द्वयब्ध्येकाब्ध्येकसूर्ये ऋतुरसशिखिनो[6]ऽग्न्यर्धकालार्धकालैः
कालैः कालप्रभिन्नैर्ऋतुभिरपि रसैर्दोषभागैः क्रमेण ।
गर्भाद्वा कर्णिकाद्वाब्जदलमपि ततः स्तम्भवज्रावली च
पद्मं वज्रावली स्यात् क्षितिरपि च ततो द्वारनिर्यूहकाद्यम् ५४
स्तम्भाः प्राकारवेद्यः पुनरपि च ततः पट्टिकाहारभूमिर्
आदर्शः क्ष्मा च पट्टी भवति नरपते तोरणं प्रोक्तभागैः ।
बाह्ये द्वारादि सर्वं द्विगुणमपि भवेत्तद्द्विगुण्यं च बाह्ये
बाह्ये पद्मानि चक्राण्यपि च दिनकरैः स्यन्दनं मण्डलानि ५५
ॐकारज्ञानजाते जिनवरकमले चन्द्रसूर्यासनोर्ध्वम्
आद्यैः काद्यैः सशून्यैस्त्रिभुवनजननी मातृका स्थापनीया ।
शून्येऽकारे विसर्गे स्वररहितपरे कायवाक्चित्तवज्रं
संभूतं मन्त्रयोनिं परमसुखकरं ज्ञानवज्रं चतुर्थम् ।।५६।।
हुंकारो विश्ववर्णो जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि
दिक्पत्रेष्वादिशून्यं विदिशि च दलके हादिशून्यं चतुर्धा ।

ईशे नैर्ऋत्यकोणे शि
ह्रीकाराद्यं घटानां
पूर्वाब्जोर्ध्वे त्विकारः
याम्ये दैत्ये त्वृकारो
वारुण्ये बाह्य[8]कोणेऽ
कृष्णौ रक्तौ च शुक्ल
पूर्वद्वारस्य सव्ये शि
तद्वच्चाऽर्कारयुग्मं य
ओ औ यक्षे[11] च रु
अं अश्चाद्याः क्रमेण
पूर्वद्वारेऽवसव्ये भवति
सूर्यः सव्येऽपरे च प्र
प्रज्ञोपायप्रभेदैर्भवति
सव्ये पृष्ठे रविः स्या
बिन्द्वाकारैर्विभिन्नं
कन्दे नाले दले च क्र
भूम्याद्यं चास्वरान्तं
बिन्दुश्चन्द्रो विसर्गो
यद्वर्गा ह्रस्वदीर्घाः प्र
गन्धादीनां क्रमेण स्व
बाह्ये बिन्द्वादिभिन्न
सर्वेऽब्जानां समन्तात
ह्रस्वौ दीर्घौ हकारौ
वैष्णव्यादेः क्षकारः
ह्याद्याः क्षाद्यास्तु सं
याद्याः षड् ह्रस्वदीघ
एवं याम्ये च राद्या
यक्षे रुद्रे च राद्याः
पूर्वद्वारस्य सव्ये कम
ह्रस्वो दैत्यस्य दीर्घो
एवं याम्ये टवर्गः शि
वामे चेशे पवर्गो भ
शक्रस्य ब्रह्मणो वै स

[1] ने. °भागे परे [2] ने. °द्वि° [3] ने. °वपुषो [4] ने. घनः [5] ने. °माला [6] ने. °शशिनो [7] ने. ऊकार [8] ने. वायु° [9] ने. दे
[12] ने. °सनश्च [13] ने. स्वरमकर°

ईशे नैर्ऋत्यकोणे शिखिनि च पवने कायवाक्चित्तरागं
ह्रीकाराद्यं घटानां भवति च दशकं हूं ह इत्यत्र चान्ते ५७
पूर्वाङ्गोर्ध्वे त्विकारः शिखिकमलगतो दीर्घ ईकार[७] एव
याम्ये दैत्ये त्वृकारौ धनदहरगतौ ह्रस्वदीर्घौ ह्युकारौ ।
वारुण्ये बाह्य[८]कोणेऽपि च कमलगतौ ह्रस्वदीर्घावृकारौ
कृष्णौ रक्तौ च शुक्लौ वरकनकनिभौ वक्त्रभेदेन देयौ[९] ५८
पूर्वद्वारस्य सव्ये शिखिकमलगतौ ह्रस्वदीर्घौ तथैव
तद्वच्चाऽर्कारयुग्मं यमदनुकगतं पश्चिमेऽल्कार[१०]युग्मम् ।
ओ औ यक्षे[११] च रुद्रे स्वरवरुणयमद्वारवामे सपक्षे
अं अश्चाद्याः क्रमेण त्वपि च यरवला द्वारपद्मे स्वरादौ ५९
पूर्वद्वारेऽवसव्ये भवति शशधरश्चासनं क्रोधयोश्च
सूर्यः सव्येऽपरे च प्रभवति कमलेष्वासनं च द्वयोश्च ।
प्रज्ञोपायप्रभेदैर्भवति हि कमलं चन्द्रसूर्यासनं च[१२]
सव्ये पृष्ठे रविः स्यात् सुरपतिधनदे चन्द्रमेवासनं स्यात् ६०
बिन्द्वाकारैर्विभिन्नं खलु कमलगतं कादिवर्गाक्षरं च
कन्दे नाले दले च क्रमपरिरचितं केशरे कर्णिकायाम् ।
भूम्याद्यं चास्वरान्तं कखगघङ इति ह्रस्वदीर्घः स्वभूमौ
बिन्दुश्चन्द्रो विसर्गो भवति दिनकरश्चासनं कर्णिकोर्ध्वम् ६१
यद्वर्गा ह्रस्वदीर्घाः प्रकृतिगुणवशाद्वेदिकास्तम्भपार्श्वे
गन्धादीनां क्रमेण स्वकुलभुविगताः पूर्वभागात् स्वदिक्षु ।
बाह्ये बिन्द्वादिभिन्नास्त्रिगुणितरविभिर्वेदिकायां तथैव
सर्वेऽब्जानां समन्तात् स्वकुलदिनगता वर्णभेदैर्जिनानाम् ६२
ह्रस्वौ दीर्घौ हकारौ सुरधनदपरे दक्षिणे चर्चिकादेर्
वैष्णव्यादेः क्षकारः शिखिहरपवने क्षादिभिन्नश्च दैत्ये ।
ह्याद्याः क्षाद्यास्तु संख्याः कमलदलगताः पूर्वपृष्ठेऽष्टदिक्षु
याद्याः षड् ह्रस्वदीर्घाः स्वरकमल[१३]दले वह्निपद्मे क्रमेण ६३
एवं याम्ये च राद्या दनुकमलदले ह्रस्वदीर्घप्रभेदैर्
यक्षे रुद्रे च राद्याः सजलधिपवने पद्मपत्रे च लाद्याः ।
पूर्वद्वारस्य सव्ये कमलदलगतो मातृभिन्नश्चवर्गो
ह्रस्वो दैत्यस्य दीर्घो भवति च पवनस्याग्निकोणे स्थितस्य ६४
एवं याम्ये टवर्गः शिखिरसमुखयोर्ह्रस्वदीर्घप्रभेदैर्
वामे चेशे पवर्गो भवति जलनिधिर्दीर्घभेदैर्गणस्य ।
शक्रस्य ब्रह्मणो वै सवरुणपवने ह्रस्वदीर्घस्तु वर्गः

...र  ८ ने. वायु°  ९ ने. देवौ  १० ने. °क्षार°  ११ ने. पक्षे



पूर्वद्वारस्य वामे भवति दनुरिपोः पद्मपत्रे कवर्गः ॥६५॥
ह्रस्वो दीर्घश्च सव्ये भवति नृप यमस्योत्तरे पश्चिमे च
ह्रस्वो दीर्घः सवर्गो भवति पशुपतेर्जम्भलस्यैव राजन् ।
दैत्यानां स्वस्वबीजं भवति न च दले स्वस्ववर्गान्तिमध्यम्
अष्टाविंशत्स्वपत्रेष्वपि दिवसवशात्स्वस्ववर्गाक्षराणि ॥६६॥
यारावालाश्च हूं हाः खलु षडपिरथेषूर्ध्वमूले स्वरादौ
द्वारात् सव्यावसव्ये प्रभवति फणिनां यादिरूढो हकारः ।
षड्वर्गाः कूटरूपास्त्वपि हयरवलाः क्षादियुक्ताश्च याद्या
दिक्चक्रे कादिवर्गाश्चलवलयगताश्चादयोऽन्येऽनुलोमाः ६७
पूर्वे याम्येऽवसव्ये वरुणहविदनौ चेशवायौ[१] क्रमेण
अं अश्चन्द्रार्कयोर्वै चितिभुवनगता भूतवृन्दस्य मन्त्राः ।
हूंकारो धर्मचक्रस्य च भवति तथाःकारबीजं घटस्य
ॐकारो दुन्दुभेः स्यात् प्रभवति वरुणे बोधिवृक्षस्य होश्च ६८
इत्येवं मातृकाया भवति कुलवशान्मण्डले मन्त्रभेदो
मुद्राचिह्नानि वर्णो भवति हि सकलं वज्रिणो वक्त्रभेदैः ।
कुण्डे होमं च तद्वद्भवति च पुनरावाहनं तीर्थिकानां
श्रीभूम्यां प्रोक्षणं चा[२]र्घविधिरपि तथा मारनिर्घाटनं च ६९
द्वाराणां रक्षणार्थं व्रतनियमयुताः शुद्धशिष्याः प्रदेया
योगिन्यः श्रीघटानां शिखिदनुपवने चेशकोणे क्रमेण ।
आचार्यः श्रीगणेशो भवति नरपते कर्मवज्री प्रहृत्य
शिष्याभावे गणेशः स्वयमपि कुरुते होमकर्मादिकं च ७०
वृत्तं वा वेदकोणं भवति कुलवशाच्छान्तिपुष्टयोश्च कुण्डं
वामे वा रुद्रकोणेऽपि च धवलमहौ मूलपद्मं द्विगुण्यम् ।
खानिः पद्मप्रमाणा भवति तदुदरे मूलपद्मं न[३] चिह्नं
पद्मार्धं पद्मबाह्ये सघटमपि भवेत् खड्गरत्नादिचिह्नम् ७१
तस्यार्धेनापि चोष्टं द्विगुणमपि ततो वेदिकायामभाग
ओष्ठार्धेनोच्छ्रूता वै प्रभवति नियता मूर्ध्नि वज्रावली च ।
बाह्येऽधः पद्मपत्राण्यपि कुशरचनां सर्वदिक्षु प्रकुर्यात्
तस्यान्ते पश्चिमेन प्रभवति नियतं द्वारमेकं त्रिरेखम् ७२
आचार्यस्यासनं वै खलु भवति समं गर्भपद्माद् द्विगुण्यं
वामे चार्घासनं स्याद्भवति नरपते होमपात्रस्य सव्ये ।
सर्वेषां वज्रचिह्नं भवति जिनपतेर्वा खपद्मं हि मातुर्
वक्त्रं गुह्यं च कुण्डं द्विविधमपि भवेद्बाह्यदेहे च राजन् ॥७३॥

१ ने. देश°  २ ने. वा°  ३ ने. च  ४ ने. °वह्नि  ५ ...
१२ ने. °ने°

ो कवर्गः ॥६५॥
तरे पश्चिमे च
लस्यैव राजन् ।
स्ववर्गान्तमध्यम्
वर्गाक्षराणि ॥६६॥
मूले स्वरादौ
ादिरूढो हकारः ।
दियुक्ताश्च याद्या
ोऽन्येऽनुलोमाः ६७
ौ[1] क्रमेण
ृन्दस्य मन्त्राः ।
बीजं घटस्य
धिवृक्षस्य होश्च ६८
े मन्त्रभेदो
ज्रिणो वक्त्रभेदैः ।
ं तीर्थिकानां
मारनिर्घाटनं च ६९
ाध्याः प्रदेया
कोणे क्रमेण ।
ज्री प्रहृत्य
कर्मादिकं च ७०
तपुष्टयोश्च कुण्डं
पद्मं द्विगुण्यम् ।
ाद्मं न[3] चिह्नं
रत्नादिचिह्नम् ७१
दिकायामभाग
ध्न वज्रावली च ।
दिक्षु प्रकुर्यात्
मेकं त्रिरेखम् ७२
पद्माद् द्विगुण्यं
ात्रस्य सव्ये ।
द्मं हि मातुर्
देहे च राजन् ॥७३॥

कृत्वा कुण्डस्य रक्षां दशदिशिवलये क्रोधराजैः सदैव्यैः
श्रीवज्रैः प्रोक्षणाद्यं ससलिलकुसुमैरर्घमेवानलस्य ।
देयं तद्योगयुक्तैः स्वहृदयकमले भावयेत्त्वेन्दुमूर्ध्नि
एकास्यं श्वेतवर्णं युगकरकमले कुण्डिकाब्जं हि वामे ॥७४॥
सव्ये दण्डाक्षसूत्रं सुकपिलजटिलं पिङ्गनेत्रं सवस्त्रं
वह्नेर्हृच्चन्द्रमूर्ध्नि स्फुरदमलकरं भावयेद्योऽङ्कुशं वै ।
तेनाकृष्टं स्वदेहे कुरुष्व समरसं सर्वगं ज्ञानसत्त्वं
एवं कुण्डे च सम्यग्भवति नृप तथावाहनं पावकस्य ॥७५॥
अङ्गुष्ठेन प्रकुर्यादपि वरदकरे होममग्नेर्मुखे च
वज्रैरङ्गैश्च भर्तुः शरशतसमिधात्सस्यदूर्वाज्यदुग्धैः ।
पर्यङ्कस्थः प्रशान्तस्त्वचपलहृदयो मन्त्रविन्मन्त्रमूर्तिर्
आचार्यः कर्मवज्री पुनरपि शिखिने चाहुतिं वै ददाति ७६
होमं कृत्वा क्रमेणाचमनमपि तथा पावकस्यात्मनश्च
दत्त्वा गन्धादिधूपं स्वहृदयकमले ज्ञानवह्नि[4] विसर्ज्य ।
पश्चाच्छिष्यस्य सेकं सकलगुणनिधिः श्रीगुरुर्वै ददाति
आदौ पञ्चामृतं वै जिनवरकुलिशाधिष्ठितं शुद्धिहेतोः ॥७७॥
सिद्धे होमे स्वमन्त्रै रजसि च पतिते मन्त्रचिह्ने प्रदत्ते
कोणे संस्थापनीयाः स्फटिकसितघटा वेष्टिताः पञ्चसूत्रैः ।
आचार्यः पूर्ववक्त्रः कुलिशकमलजैरुद्धृतैः क्रोधराजैर्
आकृष्ट्वा ज्ञानचक्रं रजसि समरसं सेकहेतोः करोति ॥७८॥
सर्वेषां नामपूर्वं प्रणव इति भवेद्देवतादेवतीनां
होमे स्वाहान्तमन्त्रो हृदयमपि तथैवार्च[5]ने वै[5] नमोऽन्तः ।
जँ हूं वँ होः[6] ङ्कुशाद्याः क्रमपरिरचितावाहने च प्रवेशे
बन्धे[7] तोषेऽर्घदाने भवति पुनरिदं गृह्ण गृह्णार्घकं मे ॥७९॥
पुष्टौ स्वाहान्तमन्त्रो भवति नरपते शान्तिकेऽसौ नमोऽन्तर्
आकृष्टौ वौषडन्तौ भवति च वषडन्तश्च वश्ये तथैव ।
हूंकारान्तोऽभिचारे प्रकृतिगुणवशात् कीलनाद्ये फडन्तः
श्वेतो रक्तश्च कृष्णो वरकनकनिभः कर्मभेदैश्च मन्त्रः ८०
पूर्वे श्रीचित्तवज्रं कषणघननिभं चोत्तरे कायवज्रं
वाग्वज्रं दक्षिणे च स्वकुलदिशि गतं पश्चिमे ज्ञानवज्रम् ।
श्वेतं रक्तं च पीतं भवति कुलवशाद्व्यापकं भूमिभागे
वाय्वग्न्यम्बुक्षितीनां इ ऋ उ ऌ नृपते योनयो देवतानाम् ८१
ॐ आः[8] हूं च त्रिमुद्राः स्वाहापदसहिता दीर्घभेदाच्च पञ्च

हूं आः ॐ होः स्ववक्त्राण्यपरमपि तथाऽनाहतं पञ्चमं स्यात् ।
साद्यं हूंकारषट्कं भवति रसपदैः श्रीषडङ्गं नमाद्यैः
फेंकारो विश्वमातुर्भवति दशविधः कूटमन्त्रो जिनस्य ८२
हूंकारो ज्ञानबीजं हृदयमपि महाकूटमन्त्राः सवक्त्रा
हूंकाराद्यं[9] षडङ्गं ह्युपहृदयमिदं कायवज्रादियुक्तम् ।
मालामन्त्रस्तथान्यो भवति बहुविधः कर्मभेदैरनेकैर्
ज्ञातव्यो मण्डलेऽस्मिन् प्रकृतिगुणवशाद्देवतादेवतीनाम् ८३
रत्नैर्हेमेन्दुपुष्पैर्बहुविविधपटैर्गन्धधूपप्रदीपैर्
घण्टादर्शैर्वितानैर्विविधफलपताकादिभिर्नृत्यवाद्यैः ।
कृत्वा पूजां विचित्रामपरदशविधां चात्मशक्त्या यथोक्ताम्
आचार्यस्यांघ्रिमूले ददति वरसुतो दक्षिणां शुद्धिहेतोः ॥८४॥
दत्त्वात्मानं त्रिशुद्ध्या ससुतदुहितरं कन्यकां गोत्रजान्यां
अद्यैवाहं जिनानां शरणमधिगतो रौद्रसंसारभीतः ।
युष्मत्पादाब्जयोर्वै भवभयहरयोः[10] कायवाक्चित्तशुद्ध्या
इत्यध्येष्यो गुरुः स्यात्सकनककुसुमैः मण्डलं कारयित्वा ८५
वज्रं घण्टां च मुद्रां गुरुमपि शिरसा धारयामीष्टवज्रे
दानं दास्यामि रत्ने जिनवरसमयं पालयाम्यत्र चक्रे ।
पूजां खड्गे करोमि स्फुटजलजकुले संवरं पालयामि
सत्त्वानां मोक्षहेतोर्जिनजनककुले बोधिमुत्पादयामि ॥८६॥
स्नातो गन्धानुलिप्तो व्रतनियमयुतः पूर्व[11]भूम्यां निवेश्य
सिद्ध्यर्थं दन्तकाष्ठं जिनवरकुलिशैश्चाभिमन्त्र्य प्रदेयम् ।
जिह्वायां चामृतं वै जिनवरसमयैर्धूपमावे[12]शनार्थं
मन्त्रं हूंकारमेकं त्वरलपिसहितं चोदनं क्रोधभर्तुः ॥८७॥
आविष्टः क्रोधराजः प्रहरणसुकरैस्तर्जयन् मारवृन्दं
प्रत्यालीढादिपादैर्बहुविधकरणैर्नृत्यते वज्रनृत्यम् ।
हास्यं हूंकारमिश्रं भयदमपि रिपोर्वज्रगीतं करोति
निर्लज्जो निर्विशङ्को भवति गुणवशाद्देवतान्या च सौम्या ८८
कायावेशेन योगी प्रकृतिगुणवशात् कायकृत्यं करोति
वागावेशेन वादी भवति च विषयी देवभूतासुराणाम् ।
चित्तावेशेन सर्वं परहृदयगतं ज्ञायते भूतभव्यं
ज्ञानावेशेन बुद्धो भवति सुरगुरुश्चर्द्धिमानेकशास्ता ॥८९॥
भूम्यावेशेन योगी भवति गिरिसमोऽम्ब्वोश्च शीतं प्रयाति
वह्न्यावेशेन दाहं व्रजति च मरुता शोषमेवं प्रयाति ।

---

[4] ने. °वह्नि [5] ने. °नैचै [6] ने. होर° [7] ने. वह्ने [8] ने. आ [9] ने. ह्रीं° [10] ने. °हरयः [11] ने. सर्व°

शून्यावेशैरदृश्यो भवति भुवि तले खेचरत्वं प्रयाति
एवं रूपादिसर्वं प्रकृतिगुणवशाद्वेदितव्यं क्रमेण ॥९०॥
आवेशो मन्त्रिणां वै भवति नरपते भावनाया बलेन
सेवाभेदैः कदाचिद्बहुविधसमयैर्मन्त्रजापादिभिश्च।
बुद्धैरास्वाद्यमानैः क्वचिदमृतवशान्मण्डले भव्यसूनोर्
न स्वाधिष्ठानेन हीना बहुविविधभवैर्मन्त्रिणां सिद्धिरस्ति ९१
त्यक्तावेशस्य पश्चाच्छिरसि च हृदये मूर्ध्नि नाभौ च कण्ठे
गुह्ये रक्षा जिनाद्यैः स्वकुलभुवि गतैः कारयेत् स्वत्रिवज्रैः।
दत्ताङ्गे पीतवस्त्रस्य पिहितनयनस्यात्र शिष्यस्य वेशः
संवृत्यर्थं व्रतानि प्रवर गतिगतान्येव देयानि तानि ॥९२॥
हिंसासत्यं परस्त्री त्यजस्व परधनं मद्यपानं तथैव
संसारे वज्रपाशः स्वकुशलनिधनं पापमेतानि पञ्च ।
यो यत्काले बभूव त्रिदशनरगुरुस्तस्य नाम्ना प्रदेया
एषाज्ञा विश्वभर्तुर्भवभयमथनी पालनीया त्वयापि ॥९३॥
द्यूतं सावद्यभोज्यं कुवचनपठनं भूतदैत्येन्द्रधर्मं
गोबालस्त्रीनराणां त्रिदशनरगुरोः पञ्च हत्यां न कुर्यात् ।
द्रोहं मित्रप्रभूनां त्रिदशनरगुरोः संघविश्वासनं च
आशक्तिस्त्विन्द्रियाणामिति भुवनपते[1] पञ्चविंशद्व्रतानि
॥९४॥

श्रीमन्त्रेणाभिमन्त्र्या करकमलपुटे पुष्पमेकं प्रदेयं
आदौ भ्रम्य त्रिवारान् करकमलपुटान् मण्डले पुष्पमोक्षः ।
यस्मिन् स्थाने सुपुष्पं पतति नरपते तत्कुलं तस्य नूनं
पश्चात् सप्ताभिषेकस्त्रिविध इह तथानुत्तरः संप्रदेयः ९५
नागै राजंश्चतुर्भिर्मणिकनकघटैर्मृण्मयैर्वासरत्नैर्
ओषध्या गन्धयुक्तैर्जयविजयघटैः स्नापयेद्देवतानाम् ।
मौलिं बुद्धप्रभेदैर्दशति वरगुरुः शक्तिभिः पट्टमेव
वज्रं घण्टार्कचन्द्राद्व्रतमपि विषयैः स्वेन्द्रियैर्योजनीयम् ९६
क्रोधैर्मैत्र्यादि नाम स्फुटनिजपतिनाज्ञा प्रदेया समात्रा
वज्रं घण्टां प्रदाय प्रवर करुणया देशयेच्छुद्धधर्मम् ।
कुर्यात् प्राणातिपातं खलु कुलिशकुलेऽसत्यवाक्यं च खड्गे
रत्ने हार्यं परस्वं वरकमलकुलेऽप्येव हार्या परस्त्री ॥९७॥
मद्यं दीपश्च बुद्धाः सुसकलविषया[2] सेवनीयाश्च चक्रे[3]
डोम्ब्याद्याः कर्त्तिकायां सुसकलवनिता नावमन्याः खपद्मे ।
देयाः सत्त्वार्थहेतोः सधनतनुरियं न त्वया रक्षणीया
बुद्धत्वं नान्यथा वै भवति कुशलतानन्तकल्पैर्जिनोक्तम् ९८
तोयं तारादिदेव्यो मुकुट इह जिनाः शक्तयो वीरपट्टो[4]
वज्रं घण्टार्कचन्द्रौ व्रतमपि विषयानाममैत्र्यादियोगः ।
आज्ञासंबोधिलक्ष्मीर्भवभयमथनी कालचक्रानुविद्धा
एते सप्ताभिषेकाः कलुषमलहरा मण्डले संप्रदेयाः ॥९९॥
सिक्तः सप्ताभिषेकैर्व्रजति शुभवशात् सप्तभूमीश्वरत्वं
भूयोऽवैवर्तिकाद्यां[5] प्रविशति नियतं कुम्भगुह्याभिषिक्तः ।
प्रज्ञाज्ञानाभिषिक्तो भवभयमथनं मञ्जुघोषत्वमेति
मूलापत्तिं कदाचिद्व्रजति शठवशान्नारकं दुःखमेति १००
मूलापत्तेर्विशुद्धिर्भवति हि गुणिनः सप्तसेक[6]स्थितस्य
कुम्भे गुह्ये कदाचिद्व्रतनियमवशादुत्तरे नास्ति शुद्धिः ।
मूलापत्तिं गतो यो विशति पुनरिदं मण्डलं सिद्धिहेतोर्
आज्ञां लब्ध्वा हि भूयो व्रजति गणकुले ज्येष्ठनामा लघुत्वम्
॥१०१॥

मूलापत्तिः सुतानां भवति शशधरा श्रीगुरोश्चित्तखेदात्
तस्याज्ञानं[7] घनेऽन्या भवति खलु तथा भ्रातृकोपा तृतीया ।
मैत्रीत्यागाच्चतुर्थी भवति पुनरिषुबोधिचित्तप्रणाशात्
षष्ठीसिद्धान्तनिन्दा गिरिरपि च नरेऽयाचिते गुह्यदानात् १०२
स्कन्धक्लेशादहिः स्यात् पुनरपि नवमी शुद्धधर्मेऽरुचिर्या
मायामैत्री च नामादिरहितसुखदे कल्पना दिक् च रुद्रा ।
शुद्धे सत्त्वे प्रदोषाद्रविरपि समये लब्धके त्यागतोऽन्या
सर्वस्त्रीणां जुगुप्सा खलु भवति मनुर्वज्रयाने स्थितानाम् १०३
नागै राजं[8]श्चतुर्भिर्मणिकनकघटैर्मृण्मयैर्वा सरत्नैर्
ओषध्या गन्धयुक्तैर्जयविजयघटैः स्नापयेत् पीठमध्ये
नागैः श्रीमौलिबद्धे वसुदलकमले पट्टमध्ये चतुर्भिर्
मुद्रायां श्रीघटेनात्र कमलरहितं पञ्चरेखं विवर्ज्य ॥१०४॥
आदौ चोपासको वै भवति हि[9] सलिले श्रामणेरो घटे स्याद्
भिक्षुर्गुह्याभिषेके स्थविर इति भवेदुत्तरे कारणे च ।
मुद्रां[10] पट्टं च मौलिं ददति वरगुरुर्वज्रयज्ञोपवीतं
तेषामाचार्यहेतोः स्वजिनकुलवशाद्देवमुद्रां विशुद्धाम् ॥१०५
ऊर्ध्वे दत्त्वा वितानं क्षितितलनिलये वै त्रिरेखं समन्तात्
तासां कोणे सतोया मणिकनकघटाः सूत्रिताः पद्मवक्त्राः ।
शङ्खाद्ये हेमपात्रे त्वथ रजतमये साधयेद्गन्धतोयं
गर्भे पीठं प्रदाय स्फुटकनकमयं स्नानमारम्भयेत्तत् ॥१०६॥
पुष्पाद्यैर्गन्धतैलै रवि
चूर्णैरुद्वर्तयित्वा मधु
सिद्धार्थैश्च[11] प्रदीपै
तत्स्थानाच्चालनीया
कृत्वा श्रीमण्डलान्ते
मध्ये पद्माष्टपत्रं स्व
तन्मध्ये स्थापनीयाऽ
चैत्याद्यं पुस्तकं वा प
कृत्वा शून्यस्वभावं
पश्चात् पूर्वोक्तयोगै
विद्यादेव्यादिबुद्धानि
हृत्कण्ठे नाभिगुह्ये f
एवं वै भावनीया पु
आकृष्य ज्ञानसत्त्वं
वेशं बन्धं च तोयं
आचार्येणैव तस्मात्
यद्बीजं ह्यादिकादौ
हृन्मध्ये तत्स्वबोजं
द्वात्रिंश[12]ल्लक्षणा
वर्णैर्भिन्नं तदेव प्र
श्रीचक्रं चैत्यगर्भे प
हूंकारं ह्यक्षसूत्रे म
घण्टाकायेश्वराश्च
ते वै वज्रोपवीते
काद्या वर्गाः समात्र
हं हाः श्रीकुण्डलस्य
एवं वाकारयुग्मं भ
पञ्चाकारं हि शून्य
ज्ञानाकारात् स्वदेह
न्यस्तव्यं देवतानां
बीजन्यस्ते प्रतिष्ठा
बीजावेशं स्वकाये
आदर्शे स्नानमत्र
पश्चाद्गन्धैश्च धूपैः

[1] ने. °पतेः [2] ने. °याः [3] ने. चक्रैः [4] ने. पट्टे [5] ने. °यां [6] ने. °सेकं [7] ने. °त [8] ने. राज्यं° [9] ने. च [10] ने. मुद्र

पुष्पाद्यैर्गन्धतैलै रविशिखिपतितैर्देवताभ्यङ्गनीया
चूर्णैरुद्वर्तयित्वा मधुघृतदधिभिः स्नापयेत् क्षीरतोयैः ।
सिद्धार्थैश्च[11] प्रदीपैर्वरविविधफलैरत्र निर्मर्च्छयित्वा
तत्स्थानाच्चालनीया तनुरपि पिहिता रक्तवस्त्रेण सम्यक् १०७
कृत्वा श्रीमण्डलान्ते सममहिनिलये पञ्चरेखाजिनांशैर्
मध्ये पद्माष्टपत्रं स्वकुलदिशिगतैर्भूषितं पञ्चचिह्नैः ।
तन्मध्ये स्थापनीयाऽपरमुखकमला देवता दैवती वा
चैत्याद्यं पुस्तकं वा पट इति च तथा सन्मुखस्तस्य मन्त्री १०८
कृत्वा शून्यस्वभावं जिनवरसहितं कायवाक्चित्तवज्रं
पश्चात् पूर्वोक्तयोगैः शशिरविपविजं भावयेत् कालचक्रम् ।
विद्यादेव्यादिबुद्धानलिकलिकुलजान् स्वस्वबीजैश्च जातान्
हृत्कण्ठे नाभिगुह्ये शिरसि कुलवशाद्भावयेन्मूर्ध्नि चक्रे १०९
एवं वै भावनीया पुनरपि सकला देवतायाश्च काय
आकृष्य ज्ञानसत्त्वं त्रिभवभवसमं क्रोधराजैः स्वकाये ।
वेशं बन्धं च तोयं समरसकरणं देवतायाश्च कुर्याद्
आचार्येणैव तस्मात् प्रकटितवदना देवता वन्दनीया ११०
यद्बीजं ह्यादिकादौ स्वकुलगुणगतं देवतादैवतीनां
हृन्मध्ये तत्स्वबीजं शशिरविपुटजं कायवाक्चित्तयुक्तम् ।
द्वात्रिंश[12]ल्लक्षणाद्यैः सकलतनुगतैर्व्यञ्जनैः खाष्टभिश्च
वर्णैर्भिन्नं तदेव प्रकटदलदलेष्वष्टकानां च भाव्यम् १११
श्रीचक्रं चैत्यगर्भे पविमणिकमलं चासिरेवोत्तरेण
हूंकारं ह्यक्षसूत्रे मणिपरिगणनालक्षणं व्यञ्जनानि ।
घण्टाकायेश्वराश्च त्रिगुणितदशकाः कादिवर्गाश्च वज्रे
ते वै वज्रोपवीते दशगुणितवसुव्यञ्जनान्युत्तरीणाम् ११२
काद्या वर्गाः समात्रा गगनरसगुणा योगपट्टस्य भाव्या
हं हाः श्रीकुण्डलस्य त्वग? इति युगलं कण्ठिका मेखलायाम् ।
एवं वाकारयुग्मं भवति कटकयोर्नूपुराणां हहाश्च
पञ्चाकारं हि शून्यं सकलतनुगतं भस्मनो भावनीयम् ११३
ज्ञानाकारात् स्वदेहात् त्रिकुलिशसहितं स्कन्धधात्वादि सर्वं
न्यस्तव्यं देवतानां स्वहृदयकमलात् स्वस्वबीजैः क्रमेण ।
बीजन्यस्ते प्रतिष्ठा भवति नरपते स्तूपलेपादिकानां
बीजावेशं स्वकाये कुरु वरकुलिशे नोऽपि संहारकाले ११४
आदर्शे स्नानमत्र प्रथममपि भवेच्चित्रितानां पटानां
पश्चाद्गन्धैश्च धूपैः स्वसुरभिकुसुमैर्देवताभ्यर्चनीया

ज्यं° [9] ने. च [10] ने. मुद्रा [11] ने. °र्थेष्व [12] ने. द्वाविंश°



गीतैर्वाद्यैश्च नृत्यैर्वरविविधपटैश्चामरैरातपत्रैर्
एवं कृत्वा प्रतिष्ठां वरविविधरसैः संघभोज्यं प्रदेयम् ११५
कूपे वाप्यां तलागे दिशि विदिशि वसून् विन्यसेन्नागराजान्
सप्ताम्भो विश्वबीजैर्मधुसलिलयुतं क्षेपयेत् पञ्चगव्यम् ।
होमान्ते वापिकादौ वरुणमपि सितं पाशहस्तं विभाव्य
उद्याने[1] कल्पवृक्षं सकलतरुगतं सेकयित्वैकवृक्षम् ॥११६॥
मौलिं पट्टं च हारं कटकमपि तथा कुण्डलं मेखलां च
आचार्याय प्रदेयं भवति नरपते दक्षिणां चात्मशक्त्या ।
दत्त्वा वै पुण्यहेतोः सकलगुणकुलं प्रार्थनीयं परार्थे
पुण्येनानेन सत्त्वास्त्रिविधभव[2]गतानुत्तरां यान्तु बोधिम् ११७
दिग्वर्षं यावदेका भवति दशविधा दर्शनस्पर्शनीया
तस्मादालिङ्गनीया सरसजलधयः सेवनीयाश्च नाद्याः[3] ।
विंशद्वर्षोर्ध्वमुद्राः परमभयकराः क्रोधभूताः[4] सुरांशाः
सेकार्थं षट्चतस्रः खग[5]मुखफलदाश्चापरा भावनार्थम् ११८
श्रीप्रज्ञास्पर्शनं यत् प्रथममपि कुचे कुम्भसेकः स एव
गुह्ये गुह्याभिषेको भवति शशधरास्वादनालोकनाभ्याम् ।
प्रज्ञाज्ञानाभिषेके सकलजिनकुलैः शोधयित्वाङ्गं वक्त्रैर्
मुद्रा शिष्याय देया जिनमपि गुरुणा साक्षिणं चात्र कृत्वा ११९
सर्वालङ्कारयुक्तां द्रुतकनकनिभां द्वादशार्कां स्वकन्यां
प्रज्ञोपायात्मकेन स्वकुलिशमणिना कामयित्वा सरागाम् ।
ज्ञात्वा शिष्यस्य शुद्धिं कुलिशमपि मुखे क्षेपयित्वा सबीजं
पश्चाद्देया स्वमुद्रा त्वथ पुनरपरा धूममार्गादियुक्ता १२०
त्रस्ता विभ्रान्तचित्ता शठपरवशगा व्याधियुक्ता प्रसूता
क्रुद्धा स्तब्धाथ लोला[6]ऽनृतकलहरता स्वाङ्गहीनाविशुद्धा ।
एताः प्रज्ञाभिषेके सुनिपुणगुरुणा वर्जनीया नरेन्द्र
पूर्वोक्ता बुद्धभक्ता गुरुसमयधरा वन्दनीयार्चनीया १२१
कामाक्षोभं करोति स्वमनसि जगतः पूर्णतां याति पूर्णा
पूर्णा ज्वाला स्व[7]बिन्दुं स्रवति शशधरं द्रावयित्वोत्तमाङ्गात् ।
ओद्राकृष्टिं प्रकृत्या ददति वरसुखं बिन्दुमोक्षत्रयान्ते
आलोकस्पर्शसङ्गं क्षरणसुखमथानन्दभेदादिनैतत् ॥१२२॥
कामानन्दं करोति प्रथममपि नृणां चक्षुरालोकनेन
पश्चात् पूर्णा प्रसङ्गे पुनरपि परमानन्दमेव स्वकाये ।
ज्वालाबिन्दुं स्रवन्ती रमति च विरमानन्दवज्रे च पद्मे

[1] ने. °न्ये [2] ने. °पथ° [3] ने. नाड्याः [4] ने. भूताः [5]
[12] ने. °पीता [13] ने. °ङ्ग

पत्रैर्
ोज्यं प्रदेयम् ११५
विन्यसेन्नागराजान्
त् पञ्चगव्यम् ।
हस्तं विभाव्य
कवृक्षम् ।।११६।।
ं मेखलां च
चात्मशक्त्या ।
यं परार्थे
यान्तु बोधिम् ११७
स्पर्शनीया
ग्राश्च नाद्याः[3] ।
ाः[4] सुरांशाः
ा भावनार्थम् ११८
सेकः स एव
ालोकनाभ्याम् ।
त्वाङ्गं वक्त्रैर्
गं चात्र कृत्वा ११९
र्का स्वकन्यां
यत्वा सरागाम् ।
क्षेपयित्वा सबीजं
र्गादियुक्ता १२०
धियुक्ता प्रसूता
ाङ्गहीनाविशुद्धा ।
ा नरेन्द्र
यार्चनीया १२१
तां याति दूर्णा
वयित्वोत्तमाङ्गात् ।
मोक्षत्रयान्ते
ादिनैतत् ।।१२२।।
ालोकनेन
ाव स्वकाये ।
न्दवज्रे च पद्मे

ओद्रा बिन्दुत्रयान्तेऽक्षरगतसहजानन्दवज्रं करोति ।।१२३।।
कामानन्दं तु कम्पाक्षरमपि च चतुष्फेनयोगः स एकः
पूर्णा शक्त्युद्भवो वै भवति च परमानन्द एव द्वितीयः ।
ज्वालाबिन्दुश्च घूर्मा पुनरपि विरमानन्द एव तृतीय
ओद्रानादश्च निद्रा भवति च सहजानन्द एवं चतुर्थः १२४
मात्रा चित्तेन चिन्त्या भवति च भगिनी स्पर्शनालिङ्गनेन
पुत्री वज्रप्रवेशे सकरुणसुरते भागिनेया तथैव ।
भार्या बिन्दुप्रपाते त्वपरकुलगता योगिनी नष्टरागे
एताः षडयोगमुद्राः क्षितिजलहुतभुग्वायुखोच्छेदभावा १२५
अब्जे वज्रप्रवेशः शिखिनि च मरुतो बिन्दुपातस्तृतीय
एतद्योगत्रयस्य प्रकटितनियता कायवाक्चित्तमुद्रा ।
रागारागान्तनाद्या परमगुणनिधिर्योगिगम्या चतुर्थी
मुद्राणां स स्वमाता भवति दशविधा श्रीगुरोर्वक्त्रमेषा १२६
प्रज्ञामाता[8] स्वमाता त्रिभुवनजननी लोचनाद्या भगिन्यो
षड्वज्रा भागिनेया पशुजनभयदा नप्तरश्चर्चिकाद्याः ।
चक्रस्थाः सर्वकालं स्वकुलभुवि गता योगिभिः सेवनीयाः
क्षेत्रे पीठे श्मशाने न सजनविजने मोचनीयाः कदाचित् १२७
श्रीवज्री श्रीजनेता त्रिभुवनजनको भ्रातरः सर्वबुद्धा
नेत्राद्या भ्रातृपुत्रास्त्वपरबहुविधा नप्तरो नप्तृपुत्राः ।
चक्रस्था योगिनीभिः स्वकुलभुवि गताः सेवनीयाः प्रकृष्टाः
क्षेत्रे पीठे श्मशाने न सजनविजने मोचनीयाः कदाचित् १२८
या काचिद्वज्रपूजां ददति हि वनिता पुण्यहेतोस्त्रिशुद्धया
आचार्यायेन्दुवक्त्रा कुवलयनयना दिव्यगन्धानुलिप्ता ।
यत् पुण्यं भूमिदाने गजतुरगरथानेककन्याप्रदाने
तस्यास्तत्सर्वपुण्यं भवति नरपते न्यस्तचन्द्रार्कसीम्नः १२९
तारा शूद्री चतुर्धा भवति भुवि तले पाण्डरा क्षत्रिणी च
क्षमा वैश्या त्रिप्रकारा द्विजजनकुलजा सप्तधा मामकी स्यात् ।
शब्दाख्या कांस्यकारी खलु रसकुलिशा शौण्डिनी रूपवज्रा
सम्यग्वै हेमकारी भवति नरपते गन्धवज्रा धरण्याम्[9] १३०
मालाकारी प्रसिद्धा प्रकृतिगुणवशात् स्पर्शवज्रांशुकारी
वज्रान्ता धर्मधातुर्भवति हि मणिकारी च लोके प्रसिद्धा ।
चामुण्डा खट्टिकी[10] स्यात् प्रकृतिगुणवशाद्वैष्णवी कुम्भकारी
वाराही कन्दुकी वै भवति च गणिका षण्मुखो सीविकैन्द्री
।।१३१।।
ब्रह्माणी धीवरी स्यात् क्षितितलनिलये चेश्वरी[11] नर्तकी स्याल्
लक्ष्मीः पूर्णेन्दुवक्त्रा भवति हि रजकी चाष्टमी भूतयोनिः ।
रङ्गाकारी च जम्भी भवति नरपते स्तम्भकी कोषकारी
मालाख्या तैलपीडा[12] स्वबृहदतिबला लोहकारी चतुर्थी १३२
मारीची चर्मकारी स भवति भृकुटी काष्ठकारी तथैव
श्रीचुन्दा नापिती च क्षितिभुवनगता शृङ्खलावंशकारी ।
वज्राक्षी कूपकर्ता भवति च दशमी वेणुनृत्यातिशीला
क्रोधागा क्रोधजाताः खलु दशवनिता योगिना पूजनीयाः १३३
म्लेच्छा श्रीश्वानवक्त्रा भवति नरपते हट्टिनी शूकरास्या
मातङ्गी जम्बुकास्या क्षितितलनिलये तायिनी व्याघ्रवक्त्रा ।
काकास्या वर्वरी च प्रकटसुनियता पुक्कसी गृध्रवक्त्रा
श्रीभिल्ली तार्क्ष्यवक्त्रा भवति हि शबरी चाष्टमोलूकवक्त्रा
।।१३४।।
षट्त्रिंशद्वर्णभेदैः क्षितितलनिलये योगिनीनां कुलानि
क्षेत्रे पीठोपपीठे विषयपुरवरे श्रीवने संस्थितानि ।
मूर्खाणां बन्धनानि प्रवर महितले योगिनां सिद्धिदानि
चत्वारः षट् तथाष्टौ सह दशवसवश्चैकमेकं क्रमेण १३५
चत्वारो बुद्धभेदाः खलु पुन ऋतवो बोधिसत्त्वप्रभेदाः
क्रोधानां दिक्प्रभेदाः क्षितितलनिलये प्रेतभेदास्तथाष्टौ
दैत्यानां चाष्टभेदाः फणिभुवनगता योगिना वेदितव्या
एकैको विश्वभर्तुस्त्रिभुवननिलये व्यापकः श्रीकुलानाम् १३६
पातालेष्वष्टचण्डा दशदिशिवलये क्रोधजा मर्त्यलोके
प्रेताख्याः प्रेतलोके सुरवरनिलये शब्दवज्रादिषट्कम् ।
ब्रह्माण्डे श्रीचतस्रः प्रवर शिवपुरेऽप्येकमाता त्रिधातोर्
विश्वं संहारयन्ति प्रकुपितवदनाः पालयन्त्येव तुष्टाः १३७
बाला वृद्धास्तरुण्यः समलिनतनवो ब्राह्मणी क्षत्रिणी च
वैश्या शूद्रान्त्यजा वा गतनयनकराश्छिन्नकर्णोष्ठनासाः ।
आचार्यैर्बोधिहेतोः सकरुणहृदयैः पूजनीयाः समस्ताः
प्रज्ञोपायेन राजन् व्यपगतकलुषैर्बोधिचर्यानुरूढैः ।।१३८।।
आदौ स्त्री गुह्यमुद्रा भवति हि समये श्रीनरो दिव्यमुद्रा
क्रीडाङ्गं[13] कर्ममुद्रा भवति समसुखैर्द्वीन्द्रियैर्धर्ममुद्रा ।

---

ड्याः [4] ने. भूताऽ [5] ने. सम° [6] ने. लोमा [7] ने. मु° [8] ने. °माप्ता [9] ने. °ण्या [10] ने. खड्विकी [11] ने. वै°

दूतीनां पञ्चगन्धास्तनुकमलगता जातयः पञ्च तासां
कस्तूरीपद्मसूत्राः प्रकृतिगुणवशादामिषः पूतिगन्धः १३९
श्रीभद्रा पद्मिनी वै भवति जलचरी चित्रिणी हस्तिनी च
श्रीस्तारापाण्डराख्या भवति कुलवशान्मामकी लोचना च
योगी सिंहो मृगोऽश्वो भवति च वृषभः कुञ्जरो जातिभेदाद्
अक्षोभ्योऽमोघसिद्धिर्विमलमणिकरः पद्मपाणिश्च चक्री १४०
तन्वङ्गी सूक्ष्मकेशा मृदुकरचरणा वत्सला श्रीसुभद्रा
किञ्चित्तन्वी प्रलम्बा त्वचपलनयना पद्मिनी वक्रकेशा ।
निर्लज्जा तीव्रकामा बहुकलहरता शङ्खिनी स्वल्पकेशा
दीर्घा सर्वाङ्गपूर्णा खलु लघुविषया चित्रिणी दीर्घकेशा १४१
स्थूला खर्वा दृढाङ्गी सुकठिनविषया हस्तिनी लून[1]केशा
दूतीनां शुद्धजातिः क्वचिदिह हि भवेत् सर्वदा मिश्रजातिः ।
सिंहश्चैकान्तवासी विषयविरहितो निर्भयस्त्यागशीलः
शारङ्गः शीघ्रगामी क्षरलघुविषयस्त्रस्तचित्तोऽतिभीतः १४२
अश्वो वै कामलोलो भवति परवशो मूत्रगन्धः परार्थी
स्तब्धाक्षो मन्दगामी प्रकृतिगुणयुतो मत्स्यगन्धो वृषः स्यात् ।
कामी वै मन्दगामी भवति खलु गजः पूतिगन्धोऽतिमूर्खः
षट्त्रिंशद्भेदभिन्नः क्षितितलनिलये वर्णगन्धस्वभावः १४३
पूजार्थं कामशास्त्रं बहुगुणनिलयं योगिनां वेदितव्यं
नातुष्टा सिद्धिदा स्यात् सुरतमपि गता योगिनी योगिनश्च ।
दिव्या देवी पिशाची भवति च मनुजा राक्षसी नागिनी च
दिव्या श्रीधर्मधातुर्भवति गुणवशाच्छब्दवज्रा च देवी १४४
पैशाची गन्धवज्रा भवति च मनुजा रूपवज्रा नरेन्द्र
क्रूरात्मा राक्षसी या खलु रसकुलिशा नागिनी स्पर्शवज्रा ।
दिव्या सत्त्वोपकारी व्रतनियमरता संवर[2]ध्यानशीला
देवी भोगानुरक्ता भवति हि मलिनोच्छिष्टरक्ता पिशाची
॥१४५॥
नारी कामानुरक्ता नररुधिररता राक्षसी मारचित्ता
क्षीराशा नागिनी च प्रवर महितले योगिना पूजनीया ।
एवं चान्ये स्वभावाः प्रकृतिगुणवशाद्योगिना वेदितव्याः
षट्त्रिंशद्भेदभिन्नाः क्षितितलनिलये खेचरी भूचरीणाम् १४६
मद्यं प्रज्ञास्वभावं समधुजगुडजं धान्यजं वृक्षजं च
मुद्राहीनः पिबेद्यः स भवति विषयी चावृतो मारवृन्दैः ।

तस्मात् प्रज्ञावियुक्तं कलुषमलहरं मन्त्रिणा सिद्धिदं स्यान्
मुद्रायां काञ्चिदस्मिन् समयविरहितां पानहेतोः प्रकुर्यात्
॥१४७॥
एको राजन् शशाङ्को मरणभयहरः सेवितः सर्वकालं
प्रज्ञाधर्मोदयस्थो दिनकरसहितः किं पुनर्योगयुक्तः ।
अक्षोभ्योऽमोघसिद्धिर्जिनवरसहितः श्वाश्वगोहस्तियुक्तः
क्लेशानां वज्रदण्डः पशुजनभयदश्चाष्टमोऽन्योऽतिरौद्रः
॥१४८॥
श्वाश्वो गोहस्तिमेषास्त्वजहरिणखराः शूकरोऽष्टौ दिगेते
कुम्भीराखुः कुलीरो झष इति मकरो दर्दुरः कूर्मशङ्खः ।
गण्डो व्याघ्रश्च ऋक्षः सनकुलचमरी जम्बुकोद्रो विडालः
अ ारण्यश्वा ससिंहो वसुदशकमिदं भूतजं क्रोधनं च ॥१४९॥
गोधाखुः शालिजातः कपिरपि शशकः शल्लकीषुकूकोष्ट्रौ
मानी[3] पक्षी शुकश्च प्रकटितजलधिः कोकिला शारिका च
लावः पारावतोऽन्यो बक इति चटकः चक्रवाकश्च हंसः
श्रीकुञ्चाकोकिलाक्षौ रजकभगवती तित्तिरी सारसा च १५०
नीराविष्टो बलाकः सहरसवसवो वेदितव्याः क्रमेण
काको गृध्रोऽप्युलूको मृगरिपुशिखिनौ कुक्कुटो भेद्रघाराः ।
याजी वृक्षा वरेण्यः प्रभवति दशकं क्रोधजं क्रोधजातिर्
नीलाक्षः श्रीचकोरस्त्वनिलगुदमुखौ वृक्किपादोऽर्धशायी
॥१५१॥
भेरुण्डश्चाम्बरीको भवति नरपते चाष्टमो दिव्यपक्षी
षट्त्रिंशज्जातिभेदैः क्षितिभुवनगता खेचरीभूचरीणाम् ।
पूजाकाले समस्ताः कुलगतसमया योगिना भक्षणीया
मूर्खो मोहात्कदाचित्त्यजति नरपते क्षिप्रनाशं प्रयाति १५२
दन्तैः केशैस्त्वगाद्यैः स पिशितमदनैर्वस्तिवृक्कैश्च पद्मैर्
यूकाभिर्लोमकीटैः प्रवर नरपते फुप्फुसैरन्त्रमेढ्रैः ।
वाष्पैः पित्ताम्बुपूयैर्विविधतनुगतैर्लोहितैः स्वेदमेदैर्
अश्रुभ्यां खेटसिहाणि[4] जलनमिव वशाद्वर्णगन्धैश्च विष्ठैः[5]
॥१५३॥
जिह्वाक्षिश्रोत्रनासा सशशिदिनकरैर्देवता पूजनीया
षट्त्रिंशच्चाक्षराणि प्रकृतिगुणवशाद्बोधिपक्षाश्च धर्माः ।
षट्त्रिंशद्धातुभेदाः सकलतनुगता जातयश्चिह्नमुद्राः

षट्त्रिंश[6]द्योगतन्
तोयार्घं गन्धधूपं
नैवेद्यं चात्र वस्त्रं
शुक्रं मूत्रं च मज्ज
अन्त्रं चर्माणि रा
वज्रं खड्गश्च ब
वीणादर्शश्च पात्रं
षष्ठो धर्मोदयो वै
एवं वै कर्तृकाद्यं
सूची वा मुद्गरो व
लक्ष्मीचिह्नं शिल
जम्भादे रक्तपात्रं
शस्त्री चोपानही

कुद्दालं वेणुदण्डं प्र
गोशृङ्गं मल्लतन्त्री
वीणोपाङ्गं च का
षट्त्रिंशच्चिह्न[9]भे

भूयः शूद्रादिचिह्नं
क्षत्रिण्या रत्नपट्टं
वैश्यायास्तद्वदेवं
मातुश्चिह्नं चतुर्था
विष्ठा मूत्रं च रक्
कर्णो नासाक्षिजिह्
पूय[11]श्लेष्मा च यू
अन्त्रं पित्तास्थिमज
नाडी चर्माणि वृक
कर्णे नासाक्षिवक्त्रे
कक्षाद्यष्टाङ्गकाधो
योगिन्योऽष्टाष्टका

विण्मूत्रं रक्तमांसै

---

[1] ने. स्थूल° [2] ने. संयम° [3] ने. तानी [4] ने. स्वेत्तसिहानि [5] ने. पिष्टै [6] ने. षड्विंश° [7] ने. °जा च [8] ने. कोष° [9] ने.
[12] ने. कृकम [13] ने. वुष्कं [14] ने. °ङ्गधातो [15] ने. °ना° [16] ने. °दशांग

षट्त्रिंश[6]द्योगतन्त्राण्यवनितलगतान्यत्र वै योगिनीनाम् १५४
तोयार्घं गन्धधूपं कुसुममपि फलं चाक्षतानि प्रदीपे
नैवेद्यं चात्र वस्त्रं भवति हि दशकं चक्रमेलापके च ।
शुक्रं मूत्रं च मज्जा विडपि च पिशितं कालजं पित्तरक्तम्
अन्त्रं चर्माणि राजन् भवति दशविधं चक्रमेलापके च १५५
वज्रं खड्गश्च बाणः शतदलकमलं पञ्चमं चक्रचिह्नं
वीणादर्शश्च पात्रं भवति नरपते पुष्पमाला च वस्त्रम् ।
षष्ठो धर्मोदयो वै भवति करतले शब्दवज्रादिचिह्नम्
एवं वै कर्तृकाद्यं कलश इति तथा कट्छुकं पीतवस्त्रम् १५६
सूची वा मुद्गरो वा प्रकटितनियता मत्स्यजालं[7] त्रिशूलं
लक्ष्मीचिह्नं शिला वै भवति नरपते चाष्टमं भूतजानाम् ।
जम्भादे रक्तपात्रं दिनकरसदृशं कोश[8]कीटः कुशश्च
शस्त्री चोपानही च क्षुरक इति तथा पादुका चातपत्रम् ॥१५७॥
कुद्दालं वेणुदण्डं प्रभवति दशकं क्रोधजानां स्वचिह्नं
गोशृङ्गं मल्लतन्त्री भवति करतले द्राकुली मांसशूलम् ।
वीणोपाङ्गं च काण्डं भवति च शिखिनः पिच्छमात्राष्टमं च
षट्त्रिंशच्चिह्न[9]भेदाः प्रवर भुवि तले योगिना पूजनीया ॥१५८॥
भूयः शूद्रादिचिह्नं भवति गुणवशादुत्पलं वाहनं वा
क्षत्रिण्या रत्नपट्टं भवति नरपते लेखनी रत्नमाला ।
वैश्यायास्तद्वदेवं जलचरसहितं ताम्रपात्रं द्विजात्या
मातुश्चिह्नं चतुर्धा डमरुकपटहं मौलिरेवाक्षसूत्रम् १५९
विष्ठा मूत्रं च रक्तं भवति सपिशितं देवतीनां चतुष्कं
कर्णो नासाक्षिजिह्वा गुदमपि च भगं[10] शब्दवज्रादिषट्कम्
पूय[11]श्लेष्मा च यूका कृमक[12]-लसि-वसा-लोम-केशाष्टकं च
अन्त्रं पित्तास्थिमज्जा विविधतनुगतं कालजं फुप्फुसं च १६०
नाडी चर्माणि वुक्कं[13] भवति च दशकं मेदयुक्तं नरेन्द्र
कर्णे नासाक्षिवक्त्रेषु गतमपि मलं पायुमध्ये भगे च ।
कक्षाद्यष्टाङ्गकाधो[14] भवति नरपते चाष्टका ह्यासुरीणां
योगिन्योऽष्टाष्टकाः स्युः सहनखदशनाद्[15]द्वादशाङ्गाः[16] कपालैः ॥१६१॥
विण्मूत्रं रक्तमांसैर्विविधतनुगतं पीठभेदे चतुष्कं

°जा च [8] ने. कोष° [9] ने. °च्चित्त° [10] ने. भगे [11] ने. पूयः



कर्णो नासाक्षिजिह्वा गुदमपि च भगं क्षेत्रभेदे च षट्कम् ।
पूयाद्याः केशसीम्नो क्षितितलनिलये चाष्टछन्दोहभेदा
आन्त्राद्या मेदसीम्नो दिगिति च नृप मेलापकस्य प्रभेदाः १६२
कर्णादष्टाङ्गकाये खलु विविधमलानि श्मशानप्रभेदाः
कालाग्नीन्द्वर्कराहुः प्रकटितनियतं पीठभेदे चतुष्कम् ।
भौमः सौम्यश्च मन्त्री भृगुशनि[1]फणिनः क्षेत्रभेदे च षट्कं
पृथ्वीतोयाग्निवाताः क्षितिजसलिलजा वह्निजा वातजाश्च ॥१६३॥
अष्टौ छन्दोहभेदाः पुनरपि च तथा षड्रसा गन्धवर्णौ
स्पर्शः शब्दस्तथैव प्रकटितदशमेलापकस्य प्रभेदाः ।
पृथ्वी तोयाग्निवायुः क्षयमपि परतो वामसव्ये च पूर्वे
वर्णादीनां चतुर्णां विदिशि निधनताष्टश्मशानप्रभेदाः १६४
पीठं तारादिवेश्म स्फुटरवकुलिशाद्यं तथा क्षेत्रयुक्तं
छन्दोहं चर्चिकाद्यं प्रभवति [नृप]मेलापकं जम्भिकाद्यम् ।
श्वानास्याद्यं श्मशानं परमभुवि गतं मूलपीठं सगुह्यं
मातुर्वेश्म द्विधा तत् प्रकटितमवनौ चान्त्यजं ह्यन्तजं वै १६५
पीठं स्त्रीगुह्यपद्मं प्रभवति समये वज्रमेवोपपीठं
क्षेत्रं छन्दोहमेलापकचितिभुवनं तद्वदेवं समस्तम् ।
पीठं वामाङ्गपूर्वं ह्यपरमपि तथा दक्षिणं चोपपीठम्
एवं क्षेत्रादिसर्वं करचरणगतं चाङ्गुलीकान्तसीम्नः ॥१६६॥
देव्यब्धिस्मृत्युपस्थानमपि भवति वै कालचक्रे प्रसिद्धं
प्रज्ञा बोध्यङ्गमाता त्वपरमपि तथा शब्दवज्रादिषट्कम् ।
अब्धिः सम्यक् प्रहाणान्यपरजलधयश्चर्धिपादाष्टकं स्यात्
पञ्चक्रोधा बलानि प्रकटितनियतानीन्द्रियाण्येव पञ्च १६७
सम्यक् चाष्टाङ्गमार्गो भवति नरपते चाष्टकं दैत्यजानां
सप्तत्रिंशत्प्रभेदैस्त्रिभुवननिलये बोधिपक्षाश्च धर्माः ।
योगिन्यस्ताः समस्ताः क्षितितलनिलये योगिना वेदितव्या
एवं पीठादिसर्वं भवति नरपते बाह्यदेहे च तत्त्वम् ॥१६८॥
बौद्धः शैवोऽथ नग्नो भगव इति तथा स्नातको ब्राह्मणो वा
कापाली लुप्तकेशो भवति सितपटः क्षेत्रपालस्तु कोलः ।
मौनी चोन्मत्तरूपोऽप्यकलुषहृदयः पण्डितश्छात्र एव
योगी सिद्ध्यर्थहेतोः सकलगुणनिधिर्लब्धतत्त्वो नरेन्द्र १६९
अङ्गुष्ठं तर्जनी या पुनरपि च तथा मध्यमानामिका च
तस्यान्ते वै कनिष्ठा सकलगुणनिधिर्योगिना वेदितव्या ।

[1] के. °शशि° [2] ने. °काः [3] ने. °तां [4] ने. °चक्रे

त्रभेदे च षट्कम् ।
ष्टछन्दोहभेदा
ाकस्य प्रभेदाः १६२
मशानप्रभेदाः
दे चतुष्कम् ।
क्षेत्रभेदे च षट्कं
ह्लिजा वातजाश्च
।।१६३।।
सा गन्धवर्णो
ा प्रभेदाः ।
नसव्ये च पूर्वे
शानप्रभेदाः १६४
ा क्षेत्रयुक्तं
ं जम्भिकाद्यम् ।
पीठं सगुह्यं
जं ह्यन्तजं वै १६५
ोपपीठं
मस्तम् ।
चोपपीठम्
न्तसीम्नः ।।१६६।।
ाचक्रे प्रसिद्धं
वज्रादिषट्कम् ।
ापादाष्टकं स्यात्
याण्येव पञ्च १६७
ाष्टकं दैत्यजानां
ाश्च धर्माः ।
ोगिना वेदितव्या
च तत्त्वम् ।।१६८।।
ातको ब्राह्मणो वा
पालस्तु कोलः ।
ाश्छात्र एव
ात्त्वो नरेन्द्र १६९
ामानामिका च
ना वेदितव्या ।

मुद्रार्थं नामभेदो भवति गुणवशादङ्गुलीनां क्रमेण
बन्धोक्ते वज्रबन्धो भवति नियमितो मुष्टिबन्धे च तद्वत्
।।१७०।।
मुष्टी वज्रासनस्थो भवति जिनपतेर्वज्रमुद्रोरुमूर्ध्नि
पर्यङ्के वामहस्तो भवति भुवि गतो दक्षिणं जानुदेशात् ।
भूस्पर्शाक्षोभ्यमुद्रा त्वपि वरदकरो दक्षिणे रत्नपाणेर्
वामोर्ध्वे सव्यहस्तो भवति समगतोत्तानकः[२] पद्मपाणेः १७१
वामं पर्यङ्कमूर्ध्नि ह्यपरकरतलं चाभयं खड्गपाणेः
सव्ये मुष्ट्यावसव्या खलु पुनरपरा तर्जनी मुष्टिवेष्टे ।
मुद्रा वैरोचनस्य स्फुटहृदयगता चापरा चक्रमुद्रा
तर्जन्यङ्गुष्ठयोगः प्रकट इह भवेन्मध्यमादेः प्रसारः।।१७२।।
वामे हस्ते सुपूर्णो विमलशशधरो दक्षिणे वज्रसूर्यः
सूर्येन्दोः संपुटस्थं भयकरकुलिशं क्रोधजं पञ्चशूकम् ।
ध्यात्वाङ्गं स्पर्शनीयं समकुटशिरसारभ्य पादान्तमेव
एषा श्रीदिव्यमुद्रा कलुषमलहरा कालचक्रस्य राजन् १७३
यत्किञ्चिद्बाह्यवस्तु क्षितिजसलिलजं गर्भजं स्वेदजाद्यम्
अन्नं पानं सबीजं गुरुमपि चरणं मुद्रया स्पर्शनीयम् ।
यद्यत्कार्योपयोग्यं भवति गुणवशात्तस्य तद्योजनीयं
भूम्याद्यं मण्डलार्थं चरणमपि गतौ योगिना ताडनीयम् १७४
हस्ताभ्यां वज्रबन्धे भवति खलु महाक्रोधराजस्य मुद्रा
तर्जन्याद्यन्तबन्धं त्रिभुवनविजया स्वस्तिबन्धेन भर्तुः ।
चिह्नाकारस्त्वशेषाः प्रकटितनियता[३] देवतादेवतीनां
हस्ताभ्यां वज्रबन्धे भवति चलफणाकारमुद्रा फणीनाम् १७५
श्लिष्टाङ्गुष्ठौ कनिष्ठे कमलदलसमे मध्यमे मारिते च
तर्जन्यौ द्वेऽर्धवक्रे[४] स्वकरतलगतेऽनामिके कुञ्चिते च ।
मुद्रेयं पञ्चशूका भवति हि कुलिशे वज्रिणो दर्शनीया
आराकाराङ्गुलीका ह्युभयकरतलेऽङ्गुष्ठकाद्याः समस्ताः
।।१७६।।
द्वौ हस्तौ वज्रबन्धौ भवति हि कुलिशं वज्रमुष्ट्या सघण्टा
मुष्ट्यर्धं तीक्ष्णखड्गे भवति शरसमे तर्जनीमध्यमे च ।
तर्जन्याद्यास्त्रिशूलाः पुनरपि विरलास्त्वर्धमुष्ट्या त्रिशूले
श्रीकर्त्र्यां मुष्टिबन्धो भवति भयकरा श्रीकनिष्ठार्धचन्द्रा१७७
कर्णोर्ध्वं मुष्टिबन्धो भवति वरशरेऽङ्गुष्ठकं मध्यमार्धे
तर्जन्यत्यन्तवक्रा भवति नृप तथैवाङ्कुशे मुष्टिबन्धः ।

मूले तर्जन्यमाया भवति शरसमा मध्यमोर्ध्वं च कुञ्चेत्
तिर्यङ्मुष्टिश्च दण्डे सुसमकरतलेऽङ्गुष्ठसारः कुठारे १७८
ऊर्ध्वे मुष्टिद्वयं स्यादसुरपतिगजस्याजिने तर्जनी च
दंष्ट्रायां मुष्टिबन्धो ह्युभयकरतले चार्धचन्द्रा कनिष्ठा ।
वामे बाहुप्रसारो भवति करतलं चोर्ध्वगं स्फटिके च
खट्वाङ्गे छिद्रमुष्टिर्भवति च नियता स्कन्धसारा कनिष्ठा
।।१७९।।
अङ्गुल्याश्छिद्रपाणिः कमलदलमिव श्रीकपाले कृतोर्ध्वं
पाणावुत्तानमुष्टिर्भवति धनुषि वै वामबाहुप्रसारः ।
तर्जन्या रूढवक्रो भवति च नियता मध्यमा वज्रपाशे[५]
रत्ने द्वन्द्वोऽङ्गुलीनां भवति नृप विकासश्च पद्मे च तासाम्
।।१८०।।
तर्जन्याङ्गुष्ठयोगो भवति जलचरेऽङ्गुष्ठकाधश्च मुष्टिर्
आदर्शे संमुखं स्यात् सुसमकरतलं साङ्गुलीकं ह्यछिद्रम् ।
तर्जन्या ह्यर्धचक्रा क्रमपरिरचिताङ्गुष्ठके शृङ्खलायाम्
अङ्गुष्ठाद्याश्चतस्रः शिरसि सममुखं कुञ्चिताधः कनिष्ठा
।।१८१।।
हस्ताभ्यां शङ्खमुद्रा भवति हि मुकुटे तर्जनीद्वन्द्वयोगः
पञ्चाङ्गुल्यैकयोगोऽपि च करतलयोः पृष्ठतः कुण्डलं च ।
पाणौ पृष्ठेऽङ्गुलीनां क्रमपरिरचितं बन्धनं कण्ठिकायां
त्र्यङ्गुल्यन्योन्ययोगोभयकरकुटिलाद्यन्तयोर्मेखलायाम् १८२
अङ्गुष्ठौ मध्यमे द्वे वलयमिव कृतौ नूपुरे मुष्टिबन्धात्
तद्वत् केयूरयुग्मे भवति च कटके तर्जनीद्वन्द्वयोगः ।
अङ्गुष्ठो डाकिनीनां भवति वरकुलं तर्जनी गुह्यकानां
गन्धर्वाणां फणीनां क्रमपरिरचिता मध्यमानामिका वा १८३
भूतानां श्रीकनिष्ठा प्रवर करतलं राक्षसानां कुलं स्यात्
सिद्धानां मुष्टिबन्धो भवति वरकुलं पर्वसन्धिः सुराणाम् ।
पञ्चाङ्गुल्यर्धवक्रा ह्युभयकरतलं जातिमुद्रा नखीनां
तर्जन्यौ द्वेऽर्धवक्रे खलु शिरसि गते शृङ्गिणां मुष्टिबन्धात्
।।१८४।।
बद्धेऽन्योन्यं कनिष्ठे विषमकरतले पक्षयोगोऽण्डजानां
पञ्चाङ्गुल्यग्रवक्रा भवति हि फणिनां जातिमुद्रा विशिष्टा ।
तर्जन्यन्ताः[६] प्रसाराः प्रतिदिवसबलौ[७] चापरेऽधश्च श्लिष्टे
ज्वालायां श्लिष्टज्येष्ठौ[८] वरकरतलयोस्तर्जनी सारितान्या

---

ां [४] ने. °चक्रे [५] ने. °पाणे [६] ने. °न्यास्ताः [७] के. ने. °वनौ [८] ने. °केष्टौ

॥१८५॥
तर्जन्या दर्शने वै कथितमपि भवेत् स्वागतं योगिनश्च
द्वाभ्यां स्वभ्यागतं च प्रवदति सुभगा क्षेममङ्गुष्ठबन्धात् ।
अङ्गुल्याः छोटिकायाः कथयति नियतं श्रेष्ठमन्त्रीत्वमत्र
अङ्गुष्ठानामिकाभ्यां ससमयसुरया[1] तर्पणं ते करोति १८६
सर्वाङ्गुल्यग्रसारात् प्रवदति सुभगा स्वागतं योगिनश्च
वामाङ्गं स्पर्शनेन प्रकटयति सदा बन्धुरेको ममत्वम् ।
योनौ स्पर्शे च भर्ताप्यधरकुचयुगालेखने वै नखैश्च
अङ्गुल्यान्योन्यबन्धात्कथयति समयं मध्यमाङ्गुष्ठसारात्१८७
ओष्ठभ्रूनेत्रवक्त्रे वदति शिरसि कण्डूयमानेऽतिमूर्खो
दंष्ट्रामध्ये कनिष्ठा प्रकटयति भयं तर्जनी हृन्मुखे च ।
अङ्गुष्ठे मुष्टिबन्धाद्भुवि करचरणास्फालने भक्षयामि
जिह्वा पार्श्वे च भुक्तं ह्युदरदशनयोस्ताडितेनैव भुक्तम् १८८
पाणौ पृष्ठे च गच्छ प्रवदति नियतं संमुखे तिष्ठ तिष्ठ
जानूरुमर्दने वै कथयति सुभगाद्यैव विश्रामय त्वम् ।
निद्रा पादप्रसारात् कुरु मम सुरतं जानुयुग्मप्रसारात्
सर्वाङ्गे स्पृश्यमाने वदनगतकरे शान्तिमेलापको मे १८९
अन्योन्यं हस्तबन्धे वदति मम गृहे चक्रमेलापकोऽद्य
अङ्गुष्ठानामिकाग्राद्बहुविधसमयैस्तर्पयामो यथेष्टम् ।
पादे कण्डूयमाने गमनमपि तथा बाह्यमेलापके च
तर्जन्यन्योन्यबन्धे त्वपहरति भयं वज्रमित्रस्त्वमद्य ॥१९०॥
केशच्छेदे स्वदन्तैर्वदति वरपशो पातनीयस्त्वमत्र
अन्योन्यं दन्तघृष्टे तव पिशितमिदं भक्षणीयं मयाद्य ।
जिह्वौष्ठे लालिते वै वदति वरतनौ रक्तपानं करोमि
ओष्ठे संदर्श्यमानेऽप्युदरगतमिदं भक्षयामस्त्वान्त्रम् १९१
लास्यायोगेन लास्या भवति नरपते हास्ययोगेन हास्या
नृत्यायोगेन नृत्या भवति बहुविधा बाह्ययोगेन बाह्या ।
गीतायोगेन गीता वरविविधगुणा गन्धयोगेन गन्धा
मालायोगेन माला भवति गुणवशाद्धूपयोगेन धूपा ॥१९२॥
दीपाकारेण दीपा खलु महिततमा पात्रमुद्रा सदा स्याद्
इत्येवं सर्वमुद्राः पुनरपि च ततः पञ्चभेदैर्विभिन्नाः ।
अन्या मुद्रास्त्वनन्ताः सकलतनुगता योगिना वेदितव्या
यद्यद्वस्तुस्वभावो भवति भुवि तले तत्स्वभावश्च मुद्राः १९३
तिर्यग्दृष्ट्वा च दूती कथयति सुभगस्यागतस्त्वं कुतश्च

प्रत्युक्तं योगिनः स्यात् शिरसि गतकरस्येक्षणे[2] तद्दिशोश्च ।
क्षेमस्तेऽप्यूर्ध्वदृष्ट्या क्षितितलगतया तिष्ठ विश्रामय त्वं
गच्छ त्वं वक्रदृष्ट्या कथयति सुरतं रागदृष्ट्या च दूती १९४
मित्रं मे सौम्यदृष्ट्या कथयति च भयं क्रोधदृष्ट्या भृकुट्या
क्रूराहं केशदृष्ट्या कथयति सुभगस्येङ्गितैः स्वस्वभावम् ।
ऊर्णा दृष्ट्या तु माहं प्रकटयति गुणं योगिनी प्राणदृष्ट्या
सौभाग्यं चौष्ठदृष्ट्या वदति कुचयुगालोकने हंसमुद्रा १९५॥
हृद्दृष्ट्या भावितात्मा वदति भुजयुगालोकनेऽहं प्रचण्डा
शक्ताहं स्कन्धदृष्ट्या सनखकरतलालोकने राक्षसी च ।
पृष्ठालोके भुजङ्गी[3] त्वहमपि समयी नाभिदृष्ट्या नरेन्द्र
शुद्धाहं गुह्यदृष्ट्याप्यहमपि सुरते दुर्जया[4] चोरुदृष्ट्या १९६
सिद्धचाहं जानुदृष्ट्या कथयति नियतं चर्चिता पाददृष्ट्या
पादाङ्गुष्ठावलोके त्वहमपि भुवने वज्रकायैकवीरा ।
सर्वाङ्गुल्यग्रदृष्ट्या त्रिभुवननिलये सर्वगा विश्वमाता
दूतीनामेष दृष्टिः क्षितितलनिलये योगिना वेदितव्या १९७
षड्भागं देहमध्ये करचरणतनौ दानमप्युत्तमाङ्गे
वाचा कामेन्द्रियाणां सगुणमपि मनस्त्विन्द्रियाणां च मध्ये ।
धात्वंशं धातुमध्ये द्विपदपशुगणा[5]स्तत्स्वभागेन चान्यद्
आचार्याय प्रदाय व्रजति सुखपदं दिव्यमुद्रानुविद्धः ॥१९८॥
ये सत्त्वा लोकधातौ त्रिविधभवगता[6] ज्ञानवज्राङ्कुशेन
आकृष्ट्वा तान् समन्तात्[7] परमकरुणया मण्डले चाभिषिच्य ।
बुद्धैर्वज्रामृतेनामलशशिवपुषा वज्रिणो लब्धमार्गाः
स्वस्थाने प्रेषणीया व्यपगतकलुषा बोधिचर्याधिरूपैः १९९
द्रव्याभावेऽभिषेको जिनपति[8]वचने नावधू[9]तस्य देय[10]
एवं धूमादिमार्गः सकलगुणनिधिर्नाडिकायोगयुक्तः ।
सेवार्थं हस्तमुद्रा स्वहृदयवशगा सर्वदोषैर्विमुक्ता
अन्येषां नैव देयं जिनवरहृदयं मातृपूजाविहीनम् ॥२००॥
सेकान्ते श्रीघटानां मृदुतनुसुखदं कञ्चुकं वस्त्रयुक्तं
देयं श्रीयोगिनीभ्यस्त्वपरमपि तथा कञ्चुकं वस्त्रयुग्मम् ।
द्वारान्तेभ्यः प्रदेयं सकलगणकुला यात्मशक्त्या तथान्यद्
अन्ते होमं प्रकृत्य स्वहृदयकमले ज्ञानसत्त्वं प्रवेश्य ॥२०१॥
स्वस्थाने लौकिकान् वै सकलमपि रजो वाहयेत् शुद्धनद्यां
ताम्बूलं गन्धपुष्पं कुसुमफलसमं शाटिकां[11] कन्यकानाम् ।
दत्त्वाचार्यः सशिष्यः सकलगण[12]कुलं तर्पयित्वा यथेष्टं

शिष्यस्याज्ञां प्रदाय
शत्रुः सिंहो गजेन्द्रो
क्षुब्धाम्भोधिः पिश
दारिद्र्यं स्त्रीवियो
नाशान्तस्य प्रयान्ति

**इति श्रीमदादिबु**

लब्धः सप्ताभिषेको
प्रज्ञाज्ञानाभिषेको
भूयः पृच्छामि सम
श्रुत्वा सौचन्द्र वाक
चन्द्राङ्गं युग्मपादं
षट्स्कन्धं सूर्यरागं
पादाभ्यां मारुद्रं[13]
लीलाक्रान्तं तमेकं
उद्याने पर्वते वा
सिद्धस्थाने श्मशाने
यस्मिंश्चित्तप्रतोषो
कृत्वा पूर्वोक्तरक्षां
आदौ हृच्चन्द्रमध्ये
कृत्वा वक्त्रादिशुद्धि
कृत्वा पूजां विचित्र
कर्तव्यं साधकेन
संबुद्धैर्बोधिसत्त्वैर्ब
अनुमोदे तत्समस्त
बुद्धं धर्मं च संघं
संबुद्धोऽहं भवामि
शून्यं भावाद्विहीनं
तस्माद्बुद्धो न वो
एवं ज्ञात्वा समस्त
ध्यातव्यं बोधिसत्त्व
तोयेनाग्नेर्विनाशं

[1] ने. ससमसुरतया [2] ने. °णो [3] ने. °ङ्गा [4] ने. °ना [5] ने. °गता° [6] ने. °भगवता [7] ने. समस्तात् [8] ने. °वर° [9]
[12] ने. °गुण° [13] ने. °बाहुं [14] ने. °मुद्रं [15] ने. °सर्व

शोश्च ।
। त्वं
ी १९४
ृकुट्या
ावम् ।
ृष्ट्या
द्रा १९५ ।।
ण्डा
च ।
नरेन्द्र
चा १९६
दृष्ट्या
।
ा
ग्रा १९७
च मध्ये ।
ाद्
।।१९८।।
ज्ञेन
भिषिच्य ।
:
ाः १९९
देय[10]
: ।
।२००।।
तं
युग्मम् ।
थान्यद्
ा ।।२०१।।
शुद्धनद्यां
कानाम् ।
यथेष्टं

शिष्यस्याज्ञां प्रदाय प्रवर करुणया प्रेषयेत्स्वस्वधाम्नि २०२
शत्रुः सिंहो गजेन्द्रो हरिरुरगपतिस्तस्कराः पाशबन्धः
क्षुब्धाम्भोधिः पिशाचा मरणभयकरा व्याधिरिन्द्रोपसर्गः ।
दारिद्र्यं स्त्रीवियोगः क्षुभितनृपभयं वज्रपातोऽर्थनाशो
नाशान्तस्य प्रयान्ति स्फुटमपि चरणं यः स्मरेद्योगिनीनाम्
।।२०३।।

**इति श्रीमदादिबुद्धोद्धृते कालचक्रेऽभिषेकपटलस्तृतीयः ।।**

लब्धः सप्ताभिषेको जिनजनक मया कुम्भगुह्याभिषेकौ
प्रज्ञाज्ञानाभिषेको भवभयमथनो योगगम्यश्चतुर्थः ।
भूयः पृच्छामि सम्यग् जिनवरसहितं साधनं विश्वभर्तुः
श्रुत्वा सौचन्द्र वाक्यं जगति जिनपतिः साधनं वज्रिणश्च १
चन्द्राङ्गं युग्मपादं शिखिगलमुदधिश्रीमुखं विश्ववर्णं
षट्स्कन्धं सूर्यरागं[13] जिनकरकमलं शून्यषड्वह्निपर्वम् ।
पादाभ्यां माररुद्रं[14] शशिरविहुतभुग्मण्डले त्रास्यमानं
लीलाक्रान्तं तमेकं त्वभवभवसमं साधयेत् कालचक्रम् ।।२।।
उद्याने पर्वते वा जिनवरभवने शून्यदेवालये च
सिद्धस्थाने श्मशाने सरसि सुनिलये गुप्तभूम्यां तथैव ।
यस्मिंश्चित्तप्रतोषो भवति नरपते साधनं तत्र कुर्यात्
कृत्वा पूर्वोक्तरक्षां खलु मृदुशयने चासने चोपविश्य ।।३।।
आदौ हृच्चन्द्रमध्ये दशदिशि विविधा भावयेत्तत्त्वरश्मीन्
कृत्वा वक्त्रादिशुद्धिं पुनरपि गगने स्फारितानां जिनानाम् ।
कृत्वा पूजां विचित्रां बहुभवकलुषं संचितं देशयित्वा
कर्तव्यं साधकेन त्रिशरणगमनं कायवाक्चित्तशुद्ध्या ।।४।।
संबुद्धैर्बोधिसत्त्वैर्बहुविधकुशलं यत् कृतं कार्यसंघैर्
अनुमोदे तत्समस्तं[15] व्यपगतकलुषो बोधिचर्यानुरूढः ।
बुद्धं धर्मं च संघं भवभयहरणं बोधिसीम्नः प्रयामि
संबुद्धोऽहं भवामि प्रणिधिमिति करोत्यत्र सत्त्वार्थहेतोः ५
शून्यं भावाद्विहीनं सकलजगदिदं वस्तुरूपस्वभावं
तस्माद्बुद्धो न बोधिः परहितकरुणा चानिमित्तं प्रतिज्ञा ।
एवं ज्ञात्वा समस्तं तदपि नरपते कायवाक्चित्तवज्रं
ध्यातव्यं बोधिसत्त्वैरपरिमितगुणं मण्डले मण्डलेशम् ।।६।।
तोयेनाग्नेर्विनाशं प्रथममिह गतिः कारयेद्देहमध्ये

---

समस्तात् ८ ने. °वर° ९ ने. नाधु° १० ने. प्रदेय ११ ने. °का



पश्चात्तोयं धरित्री भवति लवणवत्तोयमध्ये प्रविष्टा ।
अन्तर्धानं हि वायुर्व्रजति नभसि तच्छोषयित्वाम्बुराशिं
चित्तं वह्नौ तमोऽन्ते विषयविरहिते स्थापयेन्मध्यभूमौ ७
शून्यं वाय्वग्नितोयान्यवनिसुरनगाब्जेन्दुसूर्याग्नयश्च
कूटागारं समन्तात् स्फुरदमलकरं वज्रजं पञ्जरं वा ।
तन्मध्ये वज्रभूमौ मणिकरनिकरैर्मण्डलं विस्फुरन्तं
ॐकारज्ञानजातं जिनवरकमले चन्द्रसूर्यासनं च ।।८।।
बाह्ये वाङ्मण्डले वै वसुकमलमिदं चन्द्रसूर्यैर्विहीनं
बाह्ये दिक्कोणभागे दिनकरकमलं द्वारमध्ये रथांश्च ।
अर्कद्वारेषु राजन् मणिकनकमयैस्तोरणैश्च श्मशानैर्
द्व्यष्टस्तम्भैश्च गर्भे कुलिशमयसुसंभोगचक्रं जिनस्य ।।९।।
आद्याः काद्येन्दुसूर्येऽपि कुलिशसहिताः [1]पञ्चका दर्शकाद्यैर्[1]
युक्तं तं पञ्चरश्मीन् स्फुरदमलकरं भावयेत् कालचक्रम् ।
वज्रालङ्कारदेहं जिनवरकमलं सूर्यबाहुं युगास्यं
त्रिग्रीवं सूर्यनेत्रं विकसितवदनं चार्धदंष्ट्राकरालम् ।।१०।।
श्रीसत्त्वोंकारजाते जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि
रुद्रानङ्गं द्वयोर्हृत्सु[2]ललितचरणा लीलपादं जिनेन्द्रम् ।
मारो रक्ते च सव्ये वरचरणतले शुक्र[3]वामे च रुद्रो
मध्यं सव्यावसव्यं भ्रमररविनिभं चन्द्रवर्णं च कण्ठम् ११
स्कन्धं नीलं च रक्तं शशधरधवलं दक्षिणे चोत्तरे च
द्वौ द्वौ सव्यावसव्येऽसितरविवपुषौ राहवश्चन्द्रवर्णाः ।
तद्वद्वै त्र्यष्टकेन प्रहरणसहिताः प्राणयश्च क्रमेण
पञ्चाङ्गुल्यस्त्रिपर्वाः शशिकरकमले पञ्चवर्णाः स्फुरन्त्यः
।।१२।।
कृष्णे रक्ते च शुक्ले प्रवर करतले संस्थितं शस्त्रवृन्दं
वज्रं खड्गस्त्रिशूलं भुवनभयकरा कर्त्तिका वह्निबाणः ।
तस्माद्वज्राङ्कुशो वै सरवडमरुको मुद्गरश्चक्रमेव
कुन्तो दण्डः कुठारो रविकरकमले दक्षिणे वज्रिणश्च १३
घण्टा खेटं च खट्वाङ्गविकसितमुखं रक्तपूर्णं कपालं
कोदण्डं पाशरत्ने कमलजलचरौ दर्पणः शृंखला च ।
वेदास्यं ब्रह्मणो यच्छिरकमलमलं वामहस्ते जिनस्य
कुर्वन्त्यौ दीनवक्त्रं धृतचरणतले माररुद्रस्य देव्यौ ।।१४।।
हेमाभा वेदवक्त्रा वसुकरकमला लालितां विश्वमाता

सव्ये क
वामे शु
प्रत्याली
अष्टौ दे
कोणे ता
ईशे नैर्ऋ
एवं चिन्
कृष्णाया
पिष्टं र
वामे घण
रक्ताया
वस्त्रं[4]
पीताया
वामे वी
दुग्धाम्भ
दिक्पद्मे
कोणे त
कृष्णा र
कृष्णा
वैदर्भ्या
पूर्वे स
श्रीमान्
जम्भः
प्रज्ञोत्स
अन्योन्य
यच्चिह
प्रज्ञोपा
कृष्णान
वामे खे
वाणो
वामे क

---

१-१ ने. पञ्चकैकादशाद्यैः २ ने. °त्स्व° ३ ने. शुक्ल° ४ ने.
१२ ने. वा°

ध्ये प्रविष्टा ।
यित्वाम्बुराशि
पयेन्मध्यभूमौ ७
ुर्याग्नियश्च
ं पञ्जरं वा ।
विस्फुरन्तं
सनं च ॥८॥
सूर्यैर्विहीनं
ध्ये रथांश्च ।
श्च श्मशानैर्
चक्रं जिनस्य ॥९॥
ञ्चका दर्शकाद्यैर्[1]
वयेत् कालचक्रम् ।
युगास्यं
करालम् ॥१०॥
सूर्याग्निमूर्ध्नि
ादं जिनेन्द्रम् ।
वामे च रुद्रो
र्णं च कण्ठम् ११
ं चोत्तरे च
वश्चन्द्रवर्णाः ।
व क्रमेण
चवर्णाः स्फुरन्त्यः
॥१२॥
थतं शस्त्रवृन्दं
का वह्निबाणाः ।
श्चक्रमेव
णे वज्रिणश्च १३
पूर्णं कपालं
शृंखला च ।
हस्ते जिनस्य
स्य देव्यौ ॥१४॥
ां विश्वमाता

सव्ये कर्त्र्यङ्कुशो वै सरवडमरुकश्चाक्षसूत्रं क्रमेण ।
वामे शुक्तिश्च पाशः शतदलकमलं दिव्यरत्नस्तथैव
प्रत्यालीलार्कनेत्रा जिनपतिमुकुटा मुद्रिता मुद्रिकाभिः १५
अष्टौ देव्योऽष्टपत्रे वसुकरकमला वेदवक्त्रार्कनेत्राः
कोणे तासां चतस्रः त्वहिचमरधरा वक्त्रभेदैर्जिनस्य ।
ईशे नैर्ऋत्यकोणे शिखिनि च पवने धर्मशङ्खश्च गण्डी
एवं चिन्तामणिः स्याद्भवति खलु तथा कल्पवृक्षः क्रमेण १६
कृष्णाया धूपपात्रं प्रथमकरतले शीतपात्रं द्वितीये
पिष्टं रक्तं तृतीये समदशशधरं सव्यहस्ते चतुर्थे ।
वामे घण्टा च पद्मं सुरतरुकुसुमं पुष्पमाला क्रमेण
रक्ताया दीपहारौ समुकुटकटकं दक्षिणे वामहस्ते ॥१७॥
वस्त्रं[4] वै मेखला च स्फुरदमलकरं कुण्डलं नूपुरं च
पीताया शङ्खवेणू समणिडमरुकः सव्यहस्ते क्रमेण ।
वामे वीणा च ढक्का प्रगुणरणरणत्कंशिका काहला[5] च
दुग्धाम्ब्वौषध्यपानं त्वमृतरसफलं[6] भक्तपात्रं[7] सितायाः १८
दिक्पद्मेष्वब्धिबुद्धाः खलु नवनयना वह्निवक्त्रर्तुहस्ताः
कोणे तारादिदेव्यः पुनरपि च तयोरष्टकक्षेऽष्टकुम्भाः[8] ।
कृष्णा रक्ता च पीता शशधरधवला देवता देवती च
कृष्णा श्वेतेन्दुमूर्ध्नि त्वथ विदिशि गते रक्तपीतेऽर्कमूर्ध्नि ॥१९॥
वैदर्भ्याद्याश्च वृतौ दिशि विदिशि गताः स्पर्शवज्रादयश्च
पूर्वे सव्येऽवसव्येऽपरदिशिकमले विश्वभद्रस्तथैव ।
श्रीमान् वै वज्रपाणिः खलु वरकुलिशा धर्मधातुः क्रमेण
जम्भः स्तम्भश्च मारस्त्वतिबल इति यो द्वारपालं स पूर्वे ॥२०॥
प्रज्ञोत्सङ्गेऽप्युपायः शशधरकमले देवतानां च देवी
अन्योन्यालिङ्गितौ द्वौ स्वकरसलिलजैः स्वस्वचिह्नाङ्कितश्च
यच्चिह्नं सस्य सव्ये प्रथमकरतले सास्य मुद्राब्जहीना
प्रज्ञोपायेन चक्रं परमसुखगतं पद्मवज्रा सनाद्यम् ॥२१॥
कृष्णानां खड्गकर्त्र्यौ भुवनभयकरं सव्यहस्ते त्रिशूलं
वामे खेटं कपाले भवति करतले श्वेतखट्वाङ्गमेव ।
वाणो वज्राङ्कुशो वै सरवडमरुकः सव्यहस्ते क्रमेण
वामे कोदण्डपाणौ स्फुरदमलमणिर्लोहितानां तथैव ॥२२॥

पीतानां चक्रचण्डं भयकरकुलिशं सव्यहस्ते क्रमेण
श्रीशङ्खः शृङ्खला वै भवति च सरवा वज्रघण्टा च वामे ।
सव्ये श्रीमुद्गरो वै शशधरधवलानां च कुन्तं त्रिशूलं
वामे श्वेतं च पद्मं शतदलसहितं दर्पणं चाक्षसूत्रम् ॥२३॥
वज्रं कर्त्री[9] कुठारः प्रभवति हरितानां च सव्ये क्रमेण
वामे घण्टा कपालं सकलगुणनिधिर्ब्रह्मवक्त्रं तदेव[10] ।
नीलानां वेदितव्यं प्रकृतिगुणवशाद्देवतानां च तद्वत्
कृष्णा रक्ता च शुक्ला द्रुतकनकनिभाः पूर्वभूम्यादिदेव्यः २४
अष्टौ भूतादिदेवी जिनपतिकमले वर्जयित्वा कदाचित्
श्रीचक्रं गर्भमध्ये भवति नरपते पञ्चविंशात्मकं च ।
ज्ञात्वा शक्तिं स्वचित्ते द्वयमपि भगवान् योगिभिर्भावनीयः
सेकार्थं मण्डलं वा भवति कुलवशाद्बाह्यचक्रं[11] प्रहीणम् २५
बाह्ये चा[12]ष्टाष्टकेनाष्टसुकमलदलेष्वष्टदिग्देवतीभिर्
योगिन्यश्चर्चिकाद्याः शशिरविरहिताः वेदितव्यास्त्रिनेत्राः ।
पूर्वाब्जे चर्चिकाग्नौ खगपतिगमना शूकरी षण्मुखी च
याम्ये नैर्ऋत्यकोणे सवरुणपवने वज्रहस्ताब्धिवक्त्रा २६
रौद्री लक्ष्म्युत्तरेशे प्रहरणसहितालिङ्गितोपायकाया
योगिन्योऽष्टाष्टकायाः कमलदलगता नायिकावर्णवर्णाः ।
पूर्वादौ कर्त्तिका च प्रथमकरतलात् शूलचक्रं गदा च
दण्डं खड्गश्च शक्तिर्यमकरकमले दक्षिणे चाङ्कुशो वै २७
वज्रं बाणश्च पद्मं तडिदनलनिभो ब्रह्मदण्डस्त्रिशूलं
नानारत्नैर्निबद्धः सरवडमरुकः पद्ममेवाक्षसूत्रम् ।
वामे शक्तिश्च खट्वाङ्गमपि च कमलं कम्बुकः शृङ्खला च
खेटो वै वज्रपाशो प्रगुणरणरणद्वज्रघण्टा च चापम् ॥२८॥
कुण्डीपात्रं च खट्वाङ्गमहिरपि ततस्तोयजं रत्नमेव
योगिन्योऽष्टाष्टकायाः कमलवसुदले शस्त्रहस्ताश्च तद्वत् ।
भीमोग्रा कालदंष्ट्रा ज्वलदनलमुखा वायुवेगा प्रचण्डा
रौद्राक्षी स्थूलनासा कमलवसुदले चर्चिकायाः स्वदिक्षु २९
श्रीर्माया कीर्त्तिलक्ष्म्यौ सुपरमविषया श्रीजया श्रीजयन्ती
श्रीचक्री चाष्टमा वै कमलवसुदले वैष्णवी दिक्प्रदेशे ।
कङ्काली कालरात्री प्रकुपितवदना कालजिह्वा कराली
काली घोरा विरूपा कमलवसुदले शूकरी यत्र देवी ॥३०॥
पद्मानङ्गा कुमारी मृगपतिगमना रत्नमाला सुनेत्रा

---

व° [3] ने. शुक्ल° [4] ने. वस्त्रे [5] ने. °रा [6] ने. °फले [7] ने. भक्षपात्रं [8] ने. °हस्ताः [9] ने. पात्री [10] ने. तथैव [11] ने. °क्र

क्लीना भद्राब्जपत्रे वरशिखिगमना नायिका यत्र राजन् ।
वज्राभा वज्रगात्रा वरकनकवती चोर्वशी चित्रलेखा
रम्भा हल्या सुतारा कमलवसुदले वज्रहस्तादिदैवे ॥३१॥
सावित्री पद्मनेत्रा खलु जलजवती बुद्धिवागीश्वरी द्वे
गायत्री विद्युदेव स्मृतिरपि कमले वेदवक्त्रादिदैवे ।
गौरी गङ्गा च नित्या सुपरमतुरिता तोतला लक्ष्मणा च
पिङ्गा कृष्णा तथाष्टौ कमलवसुदले नायकी यत्र रौद्री ३२
श्रीश्वेता चन्द्रलेखा शशधरवदना हंसवर्णा धृतिश्च
पद्मेशा तारनेत्रा विमलशशधरा चेशपद्मे सचिह्ना ।
तद्बाह्ये सूर्यपद्मे दनुकचलयमा पावकः षण्मुखश्च
यक्षः शक्रोऽब्धिवक्त्रः पशुपतिरुदधिः श्रीगणेन्द्रश्च विष्णुः ३३
खड्गं कर्त्री द्रुमेन्द्रः सुरतरुकुसुमं दण्डखड्गश्च शक्तिः
दण्डः खड्गश्च[1] कुन्तो मणिरपि च गदा वज्रमेवाग्निबाणः[2]
शूची चाप्यक्षसूत्रं भवति करतले शूलबाणं च पाशो
रत्नं पर्शुश्च वज्रं भवति हरिकरे चक्रदण्डश्च सव्ये ३४
वामे खेटं कपालं त्वसितमणिरपि ह्युत्पलं शृङ्खला च
पाशोऽब्जं कुण्डिका वै भवति नरपते वामहस्ते क्रमेण ।
रत्नादर्शश्च तद्वत् सनकुलजलजं वज्रघण्टा च चापं
पद्मं वै कुण्डिकाहिर्धनुरपि च तथा नागपाशश्च रत्नम् ३५
पाशो रत्नं च पद्मं भवति दनुरिपोः पाञ्चजन्यश्च शङ्खश्
चैत्राद्याः पद्म[3]पत्रे वसुकरतिथयः कर्णिकायां द्विपूर्णाः ।
सर्वाः शून्यर्तुलोकाः परमशशिकला वेदितव्याब्जयोगाद्
द्वारे देव्यो रथस्थास्त्वसिकुलिशधराः साङ्कुशा बाणहस्ताः
॥३६॥
श्रीचक्रा दण्डहस्ता प्रकृतिगुणवशान्मुद्गरा कुन्तहस्ता
श्रीकर्त्री वज्रहस्ता खलु परशुकरा शूलहस्ता तु सव्ये ।
वामे खेटाहिहस्ता प्रकृतिगुणवशात् पाशकोदण्डहस्ता
शङ्खश्रीरत्नहस्ता कमलशशधरादर्शहस्ता च तद्वत् ॥३७॥
श्रीघण्टाशुक्तिहस्ता खलु भुजगकराप्येव खट्वाङ्गहस्ता
मारीच्याद्येकवक्त्रा युगकरकमला वेदितव्या क्रमेण ।
स्तम्भाधोऽप्यष्टनागा घटकुलिशकराः पद्ममाणिक्यहस्ता
वाय्वादौ मण्डले वै युगकरकमलाः पद्मकर्कोटनाद्याः ३८
श्वानास्या शूकरास्या खलु चलवलये जम्बुकास्या च दिक्षु
व्याघ्रास्या चोत्तरस्था चितिभुवनगता कर्त्तिकाशुक्ति[4]हस्ता।
काकास्या गृध्रवक्त्रा खगपतिवदनोलूकवक्त्रा च कोणे
वज्राक्षी चाति[5]नीला ऽसि[5] नभसि गते भूतयोनिश्चलान्ते
॥३९॥
रक्तप्रेतं खगेन्द्रो महिषशिखिगजा हंसगोपञ्चवक्त्राश्
चामुण्डादेः क्रमेण प्रभवति कमलान्यासनं दिग्विदिक्षु ।
दैतेयानां[6] च तद्वद्धनपतिशिखिनोऽब्धिवायोर्गणस्य
मातङ्गेशश्च मेषो मकर इति मृगो मूषकश्च क्रमेण ४०
भेरुण्डः क्रुञ्चनीलेक्षणगुदवदना काकवक्त्रादिकोणे
खड्गी ऋक्षश्च सिंहः प्रभवति चमरी श्वानवक्त्रादिदिक्षु ।
वज्राक्षा अष्टपादस्त्ववनितलगतो व्योम्नि नीला रथस्य
सक्रूरः पञ्चवर्णास्त्वनिल इति खगः स्फीतगात्रस्त्रिनेत्रः ४१
मारीच्याः शूकराः स्युर्हयगजहरयः सप्तसंख्या रथेषु
चुन्दायाः शृङ्खलायाः सुरयमवरुणे चोत्तरे वै भृकुट्याः ।
गन्धा माला च पूर्वे यमवरुणगते धूपदीपे च लास्या
हास्या वाद्या च नृत्या धनदभुवि तले चाम्बरे गीतकामा
॥४२॥
गर्भेऽष्टौ वेदिकायां गगनतलगते तोरणाधो नियोज्य
धारिण्यः पट्टिकायां फणिकुलसहिता वेदिकायां प्रतीच्छाः ।
विद्वेषस्तोभनेच्छा प्रभवति नृपते पौष्टिकं स्तम्भनेच्छा
तारादेव्यादिशुद्धया त्रिभुवनजननी मारणोत्पादनेच्छा ४३
वाद्येच्छा भूषणेच्छा भवति नरपते भोजनेच्छा तृतीया
गन्धेच्छा चांशुकेच्छा प्रकटितनियता मैथुनेच्छा च षष्ठी ।
काये कण्डूयनेच्छा वदनगतकफोत्सर्जनेऽङ्गे मलेच्छा
नृत्येच्छा चासनेच्छा पयसि च शयने प्लावने मज्जनेच्छा
॥४४॥
चामुण्डाद्यष्टकृत्यान्यपि च भुवि तले क्रोधजानां तथेच्छा
संतापे बन्धनेच्छा खलु मृदुवचने शोषणोच्चाटनेच्छा ।
स्पर्शाकृष्टौ च बन्धे भवति नरपते कीलने धावनेच्छा
सर्वाङ्गक्षोदनेच्छा प्रकटितनियता मूत्रविट्स्रावणेच्छा ४५
सत्त्वानां वञ्चनेच्छा खलु बहुकलहे पञ्चमोच्छिष्टभक्ते
संग्रामेच्छा हि बन्धे भवति दनुकुले दारकाक्रोधनेच्छा ।
सप्तत्रिंशत्प्रतीच्छा पुनरपि च ततो मण्डले बाह्यवेद्यां
यत्किञ्चित्सत्त्वकृत्यं प्रतिदिनसमये योगिनीकृत्यमत्र ॥४६॥
इत्येवं वज्रिणश्च त्रिभुवनसकलं मण्डलाकारयुक्तं

बाह्ये देहे परे च
तस्मिन्नित्यः खव
नो नित्यं भूतवृन्द
नित्यानित्यं च दृ
वक्तव्यं साधनं वै
यत्साध्यं साधकः
तस्माद्राजन् स्वगि
श्रीवज्री चित्तवज्र
वाग्वज्रं देवतान
स्कन्धं नालं त्वक
मध्ये श्रीकर्णिका
होः[7]काराद्यन्तगम
प्रज्ञारागद्रुतं तत्
गीतं कुर्वन्त्यदेव्य
अस्मान्रक्षाहि व
गीतं श्रुत्वा स व
धृष्ट्वोत्पत्तिं करोति
वज्रालङ्कारयुक्तं
प्रज्ञोपायेन राजन्
नीलाभं भीमका
गर्जन्तं सूर्यनेत्रं
प्रज्ञोपायोद्भवन्तं
अष्टांघ्रिं स्यन्दन
नाभौ हत्वाङ्कुशं
हस्तेष्वेवं प्रबुद्धाः
साध्यं कृत्वा सम
वेशं बन्धं च तो
चिह्नं निष्पत्तिय
पूर्वे श्रीकृष्णदीप
वामे श्रीश्वेतदी
धूमाग्नेय्यां मरी
वायव्यां श्रीप्रदी
वह्नौ वायौ च
पूर्वे संस्कारपृथ

[1] ने. शक्तिश्च [2] ने. °णाः [3] ने. पद्मे [4] ने. °पाश° [5] ने. °नीलाःसिनभसिन° [6] के. दैत्यानां [7] ने. हो° [8] ° ने. °दा [9] ने

बाह्ये देहे परे च स्फुरणनिधनते संस्थितिर्वस्तुजातेः ।
तस्मिन्नित्यः खवज्रस्त्रिविधभवगतोऽनित्यतां न प्रयाति
नो नित्यं भूतवृन्दं भवति नरपते शक्रजालं यथैव ।।४७।।
नित्यानित्यं च दृष्ट्वा तदपि जलधियां चित्तशुद्ध्यर्थहेतोर्
वक्तव्यं साधनं वै न हि हृदयगतः साध्यते कश्चिदत्र ।
यत्साध्यं साधकः स भ्रममिति सकलं साधनं वज्रिणो यत्
तस्माद्राजन् स्वचित्तं व्यपगतकलुषं मण्डलेशं प्रकुर्यात् ४८
श्रीवज्री चित्तवज्रं भवति नरपते मण्डलं कायवज्रं
वाग्वज्रं देवतानामपि कलिकुलजं चक्रमिन्द्वग्निमूर्ध्नि ।
स्कन्धं नालं त्वकारो दलमपि च तथा केशराण्यप्युकारो
मध्ये श्रीकर्णिका च द्विविधपथगतौ चन्द्रसूर्यौ मकारः ४९
होः[७]काराद्यन्तगर्भे शमसुखफलदे[८] कायवाक्चित्तवज्रं
प्रज्ञारागद्रुतं तत् शशिनमिव विभुं वज्रिणं चेक्षयित्वा ।
गीतं कुर्वन्त्यदेव्यस्त्वमपि हि भगवन् सर्वसत्त्वोपकारी
अस्मान्रक्षाहि वज्रिन् त्रिदशनरगुरो कामकामार्थिनीश्च ५०
गीतं श्रुत्वा स वज्री त्रिभुवनसकलं त्विन्द्रजालोपमं वै
धृष्ट्वोत्पत्तिं करोति स्फुरदमलकरं स्फारयित्वा स्वचिह्नम्[९] ।
वज्रालङ्कारयुक्तो जिनपतिमुकुटः प्रज्ञयालिङ्गितश्च
प्रज्ञोपायेन राजन् पुनरपि सकलं मण्डलोत्सर्जनं च ।।५१।।
नीलाभं भीमकायं प्रहसितवदनं चार्धदंष्ट्राकरालं
गर्जन्तं सूर्यनेत्रं द्व्यधिकजिनकरं वेदवक्त्रं द्विपादम् ।
प्रज्ञोपायोद्भवन्तं प्रहरणसहितं प्रेषयेद्वज्रवेगं
अष्टांघ्रिं स्यन्दनस्थं जिनरिपुमथनं ज्ञानचक्रस्य हेतोः ५२
नाभौ हृत्वाङ्कुशेन स्फुरदमलकरं ज्ञानचक्रेश्वरं वै
हस्तेष्वेवं प्रबुद्धाः स्वकुलिशफणिना भीषयित्वा च शस्त्रैः ।
साध्यं कृत्वा समस्तं व्रजति पुनरसौ चालयित्वा स्ववज्रं
वेशं बन्धं च तोषं समरसकरणं जम्भकादिः करोति ।।५३।।
चिह्नं निष्पत्तियोगे भवति स गगनं गर्भपद्मेऽग्निमूर्तिः
पूर्वे श्रीकृष्णदीप्ता वरकमलदले दक्षिणे रक्तपीता ।
वामे श्रीश्वेतदीप्ता भवति कुलवशात् पश्चिमे पीतदीप्ता
धूमाग्नेय्यां मरीचिर्दनुजदिशि तथा द्योतकेशप्रदेशे ।।५४।।
वायव्यां श्रीप्रदीपा मणिरपि च तरुर्धर्मगण्डी च शङ्खो
वह्नौ वायौ च दैत्ये हरदिशि च तथाभ्यन्तरे कोणभागे ।
पूर्वे संस्कारपृथ्वौ खलु कमलगतौ दक्षिणे वेदनाम्भौ

[७] ने. हो°  [८] ° ने. °दा  [९] ने. °चित्तम्



वामे संज्ञा च वह्निर्भवति हि पवनं रूपमेवापरे च ।।५५।।
आग्नेय्यां वायुरूपे भवति दनुपतौ वह्निसंज्ञा द्वयं च
ईशेऽम्भो वेदना वै मरुति च धरणी स्कन्धसंस्कारयुक्ता ।
देवी बुद्धान्तरालेष्वमृतरसघटाश्चाष्टकक्षप्रदेशे
घ्राणो गन्धश्च पूर्वे पुनरपरपुटे दक्षिणे नेत्ररूपे ।।५६।।
वामे जिह्वारसं स्याद्भवति हि वरुणे स्पर्शकायस्तथैव
पाताले शब्दकर्णौ भवति कुलवशाद्दक्षिणे द्वारवामे ।
चित्तं वै धर्मधातुर्भवति च गगने सर्वतो द्वारवामे
आदौ चोपायषट्कं भवति जिनवशान्मण्डलस्याधिदैवम्५७
पश्चात् प्रज्ञादिषट्कं प्रकटमधिपतिः[१] स्वस्वपद्मासने च
पूर्वद्वारे प्रचण्डस्त्वसिधृगतिबलः स्तम्भकी तस्य मुद्रा ।
सव्ये जम्भश्च मानी भवति च धनदे सालको जम्भकी च
स्तम्भश्चानन्तवीर्यो भवति हि वरुणे द्वारमध्यस्थपद्मे[२] ५८
मारीची नीलदण्डोऽचल इति भृकुटी शृङ्खलानन्तवीर्यष्
टक्किश्चुन्दा रथस्था सुरधनदपरे दक्षिणे द्वारमध्ये ।
सुम्भो रौद्रेक्षणाधो भवति नभसि चोष्णीष एवातिनीला
पूर्वद्वारापरार्धे भवति च नियतं स्यन्दनश्च द्वयोश्च ।।५९।।
वाग्जाते मण्डले वै भवति वसुदिशा स्वासनं भूतजानां
चामुण्डेन्द्रश्च पूर्वे भवति शिखिनि वै वैष्णवी वेदवक्त्रा ।
याम्ये रुद्रो वराही भवति दनुपतौ षण्मुखी विघ्ननाथ
ऐन्द्री दैत्यो परे स्यात् खलु युगवदना मारुते विष्णुरेव ६०
यक्षे रौद्री यमः स्याद्भवति पशुपतौ षण्मुखश्चैव लक्ष्मीर्
बाह्येन्द्रद्वारसव्ये भवति दनुपती राक्षसी तस्य मुद्रा ।
वह्नौ वायुप्रचण्डा हरिरपि वरुणा दक्षिणे द्वारसव्ये
लक्ष्मीः श्रीः षण्मुखो वै भवति दनुपतौ पश्चिमे वायवीन्द्रौ
।।६१।।
वायौ ब्रह्मा च विद्युद्भवति हि धनदे सागरः शूकरी च
कौमारीशे गणेशः खलु धनदयमद्वारयोर्वामभागे ।
रुद्रः कालश्च विष्णुर्धनद इति सुरे चापरे द्वारवामे
तेषां मुद्रा प्रसिद्धा भवति गिरिसुता यामिनी श्रीर्धनेशा ६२
बाह्ये नागाः समस्ताः सुरयमधनदे पश्चिमे वेदिकायां
पद्मः कर्कोटको वै चलवलयगतौ वासुकिः शङ्खपालः ।
वह्निस्थौ तोयमूर्ध्नि प्रभवति कुलिकोऽनन्तनागः प्रसिद्धस्
तद्वद्भूमण्डलस्थो भवति कुलवशात्तक्षको वै महाब्जः ।।६३।।

[१] ने. °मपिमतः  [२] ने. °मध्ये  [३] ने. °ख्ये  [४] ने. °ले

मेवापरे च ।।५५।।
संज्ञा द्वयं च
कन्धसंस्कारयुक्ता ।
क्षप्रदेशे
नेत्ररूपे ।।५६।।
स्पर्शकायस्तथैव
णे द्वारवामे ।
ो द्वारवामे
ण्डलस्याधिदैवम्५७
स्वस्वपद्मासने च
की तस्य मुद्रा ।
ालको जम्भकी च
ारमध्यस्थपद्मे[2] ५८
ृङ्खलानन्तवीर्यष्
णे द्वारमध्ये ।
णीष एवातिनीला
श्च द्वयोश्च ।।५९।।
ासनं भूतजानां
ैष्णवी वेदवक्त्रा ।
ुखी विघ्ननाथ
मारुते विष्णुरेव ६०
ण्मुखश्चैव लक्ष्मीर्
ो तस्य मुद्रा ।
णे द्वारसव्ये
ौ पश्चिमे वायवीन्द्रौ
।।६१।।
ागर: शूकरी च
र्वमिभागे ।
परे द्वारवामे
मिनी श्रीर्धनेशा ६२
चमे वेदिकायां
क: शङ्खपाल: ।
न्तनाग: प्रसिद्धस्
वै महाब्ज: ।।६३।।

तेषां प्रज्ञा: प्रचण्डाश्चितिभुवनगता: श्वानवक्त्रादयश्च
तासां पद्माद्युपायास्त्वपरकुलवशात् सत्सुखार्थं भवन्ति ।
श्वानास्या पूर्वचक्रे चलवलयगता शूलभेदे श्मशाने
याम्ये वै शूकरास्या खलु शवदहने चोत्तरे व्याघ्रवक्त्रा ६४
सक्लिन्ने पूतिगन्धे भवति च वरुणे जम्बुकास्या तथैव
उच्छिष्टे घोरयुद्धे शिखिनि दनुपतौ काकवक्त्रा सगृध्रा ।
वायव्ये सर्पदंशे खगपतिवदना चोत्तरे बालमृत्यौ
चक्रस्थोलूकवक्त्रा महिवलयगतौ चन्द्रसूर्यौ च भाव्यौ ६५
प्रत्यालीढं हि मातुर्भवति समपदं यत्र देवी गणस्य
प्रत्यालीढं विशाखं दशवसुगणयोर्मण्डलं चासुरीणाम् ।
प्रत्यालीढे स्थितानां खलु भवति समापत्तिरालीढपादं
वैशाखाख्यं विशाखे[3] भवति च नियतं मण्डलं[4] मण्डले च ६६
शेषा वज्रासनस्था: प्रकटितनियता देवता मण्डले च
देव्य: पद्मासनस्था: स्वकुलदिशिगता: स्वस्वपद्मेन्दुमूर्ध्नि ।
देवा वज्रासनस्था: फणिकुलसहिता: स्वस्वदिग्वाहनस्था:
पत्रे[5] देव्य: सुराणां खलु ललितपदा भूतजानां तथैव ६७
सव्यैराकुञ्चितैश्च क्षितितलनिहितै: सारितैर्बालपादै:
प्रत्यालीढं पदं तद्भवति नरपते सार्धहस्तद्वयेन ।
आलीढं वामयोगाद्भवति समपदं पादयुग्मे समे च
वैशाखं मण्डलं यद्भवति गुणवशाज्जानुयुग्मप्रसारात् ।।६८।।
किञ्चिज्जान्वर्धवज्रे भवति हि ललितं शेषमेवं प्रसिद्धं
ज्ञातव्यं योगिना वै पुनरपि च भवेद्वज्रनृत्यस्य हेतो: ।
वज्रस्यान्योन्यवज्रो भवति हि मुकुटे पञ्च बुद्धा: कदाचिद्
रूपस्याक्षोभ्य ऊर्ध्वं स्फुटकमलधरस्यैव वैरोचन: स्यात् ६९
रत्नेशस्याब्जधारी प्रवर मणिकरोऽमोघसिद्धेश्च मौलौ
षण्णां मौलिर्यथाख्या भवति गुणवशाच्छेषचक्रस्य चान्यत् ।
भूमौ चक्रप्रसूतिर्भवति हि कमलस्योदकेऽग्नौ मणेश्च
वायौ खड्गश्च शून्ये भवति हि कुलिशस्याक्षरे कर्त्तिकाया:
।।७०।।
वस्त्रं पीयूषपात्रं प्रभवति हि तथादर्शमाला च वीणा
षष्ठो धर्मोदयो वै क्षितिजलहुतभुग्मारुताकाश[6]शान्तात् ।
खेटं कुन्तं च बाणं[7] परशुडमरुकौ पञ्च चिह्नानि तद्वद्
दण्ड: पाशोऽ[8]ङ्कुशो वै भवति खलु तथा मुद्गरं च त्रिशूलम्
।।७१।।

कोदण्डश्चोपलं वै पुनरपि च तथा वज्रखट्वाङ्गघण्टा
एवं वै शृङ्खलाद्यं जलधरचमकं द्वीपिचर्मेभचर्म ।
शेषाण्यत्रोपचिह्नान्यवनिजलहुताशानिलाकाशजानि
ज्ञातव्यान्येव तानि प्रकृतिगुणवशाद्देवतादैवतीनाम् ।।७२।।
लाद्यास्त्रिंशत्स्वरा ये क्षितिजलहुतभुग्मारुताकाशजाता
चिह्नानां ते स्वमन्त्रा: क्रमपरिरचिता ह्रस्वदीर्घप्रभेदै: ।
चक्रादीनां समस्ता: खलु कमलगताश्चन्द्रसूर्यासनस्था:
षष्ठं यत्रैव चिह्नं भवति गुणवशात् तत्र चानाहतं स्यात्
।।७३।।
नाद: श्रीवज्रसत्त्वो भवति नरपते चित्तवज्रस्त्वकारो
ह्रस्वेकारश्च खड्गी भवति पुन ऋकारश्च वै रत्नपाणि: ।
ह्रस्वोकारोऽमिताभो भवति पुनर्ऌकारोऽत्र वैरोचनश्च
दीर्घं भावप्रभेदै: सुरगणसकलं षज्जिनानां क्रमेण ।।७४।।
श्रीमाताऽनाहताख्या भवति खलु तथाऽकारजाकाशधातुर्
ईॠऊॡक्रमस्था मरुदनलजलस्यासु सर्वा भवन्ति ।
अन्योन्यं कायभावौ परमजिनपतिर्विश्वमाता सुखार्थम्
अक्षोभ्य: शून्यधातुस्त्वसिकरकमलो लोचना कायभावौ ७५
रत्नेशो मामकी च त्वपि कमलधर: पाण्डरा कायभावौ
तद्वच्चक्री च तारा प्रकृतिगुणवशाद् ह्रस्वदीर्घस्वरैश्च ।
अंकारो विश्वभद्रो भवति तनुवशाद्वज्रपाणिस्त्वकारो
ह्रस्वोकार: खगर्भोऽरपि भवति तथा भूमिगर्भश्च सम्यक् ७६
ओकारो लोकनाथोऽलपि भवति तथा चात्र विष्कम्भिकाय:
आ:कारो धर्मधातुर्भवति खलु तथा आकारजा शब्दवज्रा ।
एकार: स्पर्शवज्रा खलु रसकुलिशार्कारजा कायभेदाद्
औकारो रूपवज्रा भवति नृप तथाल्कारजा गन्धवज्रा ७७
श्रीभद्रो धर्मधातुस्त्वपि रवकुलिशा वज्रपाणिश्च युग्मं
वैगर्भो गन्धवज्रा वररसकुलिशा लोकनाथश्च युग्मम् ।
भूगर्भो रूपवज्रा भवति हि युगलं स्पर्शविष्कम्भिणो च
एवं वै षट्कुलानि प्रकृतिगुणवशाद्वेदितव्यानि सम्यक् ७८
हंकारोष्णीषचक्री भवति तनुवशादत्र हश्चातिनीला:
सुम्भो ह्रस्वो हकारो भवति नृप तथा दीर्घजा रौद्रनेत्रा ।
यंलायुग्मक्रमेण प्रकटमतिबलस्तम्भकीटेव युग्मं
रंवा जम्भश्च मानी वमपर इति वै मानको जम्भकी स्यात्
।।७९।।

---

. °ख्ये [4] ने. °ले [5] ने. पश्चा [6] ने. °शं [7] ने. वाक्यं [8] ने. पाशा°

लंयास्तम्भोऽभिवीर्या भवति यरवलं नीलदण्डोऽचलश्च
टक्किश्चानन्तवीर्यो भवति तनुवशाद्देवतीनां च दीर्घा ।
यारावालास्तथा स्युर्गजतुरगहरिस्यन्दने शूकरे च
मारीची नीलदण्डोऽचल इति भृकुटी शृङ्खलानन्तवीर्यः ८०
टक्किश्चुन्दा च युग्मं भवति नरपते मण्डले सत्सुखार्थम्
आकारावं विसर्गो हमपि ह इति हहाकारजाः शक्तयोऽष्टौ।
कुम्भेष्वेवं हकारो मरुदनलजलक्ष्मासुरैर्भेदितः स्यात्
ॐहूंहोः आश्च शङ्खत्वमलगुणमणिश्चांघ्रिपो धर्मगण्डी ८१
चामुण्डा वै हकारो हमपि ह इति चापीश्वरी शूकरी च
हा क्ष क्षा क्षं क्ष ऐन्द्री खगपतिगमना ब्रह्मका श्रीः कुमारी।
डीही हहृत् पृष्ठे वरकमलदले ह्रस्वमात्राग्रतश्च
क्षीक्षूक्षुक्षृ तथैव प्रकटितनियता ह्रस्वमात्राश्च तद्वत् ।।८२।।
पूर्वे सव्येऽवसव्ये वरुणहविदनावीशवाय्वोश्च पद्मे
पद्माः षण्मात्रभिन्नाः क्रमपरिरचिताः षड्दले ह्रस्वदीर्घाः।
हि क्षाद्यानोऽन्तसर्वा वसुफणिगुणिता दैवतीनां दलेषु
चामुण्डादेरुपायो भवति कुलवशात् संमुखो मन्त्रभेदैः ।।८३।।
तं नः शक्रोऽब्धिवक्त्र पमिति म इति वै सागरः श्रीगणेन्द्रष्
टं णो वह्निः कुमारो चमपि ञ इति वै राक्षसेन्द्रश्च वायुः।
कं ङो विष्णुश्च कालो हर इति धनदो वै षमत्र ःक एव
चाद्या वर्गाः समात्राः सुरकमलदले देवतीनां भवन्ति ८४
चैत्रादीनां तिथीनाम् ऋतुनियमवशात् शून्यषड्वह्निसंख्या
तत्त्वारूढो हकारो मरुदनलजलक्ष्मासु पूर्वाद्यहीनाम् ।
कूटस्थाः सप्तवर्गाः क्षयरवलयुताश्चासुरीणां श्मशाने
प्रज्ञोपायाङ्गभावैर्भवति कुलवशात् संमुखोऽत्र यस्य ।।८५।।
श्रीवज्री विश्वभद्रो भवति कुलवशाद्वज्रधृग्वज्रपाणिर्
वैगर्भोऽमोघसिद्धिर्विमलमणिकरो भूमिगर्भश्च सम्यक् ।
विष्कम्भी वज्रपाणिर्भवति कुलवशाल्लोकनाथोऽमिताभः
श्रीमाता धर्मधातुस्त्वपि खकुलिशा धर्मधात्वीश्वरी च ८६
श्रीतारा स्पर्शवज्रा खलु रसकुलिशा पाण्डरा जातिभेदाद्
रूपाख्या मामकी वै भवति कुलवशाल्लोचना गन्धवज्रा ।
क्रोधेन्द्रो वज्रवेगो भवति जिनपतिर्विश्वभद्रः स एव
उष्णीषोऽक्षोभ्य एवात्र पुनरति[1]बलोऽमोघसिद्धिः प्रसिद्धः ८७
जम्भो वै रत्नपाणिर्भवति कुलवशान्मानकश्चामिताभः
स्तम्भो वैरोचनश्च प्रभवति बलवान् वज्रपाणिश्च सुम्भः ।
वैगर्भो नीलदण्डः प्रकृतिगुणवशाद्भूमिगर्भश्च टक्किर्
विष्कम्भी चातिवीर्यो भवति कुलवशाल्लोकनाथोऽचलश्च
।।८८।।
माता क्रोधेन्द्रमुद्रा भवति कुलवशाद्धर्मधातुस्तथैव
शून्याख्या चातिनीला मरुदनलजलक्ष्मादयोऽनन्तवीर्या ।
जम्भी मानी क्रमेण प्रकटितनियता स्तम्भकी च प्रसिद्धा
रौद्राक्षी शब्दवज्रा भवति कुलवशात् शृङ्खला स्पर्शवज्रा ८९
मारीची गन्धवज्रा प्रभवति भृकुटी चैव चुन्दा प्रसिद्धा
ज्ञातव्या जातिभेदात् खलु रसकुलिशा रूपवज्रा नरेन्द्र ।
स्तम्भः कालान्तकोऽत्रैव पुनरतिबलो विघ्नशत्रुः प्रसिद्धो
जम्भः प्रज्ञान्तको वै प्रभवति च तथा मानकः पद्मशत्रुः ९०
चामुण्डा शूकरी सा मरुदनलजलक्ष्मा तथैन्द्री चतुर्थी
गन्धो रूपं रसः स्पर्श इति चलहरे दैत्यवह्नौ स्थिताश्च ।
ब्रह्मा वैरोचनो वै भवति कुलवशात् सागरश्चामिताभो
वह्निः श्रीरत्नपाणिर्भवति हि पवनोऽमोघसिद्धिस्तथैव ९१
अक्षोभ्यो दैत्यशत्रुर्भवति नरपतेः शङ्करश्च प्रसिद्धो
विष्कम्भी यः स शक्रो भवति गणपतिर्लोकनाथस्तथैव ।
भूगर्भः षण्मुखः स्याद्भवति दनुपतिः श्रीखगर्भः प्रसिद्धः
कालः श्रीवज्रपाणिर्भवति धनपतिर्विश्वभद्रश्च षष्ठः ।।९२।।
षड्विद्याः षट् च वज्राः प्रकृतिगुणवशात् स्वस्वमुद्राश्च तेषां
मुद्राविद्यादयोऽर्काः सुरवरपतयः श्वेतकृष्णाश्च पूर्णाः ।
तेषां याः पद्मपत्रे वसुकरतिथयो माघमासादयस्ताः
षण्मासे पूर्वषट्कं भवति कुलवशाच्चापरं देवतीनाम् ।।९३।।
ये नागाष्टौ घटास्ते विभुकमलदले शक्तयस्ताः प्रचण्डाः
श्रीधूमा काकवक्त्रा भवति कुलवशात् गृध्रवक्त्रा मरीचिः।
खद्योतोलूकवक्त्रा खगपतिवदना श्रीप्रदीपा प्रसिद्धा
श्वानास्या कृष्णदीप्ता सुविकृतवदना शूकरास्यार्कदीप्ता ९४
व्याघ्रास्या श्वेतदीप्ता भवति कुलवशाज्जम्बुकी पीतदीप्ता
एवं लास्यादि सर्वाः प्रकटदशविधा विश्वमातावशेषाः ।
दिव्या बुद्धाश्च विद्याः सतरुसकलशाः शुद्धकायो जिनस्य
क्रोधेन्द्रा बोधिसत्त्वाः खलु रसकुलिशा धर्मकायः स एव ९५
योगिन्यो भोगकायः प्रवर रथगताः सूर्यदेवाः प्रसिद्धा
अष्टौ नागाः प्रचण्डाः परिजनसहिता बुद्धनिर्माणकायः ।
एवं भूयो द्विभेदो भवति जिनतनुर्बाह्यतोऽभ्यन्तरे च

गर्भोत्पत्तिर्यथैव प्र
शास्ता दिव्यादिकु
बुद्धाद्या धर्मकायः
क्रोधो निर्माणकायं
चामुण्डाद्यष्टदेव्यः
देवाद्या[2] धर्मकाय
चण्डा निर्माणकायं
युग्मं स्यात् कायव
वाग्वज्रं धर्मकायो
चित्तं संभोगकायो
ज्ञानं निर्माणकायो
प्रज्ञोपायाङ्गभावैः
चन्द्रादित्यादिकाद्दै
वज्रैः स्वाहान्तयुक्तै
एतैश्चाधिष्ठिताङ्ग
शून्ये वै धर्मधातौ
वक्तव्यं साधकेन
कुम्भैर्धूमादिभिश्च
विद्याभिश्चैव बुद्धै
कण्ठे संभोगचक्रं
नाभौ निर्माणचक्रं

बाहोः पादस्य सन्ध
चण्डा नागैः क्रिया
श्रीवज्री कालशुद्ध
चित्ताकारो न चा

धूमाद्या वायुशुद्धाः
रुद्रः क्लेशैः सभाय
शङ्खो गण्डी मणि
कुम्भाश्चाष्टामृता

संस्कारोऽमोघसिद्धि
संज्ञारूपं हि चक्री

[1] ने. पुनरपि [2] के. देव्याद्या [3] ने. °विश्व° [4] ने. वार्कः

गर्भोत्पत्तिर्यथैव प्रभवति नियता मण्डले तद्वदेव ॥९६॥
शास्ता दिव्यादिकुम्भाः सहजजिनतनुर्मण्डले गर्भमध्ये
बुद्धाद्या धर्मकायः खलु रसकुलिशाद्याश्च संभोगकायः ।
क्रोधो निर्माणकायो भवति कुलवशान्मण्डले गर्भसंस्थाश्
चामुण्डाद्यष्टदेव्यः परिजनसहिताः शुद्धकायो हि बाह्ये ९७
देवाद्या[2] धर्मकायः सकलफणिकुलं चात्र संभोगकायश्
चण्डा निर्माणकायो भवति नरपते सर्वसत्त्वार्थहेतोः ।
युग्मं स्यात् कायवज्रं सहजजिनतनुर्बिम्ब[3]निष्पत्तिहेतोर्
वाग्वज्रं धर्मकायो भवति च युगलं धर्मतादेशनार्थम् ९८
चित्तं संभोगकायो युगलमपि भवेत् सर्वसत्त्वार्थकर्ता
ज्ञानं निर्माणकायो भवति हि युगलं प्राणिनां मोक्षदं वै ।
प्रज्ञोपायाङ्गभावैः समविषमकुलैर्योगिना वेदितव्यं
चन्द्रादित्यादिकाद्यैस्त्रिविधभवगतैर्ज्ञानविज्ञानभेदैः ॥९९॥
वज्रैः स्वाहान्तयुक्तैः शिरसि गलहृदो नाभिगुह्ये च मूर्ध्नि
एतैश्चाधिष्ठिताङ्गं परमजिनपतिं स्नापयेद्देवतीभिः ।
शून्ये वै धर्मधातौ त्रिकुलिशसमये ज्ञानपूजानुरागे
वक्तव्यं साधकेन त्रिशरणगमनात्तत्स्वभावात्मकोऽहम् १००
कुम्भैर्धूमादिभिश्च प्रभवति हृदये चाष्टभिर्धर्मचक्रं
विद्याभिश्चैव बुद्धैः शिरसि च सहजं षोडशारं प्रसिद्धम् ।
कण्ठे संभोगचक्रं द्विगुणनृपतिभिर्बोधिसत्त्वादिभिः स्यान्
नाभौ निर्माणचक्रं वसुफणिगुणिताभिश्च भीमादिभिः स्यात्
॥१०१॥
बाहोः पादस्य सन्धौ नवतियुगहतैः कर्मचक्रं स्वरैश्च
चण्डा नागैः क्रियाख्यं भवति नृपतिभिश्चाङ्गुलीपर्वसन्धौ ।
श्रीवज्री कालशुद्धया भवति नरपते वर्षमासादिभेदैश्
चित्ताकारो न चार्कः[4] प्रतिदिवसवशाद्विश्वमाता विशुद्धा
॥१०२॥
धूमाद्या वायुशुद्धाः सुहृदयकमले नाभिचक्रे स्थिताश्च
रुद्रः क्लेशैः सभार्यो विभुचरणतले मारवृन्दैश्च मारः ।
शङ्खो गण्डी मणिश्च द्रुम इति च तथा कायवज्रादिभिश्च
कुम्भाश्चाष्टामृताङ्गैर्जयविजयघटैर्बोधिचित्तादिना च
॥१०३॥
संस्कारोऽमोघसिद्धिर्विमलमणिकरो वेदना चामिताभः
संज्ञारूपं हि चक्री शशिपलरुधिरैर्मूत्रविड्भ्यां विशुद्धाः ।



षड्देव्यो धातुभिर्वै विषयविषयिभिर्बोधिसत्त्वाः समुद्राः
पञ्चक्रोधाबलैर्वै खलु पुनरपरा चेन्द्रियैः पञ्च चान्यैः
॥१०४॥
चामुण्डाद्यष्टयामैः कमलदलगताः सूर्यलग्नैर्घटीभिर्
दैत्याद्याः सूर्यमासैः कमलदलगता नाडिकाश्वाससंख्यैः ।
नागाश्चण्डाश्च गुह्ये द्विगुणनृपतिभिर्नाडिकाभिर्विशुद्धा
एवं चेच्छादयस्ताः प्रकृतिगुणवशात् कायकृत्यैर्विशुद्धाः १०५
केशैः सिद्धाः समस्ताश्चितिभुवनगतं लोमभिर्भूतवृन्दं
तत्त्वैरन्त्राणि भर्तुः प्रकृतिगुणवशाद्धातुभिर्बाह्यमुद्रा ।
वज्रैरध्यात्ममुद्राः पविधरहृदये संस्थिता चन्द्रमूर्ध्नि
श्रीवज्री विश्वमाता त्रिविधभवगता चाक्षरज्ञानयोगात् १०६
श्रीशुद्धा धर्मकायो भवति खलु सुसंभोगकायो हि धर्माद्
भोगान्निर्माणकायो भवति जिनपतेः सर्वसत्त्वार्थहेतोः ।
तुर्यावस्थासु सुप्ता खलु पुनरपरा कायभेदात्तु जाग्रा
एवं कायप्रभेदैर्विहरति च मनः प्राणिनोऽङ्गे चतुर्धा १०७
निर्माणो भोगकर्तुः[1] प्रभवति हि मनः कायवागिन्द्रियैश्च
संभोगे दृष्टिचिन्तां व्रजति गुणवशाद्धर्मकाये च निद्राम् ।
शुद्धे सौख्यं प्रयाति त्वनुदिनसमये बिन्दुमोक्षं[2] त्रयान्ते
तस्मात् तद्भावनीयं प्रतिदिनसमये योगिना चाक्षरार्थम् १०८
वामे प्राणप्रचारः प्रभवति हि तथाङ्गचित्ते दक्षिणे यत्
प्रत्यालीढं पदं तत्समपदमपरालीढमप्यर्कचारात् ।
वैशाखं मण्डलं वै वरललितपदं पद्मवज्रासनं च
व्योमादौ च प्रचारः समविषमगतौ पञ्चधा प्राणवायोः
॥१०९॥
चण्डाली नाभिचक्रे नवहतभुजगे चर्चिकाद्याधिदैवे
होःकारज्ञानगर्भे तडिदनलनिभा ज्ञानतेजःप्रबुद्धा ।
नाभौ वैरोचनादीन् दहति नरपते लोचना चक्षुरादीन्
सर्वान् दग्ध्वा सुचन्द्राच्छ्रवति शिरसि यो बिन्दुरूपः स वज्री
॥११०॥
प्रज्ञाधर्मोदयस्थं पुनरपि सकलं स्फारितं बिन्दुना वै
नानालङ्कारयुक्तादरुणगतमिव ज्ञानचक्रं स्वयम्भूः ।
कामं रूपं ह्यरूपं त्रिविधमपि भवं शोषयित्वा क्रमेण
पश्चाज्ज्ञानार्चिरेषा त्रिभुवनसकलं ह्येकदा कर्षणीयम्
॥१११॥

[1] ने. °कर्तृ [2] ने. °मोक्ष [3] ने. सम° [4] ने. शुद्धेः [5] ने.

त्त्वाः समुद्राः
पञ्च चान्यैः
॥१०४॥
नैर्घटीभिर्
ाश्वाससंख्यैः ।
काभिर्विशुद्धा
कृत्यैर्विशुद्धाः १०५
भिर्भूतवृन्दं
र्बाह्यमुद्रा ।
चन्द्रमूर्ध्नि
रज्ञानयोगात् १०६
ायो हि धर्माद्
त्त्वार्थहेतोः ।
ात्तु जाग्रा
ङ्गे चतुर्धा १०७
यवागिन्द्रियैश्च
ये च निद्राम् ।
ोक्षं[२] त्रयान्ते
ा चाक्षरार्थम् १०८
ते दक्षिणे यत्
ारात् ।
सनं च
धा प्राणवायोः
॥१०९॥
ग्राधिदैवे
प्रबुद्धा ।
चक्षुरादीन्
बिन्दुरूपः स वज्री
॥११०॥
बिन्दुना वै
स्वयम्भूः ।
त्वा क्रमेण
कर्षणीयम्
॥१११॥

चन्द्रादित्यादिकाद्यैस्त्रिविधगतिगतः कायवज्रादिजापः
प्रत्याहारादिषड्भिः स्वकनककमले कायवाक्चित्तयोगः ।
आनन्दाद्यैस्तु वज्राब्जसमरसगतैर्भावनेयं त्रिवज्रा
प्रज्ञाब्जे चित्तबिन्दौ सहजसुखवशाद्भावनाऽनाहता स्यात्
॥११२॥

सेवा पञ्चामृताद्यैर्जलनिधिकुलिशैर्मन्त्रजापादिभिश्च
प्रत्याहारादिभिः स्यात् कुलिशकमलजेनामृतेनोपसिद्धिः ।
आनन्दाद्यैस्त्रिवज्राब्जसमरसगता भावना साधनं स्यात्
प्रज्ञासंज्ञेऽच्युतं यद्भवति खलु महासाधनं सूक्ष्मयोगात्
॥११३॥

आदौ वै शून्यता बोधिरपि खलु ततः संग्रहश्चन्द्रबिन्दोर्
बिम्बोत्पत्तिश्च तस्मात् प्रवर रसकुलैरक्षरन्यास एव ।
एषा सामान्यसेवा जलनिधिकुलिशैः साधनं मध्यमं च
अत्रोपायश्चतुर्धा भवति मृदुदृढः साधनाङ्गे तथैव ॥११४॥

प्रत्याहारो जिनेन्द्रो भवति दशविधो ध्यानमक्षोभ्य एव
प्राणायामश्च खड्गी पुनरपि दशधा धारणा रत्नपाणिः ।
डोम्ब्यां चानुस्मृतिः स्यादपि कमलधरः श्रीसमाधिश्च चक्री
एकैकः पञ्चभेदैः पुनरपि च यतो भिद्यते ह्यादिकाद्यैः
॥११५॥

प्रत्याहारो दशानां विषयविषयिनामप्रवृत्तिः शरीरे
प्रज्ञा तर्को विचारो रतिरचलसुखं ध्यानमप्येकचिह्नम् ।
प्राणायामो द्विमार्गस्खलनमपि भवेन्मध्यमे प्राणवेशो
बिन्दौ प्राणप्रवेशो ह्युभयगतिहतो धारणा चैकचित्तम्
॥११६॥

चण्डाल्यालोकनं यद्भवति खलु तनौ चाम्बरेऽनुस्मृतिः स्यात्
प्रज्ञोपायात्मकेनाक्षरणसुखवशात् ज्ञानबिम्बे समाधिः ।
एतन्मृद्वादिभेदैस्त्रिविधमपि भवेत् साधनं विश्वभर्तुस्
तिस्रो मुद्रास्त्रिमात्रास्त्रिविधगतिवशात् कर्मसंकल्पदिव्याः
॥११७॥

प्रत्याहारेण योगी विषयविरहितोऽधिष्ठ्यते सर्व[३]मन्त्रैः
पञ्चाभिज्ञानलाभी भवति नरपते ध्यानयोगेन शुद्धः ।
प्राणायामेन शुद्धः[४] शशिरविरहितः पूज्यते बोधिसत्त्वैर्
मारक्लेशादिनाशं विशति दशबलं धारणाया बलेन ११८
संशुद्धोऽनुस्मृतेः[५] स्याद्विमलमनसि भामण्डलं ज्ञानबिम्बात्

तस्माद् बुद्धः समाधौ कतिपयदिवसैः सिध्यते ज्ञानदेहः ।
प्रत्याहारादिभिर्वै यदि भवति न सा मन्त्रिणामिष्टसिद्धिर्
नादाभ्यासाद्धठेनाब्जगकुलिशमणौ साधयेद्बिन्दुरोधात् ११९
सेवायामादियोगो नभसि दशविधः चक्रिणः क्रोधदृष्टया
दृष्टया विघ्नान्तकस्यामृतपथगतया चोपमध्ये षडङ्गः ।
प्रज्ञास्पर्शेन्दुबिन्दोरपि कुलिशमणौ त्र्यक्षरः साधने स्यात्
सौख्यानष्टैकशान्तः सहज इह महासाधने ज्ञानयोगः १२०
प्राणायामः समन्तात् समसुखफलदो मस्तके यावदिष्टस्
तस्मादूर्ध्वं ह्यनिष्टो मरणभयकरः स्कन्धनिर्नाशहेतुः ।
उष्णीषं भेदयित्वा परमसुखपदे यो व्रजन् वै [नियोज्यः]
स्कन्धाभावेऽपि योगी विशति[६] समसुखं किन्तु लोकेऽप्रसिद्धः
॥१२१॥

मध्ये प्राणप्रवेशो विषयविरहितालिङ्गनं विश्वमातुः
पद्माविष्टः स्ववज्रस्फुरणमपि तथेन्द्वर्कमध्ये प्रवेशः ।
सौख्यं बीजाप्रपाते सुरतरतिगतं योगिनां योगमेतन्-
मुद्रासिद्धयर्थहेतोः परममपि विभो श्रीरहस्याद्रहस्यम् १२२
उष्णीषे पञ्चशूकं भवति हि कुलिशं बाह्यशूकं द्विगुण्यं
वज्रं स्याद्धर्मचक्रे द्विगुणितपरमं तस्य चान्यद्द्विगुण्यम् ।
तस्याप्यन्यं द्विगुण्यं भवति सहजसंभोगनिर्माणचक्रे
तद्गर्भेऽप्येकशूकं समसुखफलदं गुह्यपद्मोदरस्थम् ॥१२३॥

योगी प्राणातिपातं दिननिशि कुरुते प्राणनाशः स उक्तो
यः शब्दो वक्त्रहीनः प्रभवति हृदयेऽसौ मृषावाद एव ।
सर्वज्ञज्ञानभूमेर्ग्रहणमपि यद्योगिन स्तेयमुक्तं
सौख्यं बिन्दुप्रपाते भवति च परदारस्य सेवाविरागात् १२४
प्राणायामाननेन द्रवमपि शशिनः पानकं मद्यपानं
उष्णीषेऽङ्गुष्ठपर्वाद् व्रजति तिथिवशात् पूर्णिमान्ते
स्वचित्तम् ।
उष्णीपादङ्गुलीषु व्रजति पुनरिदं कृष्णपक्षावसाने
सा चर्या योगिनो वै प्रतिदिनसमये त्विष्टसिद्धिप्रदा या १२५
चित्ताकांक्षाज्वरोऽङ्गे वरसुखकमले शुक्तिरन्ता प्रवृत्तिः
कम्पोन्मादश्च घूर्मा प्रभवति मनसो विभ्रमस्तीव्रमूर्च्छा ।
धूमाद्या वज्रिणस्ताः प्रकटदशविधाः प्राणिनोऽङ्गे व्यवस्था
लोके ता मन्मथस्य प्रकटितनियता को जिनः कः सकामः
॥१२६॥

---

[४] ने. शुद्धेः [५] ने. °स्मृतः [६] ने. विषय

या बिन्दोः श्वेतधारा पततति दिननिशं मामकी सा सुरा नो
गोक्वाद्यं चक्षुरादेः स्फुरणमनुदिनं नान्यमांसं कदाचित् ।
सेवा पञ्चामृतानां स्वकुलभुवि गते दैवते सिद्धकाये
शून्ये चित्तप्रवेशात् समरसकरणं मैथुनं तन्न योनौ ॥१२७॥
दानं त्यागो धनस्याच्युतिरपि मनसः स्त्रीप्रसङ्गाच्च शीलं
क्षान्तिः शब्दाद्यवेशो ह्युभयगतिविनाशोऽनिलस्यैव वीर्यम् ।
ध्यानं प्रज्ञा च चित्तं सहजसुखगतं सर्वगा सर्वभाषा
तस्याः सर्वार्थसिद्धिर्भवति धनमजं प्राप्तिरन्याश्चतस्रः १२८
एकांशे शक्तियुक्ते नवपदसहिते पञ्चविंशात्मकाद्ये
ध्यानं मुद्रादयो वै कतिपयदिवसैः सिद्धयः संभवन्ति ।
स्तम्भं शान्तिं च वश्यं भुवननिधनतां वक्त्रभेदैः करोति
भूतानां मण्डलस्थो दनुभुजगकुलं साधयेद्भावितोऽसौ १२९
श्वेतः शान्तिं च पुष्टिं स्वमनसि कुरुते रक्त आकृष्टिवश्यं
पीतः स्तम्भं च मोहं कषणघननिभो मारणोच्चाटनं च ।
ध्यातं जप्तं तथैव स्वमनसि कुरुते कायवाक्चित्तवज्रं
भूतानां मण्डलस्थं त्रिभुवननिलये साधयेत् कर्मभेदैः १३०
पञ्चाधिक्योद्भवाभ्यां मणिकनकनिभाभ्यां च सव्येतराभ्यां
स्कन्धादिष्वेभचर्मोद्धृतमपि कमलं पाटयित्वांघ्रियुग्मात् ।
दैत्येन्द्रासृक्पानप्रवर करतलो मृत्युमारस्य हन्त
क्लेशाधिष्ठांघ्रिपाती द्व्यधिकजिनकरो भावनीयः परार्थम्
॥१३१॥

मातुस्तत्रैकवक्त्रं यमकरकमले कर्तिका श्रीकपालं
सूर्यादिन्दुः स्वचारं चरति गतिवशाद् द्वादशाधिक्यमेकम् ।
तस्मात् कायप्रभेदैर्भवति जिनपतिर्विश्वमाता तथैव
प्रज्ञोपायाङ्गभावैः समसुखफलदैश्चन्द्रसूर्यप्रचारैः ॥१३२॥
एकाद्यानन्दवक्त्रो बहुकरचरणोऽनेकवर्णस्तमोऽन्ते
प्रज्ञोपायात्मको वै ददति शमसुखं नाडिकेन्द्वर्करोधात् ।
भूम्यादीनां समन्तादनलमणिनिभो भेदकः शून्य एको
नाड्यो नान्तो न मध्यस्त्वविषयविषयः साधितः कालचक्रः
॥१३३॥

क्रोधेन्द्रं वज्रवेगं द्व्यधिकजिनकरं वेदवक्त्रं द्विपादं
पिङ्गाक्षं पिङ्गकेशं जिनपतिमुकुटं तीक्ष्णदंष्ट्राकरालम् ।
सव्यानं व्याघ्रचर्म प्रवर निवसनं भर्तृवच्छस्त्रहस्तं
मूर्ध्नो मालानिबद्धं सकलजिनकुलैः पञ्चवर्णैः कपालैः
॥१३४॥
विश्वाब्जे सूर्यमूर्ध्नि स्फुटदमलकरं मण्डले विश्ववर्णे
पादाभ्यां भूतनाथा[1]क्रमितमतिबलात् संस्थितालीढपादम् ।
भूतानि त्रासयन्तं ह्यसुरफणिसुरान् ज्ञानसत्त्वैकभूतं
ध्यायन्नेवैकमासं चितिभुवनगतं साधयेद् भूतवृन्दम् ॥१३५॥
नागाब्जाष्टपत्रेष्वपि जयविजयौ पातयित्वार्कमूर्ध्नि
पादाभ्यां स्तम्भयित्वा फणिपतिमिथुनं पद्मपत्रे स्थितानाम् ।
लाङ्गूलाग्रं च सर्वं घनकुलमुदरान् मुञ्चतो वै समन्ताद्
ध्यातः क्रोधेन्द्र एवं कतिपयदिवसैः साधयेन्मेघवृन्दम्[2] १३६
इत्याद्यं देवतानां भवति नरपते साधनं देवतीनां
प्रत्येकं मण्डलेऽस्मिन् खजिनकुलवशात् कर्मभेदैः समस्तैः ।
स्तम्भे शान्तौ च वश्ये परधनहरणे मारणोच्चाटनाद्ये
षट्त्रिंशद्योगिनीनां भवति खलु पुनर्जापहोमं स्वबीजैः १३७
शान्तौ ध्यानं च शान्तं शशधरधवला देवता शान्तरूपा
रौद्रे ध्यानं च रौद्रं कषणघननिभा देवता रौद्ररूपा ।
वश्ये ध्यानं सरागं दिनकरवपुषा देवतारागमूर्तिः
स्तम्भे ध्यानं समूढं वरकनकनिभा देवता तत्त्वरूपा १३८
शान्तिः पुष्टिश्च राजन् ससुतजिनकुलैः सिध्यते देवतीभिर्
विद्वेषोच्चाटनं च प्रकृतिगुणवशात् सिध्यते क्रोधजाभिः ।
वश्याद्यं भूतजाभिः प्रकटदनुकुलैः कीलनं[3] चासुरीभिर्
मातृभ्यां सर्वकर्माण्युभयपरिकुले मारणं जीवनं च ॥१३९॥
आदौ श्रीकालचक्रस्त्रिभुवनजननी यत्नतः साधनीयौ
पश्चात् कर्माणि साध्यानि च भुवि निलये शान्तिकादीनि
यानि ।
मात्रा पित्रा विहीनो न हि भवति सुतः सर्वदा लोकसिद्धस्
तस्माद् द्वौ साधनीयौ समसुखफलदौ नान्यथा कर्मसिद्धिः
॥१४०॥

भर्तुर्हृत्पद्ममध्ये शशिरविशिखिनि स्थापयेन्मूर्ध्नि वज्रं
हूंकारं ज्ञानजातं[4] प्रलयघननिभं पञ्चशूकं सरश्मिम् ।
तन्मध्ये योऽङ्कुशस्य त्रिभुवनसकलं रश्मिभिः पूरयित्वा
आकृष्य ज्ञानचक्रं त्रिविधभवगतं वज्रमार्गे प्रविश्य १४१
सर्वं चन्द्रद्रवाभं स्वकुलिशवदनादुत्सृजन्मातृपद्मे
तस्मिन् सूर्ये प्रविष्टं भवति समरसं चादिकादिप्रयुक्तम् ।
तन्मध्ये ज्ञानबीजं भवति कुलवशात् कर्मणः शान्तिकादेस्

तेनोत्पन्ने[5] च देवी

जः हूं वं होः क्रमे
ॐ आः हूं हे होस्
ईॠऊॡ तथैव प्र
हः हूं हं फें रविर
ध्यात्वा चन्द्रार्कम
तेनोत्पन्नैकवक्त्रां
आरूढां[7] श्वेतनाग
श्वेतालङ्कारयुक्तां
तस्मात् साध्यं गृह
भर्तुश्चाज्ञां प्रलब्ध
तं साध्यं स्नापयि
रूपाद्याः पोषयन्ति
भूताख्याश्च भवि
नागिन्यश्चुम्बयनि
चण्डाः कुर्वन्ति र
एवं साध्यस्य सर्व
ह्लीश्चन्द्रादित्यगभ
तेनोत्पन्नार्कभासो
प्रत्यालीढाश्च रू
साध्यं हृन्नाभिगुह

कण्ठे पाशेन बद्धा
चण्डाभिर्वस्त्रहीनं
देवीभिर्भर्त्स्यमानं
भूताभिर्भीष्यमान

वज्राभिर्नष्टबुद्धि
भर्तुः पादे विवस
एवं कृत्वा तु व
तद्वत् पाशाङ्कुशा

.ध्यात्वा सूर्येन्दुम

[1] ने. °नाथाः [2] ने. °वृन्दे [3] ने. कीलकं [4] ने. °वज्रं [5] ने. °न्ना [6] ने. °दो [7] ने. आरूढो [8] ने. °भुग्नावज्राभिश्च वद्धः

तेनोत्पन्ने[५] च देवी भवति हि फलदा[६] योगिनो देवता वा ।।१४२।।

जः हूं वं होः क्रमेणाङ्कुश इति कुलिशं वज्रपाशश्च घण्टा
ॐ आः हूं हे होस्तथोक्तं शशिरविकुलिशं चाक्षतं तद्वदेव ।
ईॠऊॡ तथैव प्रकटयरवला वायुवह्न्यम्बुपृथ्व्यो
हः हूं हं फ्रें रविरपि कुलिशं चन्द्रमाः कर्तिका च ।।१४३।।

ध्यात्वा चन्द्रार्कमध्ये त्वलिकलिसहिते तोयबीजात्मकाब्जं
तेनोत्पन्नैकवक्त्रां यमकरकमलां देवतीचन्द्रवर्णाम् ।
आरूढां[७] श्वेतनागं सितजलजकरां चाभयां श्वेतवस्त्रां
श्वेतालङ्कारयुक्तां प्रहसितवदनां प्रेषयेत् साध्यवेश्म १४४

तस्मात् साध्यं गृहीत्वा पुनरपि च विभोर्मण्डले संप्रविष्टा
भर्तुश्चाज्ञां प्रलब्ध्वा पुनरमृतघटैर्लोचनाद्याः प्रहृष्टाः ।
तं साध्यं स्नापयन्ति प्रवर दशविधाः शक्तयः पूजयन्ति
रूपाद्याः पोषयन्ति प्रकटदश च लास्यादयस्तोषयन्ति १४५

भूताख्याश्च भवन्ति प्रवर दशविधाः क्रोधजाः पालयन्ति
नागिन्यश्चुम्बयन्ति त्वमरयुवतयो द्वादशालिङ्गयन्ति ।
चण्डाः कुर्वन्ति रक्षां सकलभुवि तले शान्तिपुष्टयर्थहेतोर्
एवं साध्यस्य सर्वं परमसुखकरं योगिना भावनीयम् १४६

ह्रीश्चन्द्रादित्यगर्भे कुवलयकलिका बाणमेवेषुचापं
तेनोत्पन्नार्कभासोभयकरधनुषापूरिताकर्णबाणा ।
प्रत्यालीढाश्च रूढा कमलशशधरा प्रेषयेत् साध्यवेश्म
साध्यं हृन्नाभिगुह्ये शिरसि च वदने ताडयित्वा शरेण ।।१४७।।

कण्ठे पाशेन बद्धा क्षुभितमपि तया मण्डले नीयमानं
चण्डाभिर्वस्त्रहीनं हृतमपि नियतं वेष्टितं नागिनीभिः ।
देवीभिर्भर्त्स्यमानं सलगुडमुशलैस्ताडितं क्रोधजाभिर्
भूताभिर्भीष्यमानं खरनखनिहतं चैव लास्यादिभिश्च ।।१४८।।

वज्राभिर्नष्टबुद्धिं क्षितिजलहुतभुग्वातजाभिश्च बद्धम्[८]
भर्तुः पादे विवस्त्रं सकलमदहतं पातितं भक्तिभिश्च ।
एवं कृत्वा तु वश्यं पुनरपि च विभुस्तोषयेत् तत्र साध्यं
तद्वत् पाशाङ्कुशाभ्यां भवति बहुविधा कृष्टिकर्म त्रिधातौ ।।१४९।।

ध्यात्वा सूर्येन्दुमध्ये कषणघननिभं दीर्घहूंकारजासिं

[८] ने. °भुग्वावज्राभिश्च बद्धः



तेनोत्पन्ना विवर्णा त्वसिकरकमला तर्जनी पाशहस्ता ।
प्रत्यालीढोऽग्रमूर्ध्नि प्रकुपितवदना प्रेरिता साध्यवेश्म
साध्यं पाशेन बद्ध्वा कुपितवदनया मण्डले[१] द्वारनीतम् १५०

उष्ट्रे जःकारजाते वरपवनगतौ भर्तृवाक्येन साध्यं
तत्रारूढं प्रकृत्या शिखिचलवलयं प्रेरयेद्यावदेव ।
एवं तूच्चाटनं वै भवति सुरपतेः किं पुनर्मानुषस्य
विद्वेषेऽप्युष्ट्रहीनौ बहुकृतकलहौ सव्यवामे च नेयौ १५१

ध्यात्वा सूर्येन्दुगर्भेन इति परिणतं पीतवर्णं स्वचक्रं
तेनोत्पन्नैकवक्त्रा वरकनकनिभा शृङ्खलाचक्रहस्ता ।
कूर्मे दैत्यासनस्था त्वतिमृदुगमना प्रेरिता साध्यवेश्म
साध्यं चक्रेण भेध्यं प्रपतितमवनौ शृङ्खलाबद्धपादम् १५२

आनीतं मण्डले वै जिनपतिवचसा पातयित्वा धरण्यां
मेरुस्तन्मूर्ध्नि देयो वरकनकमयः स्तम्भने साध्यकाये ।
षट्सन्धौ कीलनार्थं त्वपि कुलिशमयैः कीलकैः कीलनीयः
सर्पैः संदंश्यमानः पतित इह महौ मोहने भावनीयः १५३

ध्यात्वा सूर्येन्दुगर्भे तडिदनलनिभां कर्तिकां फ्रेंस्वभावां
तेनोत्पन्ना प्रचण्डा प्रलयघननिभा कर्तिका शुक्तिहस्ता ।
प्रत्यालीढा विवस्त्रा ह्युपरि हरिरिपोः[२] प्रेरिता साध्यवेश्म
साध्यं केशेषु शीघ्रं धृतमपि च तया मण्डले वस्त्रहीनम् ।।१५४।।

आनीतं श्रीश्मशाने जिनपतिवचसा गृध्रकाकैः शृगालैः
सर्वाङ्गात् पीतरक्तं पवनमपि तथा भक्षितं सर्वधातुम् ।
साध्यस्यैवं समस्तं प्रवर भुवि तले मारणे भावनीयं
ध्यानेनानेन शक्रो व्रजति यमपुरं किं पुनर्गर्भजातः १५५

शान्तौ पुष्टौ च शुक्लं भवति कुलवशाद् ध्यानमप्यम्बुबीजाद्
वश्याकृष्टौ च रक्तं त्वपि तनुदहनं वह्निबीजात्मकं[३] च ।
विद्वेषोच्चाटने च प्रलयघननिभं वायुबीजस्वभावं
सत्स्तम्भे कीलनाद्ये वरकनकनिभं भूमिबीजात्मकं च १५६

नीलाभं शून्य[४]बीजाद्भवति हि हरितं मारणे जीवने च
पृथ्वीकृत्स्नं समन्ताज्जलनिधिगमने वायुकृत्स्नं च वृष्टेः ।
नाशार्थं वह्निकृत्स्नं त्वपि महिवलयद्रावणार्थं च वह्नेर्
नाशार्थं तोयकृत्स्ने[५] भवति खगमने शून्यकृत्स्नं त्वदृश्ये १५७

[१] ने. मण्डल [२] ने. गगणनियोः [३] ने. °जं [४] ने. वह्नि
[१२] ने. °रीक्षे [१३] ने. प्रत्यङ्ग° [१४] ने. श्वा° [१५] ने. °गुडिका

ा पाशहस्ता ।
साध्यवेश्म
[१] द्वारनीतम् १५०
त साध्यं
वदेव ।
ानुषस्य
च नेयौ १५१
र्ं स्वचक्रं
चक्रहस्ता ।
साध्यवेश्म
ाबद्धपादम् १५२
त्वा धरण्यां
साध्यकाये ।
लकैः कीलनीयः
भावनीयः १५३
ां फेंस्वभावां
ा शुक्तिहस्ता ।
प्रेरिता साध्यवेश्म
ले वस्त्रहीनम्
॥१५४॥
काकैः शृगालैः
तं सर्वधातुम् ।
र्ं भावनीयं
र्भजातः १५५
ज्वशाद् ध्यान-
मप्यम्बुबीजाद्
बीजात्मकं[३] च ।
स्वभावं
ोजात्मकं च १५६
रणे जीवने च
कृत्स्नं च वृष्टेः ।
गार्थं च वह्नेर्
कृत्स्नं त्वदृश्ये १५७

ध्यानं पञ्चाननं वै भवति गजपतेर्भग्न एवाग्निबीजात्
तार्क्ष्यं नागेन्द्रभङ्गे भवति हि धवलं तोयबीजात्मकं च ।
अष्टांघ्रि खड्गसिंहे प्रलयघननिभं वायुबीजात्मकं स्यात्
खड्गाख्यं वाजिशत्रोरवनिकुलवशात् क्रोधजं दैत्यभङ्गे १५८
श्रीमन्तं बुद्धबिम्बं प्रथममपि विभोर्योगिना साधनीयं
पश्चात् सिध्यन्ति कर्माण्यपरिमितगुणान्यर्कभेदैः स्थितानि ।
मन्त्रे बिम्बे त्वसिद्धे त्रिभुवननिलये सिध्यते नैव किञ्चित्
तस्माद्राजन् स्वचित्ते व्यपगतकलुषे साधयेन्मन्त्रबिम्बम्
॥१५९॥
शूरः संग्रामभूमौ पतित इति तथा लम्बितस्तस्करो वा
अष्टम्यां भूतरात्रौ नृपचितिभुवने स्नापयेदष्टकुम्भैः ।
गन्धैर्धूपैः प्रदीपैर्बहुविधचरुकैः रक्तपुष्पैः प्रपूज्य
वज्रन्यासं प्रकृत्या शिरसि च हृदये मूर्ध्नि नाभौ च कण्ठे
॥१६०॥
कृत्वा कुण्डे त्रिकोणे यदरुणरजसा गर्भपद्मं सचिह्नं
पत्रे चिह्नं जिनानां दिशि विदिशि तथा दैवतीनां स्वचिह्नम् ।
बाह्ये रेखात्रये वै दशदिशि वलये क्रोधचिह्नानि तद्वत्
प्रेतं तस्यावसव्ये त्वसिकरकमलं मण्डलात् सव्यपादम् १६१
पूर्वोक्तान् मातृदोषाज्जिनपतिकुलिशैरात्मरक्षां प्रकृत्य
मन्त्री कुण्डस्य सव्ये सरुधिरपललैर्होममेवं प्रकुर्वन्[६] ।
ॐ ह्रीं हूँ हूं फडन्तं दशगुणितशतं होमयेत् तस्य मन्त्रं
बध्वा वज्रासनं वै अमरगिरिविवाकम्प एवार्धरात्रम् १६२
पूर्णे होमे ज्वलन् वै ललदसिरसिन[७]स्तीक्ष्णदंष्ट्रस्त्रिनेत्रो
गर्जन् वै स्फोटयन् यः क्षितिमपि चरणैः साधकं भीषयन् सः ।
स्थित्वा कुण्डान्तराले हसति[८] कहकहं नृत्यते भीमकायस्
तं दृष्ट्वा भीममन्त्री व्रजति यमपुरं नष्टचित्तः क्षणेन १६३
भेतव्यं नासुरेन्द्रादपि चितिभुवने मन्त्रसिद्ध्यर्थहेतोर्
दृष्ट्वा निःकम्पचित्तं भवति पुनरिदं साधितो भूतनाथः ।
सिद्धोऽहं ते सुवीर वद सकलमहं साम्प्रतं किं करोमि
इत्युक्ते साधकेन स्वमनसि रुचितं प्रार्थनीयं परार्थम् १६४
स्पर्शं खड्गं रसेन्द्रामृतफलगुटिका[९] रोचनं चाञ्जनं च
यल्लेपं पादुकं वा ददतु समभवान् लौकिकीमष्टसिद्धिम् ।
विद्वेषोच्चाटनं वै भुवननिधनता[१०] स्तम्भनाकृष्टिवश्यं
सर्वं मे यातु सिद्धिं स च वदति पुनः सर्वमेतत् करोमि[११]
॥१६५॥
भूतेन्द्रं साधयित्वा व्रजति नरपते साधको यत्र तत्र
पाताले चान्तरिक्षे[१२] सुरवरभुवने मेरुशृङ्गेऽब्धिपारे ।
तत्रारूढोऽसिहस्तः क्षितितलनिलये लोककार्यं करोति
तस्मात् सत्त्वार्थहेतोः परमकरुणया साधनीयोऽसुरेन्द्रः १६६
नामाद्यं चित्तवज्रं भवति नरपते देवतादेवतीनां
वाग्वज्रं सर्वनामाक्षरमपि च ततश्चाधिकं कायवज्रम् ।
तस्मात् प्रत्यङ्गे[१३] मन्त्रो भवति बहुविधः पाठसिद्धः
कदाचिद्
भावोऽजाप्यश्च जाप्यः स्वजिनकुलवशाच्चित्तवाक्कायभेदैः
॥१६७॥
प्रत्येकं मन्त्रजातेः प्रभवति नियतः कोटिजापः प्रसिद्धो
होमस्तस्माद्दशांशः प्रकृतिगुणवशात् सिध्यते यावदेव ।
पश्चाच्छान्त्यादिकेषु प्रभवति फलदो नान्यथा सिद्धिमेति
स ध्यानैर्जापहोमैर्व्रतनियमयुतैर्मन्त्रयोनिश्च साध्या १६८
सिद्धा बद्धा त्रिलोहैः खगपललगुटी खेचरत्वं ददाति
श्वो[१४]श्वादीनां प्रदीपैरपहरति तनौ क्षुत्पिपासादिरोगान् ।
नेत्रैः पित्तैश्च तेषां भवति वरनृणामञ्जनं भूप्रभेदं
अन्तर्धाने च वश्ये युवतिमनहरं साधितं श्रीश्मशाने १६९
कृष्णाष्टम्यां निशायामथ मनुदिवसे मण्डलं वर्तयित्वा
रक्षां कृत्वा समन्ताच्च पललगुटिका[१५] चाञ्जनं तस्य मध्ये ।
कृत्वा संपूजयित्वा सुसुरभिकुसुमैर्मन्त्रजापं प्रकुर्याद्
रश्मीन् मुञ्चन्ति यावन्नभसि रविरिव ग्राह्यमुद्धृत्य तस्मात्
॥१७०॥
जीवे दूते सजीवे गगनदिशि गते मृत्युमाप्नोति दष्टो
दूतः प्रश्नो[१६] समो यो बहुसुखफलदो मृत्युदोक्तः समो यः ।
दूतः सर्वादिनाम प्रवदति हि ततो मृत्युमाप्नोति दष्टः
पृच्छा प्राणप्रवेशे यदि भवति शुभा निर्गमे साऽशुभा स्यात्
॥१७१॥
दूतो वामाग्रपादः कथयति युवतीदक्षिणाग्रो [१७]नरं च[१७]
स्वाङ्गं हस्तेन यत्र स्पृशति समनुजो दष्टमत्र प्रदेशे ।
प्रोत्फुल्लं नेत्रवक्त्रं कथयति मरणं कर्णमूले च कृष्णं

---

॰जं [४] ने. वह्नि [५] ने. ॰कृत्स्नं [६] ने. प्रकुर्यात् [७] ने. ॰रसित॰ [८] के. सहति [९] ने. ॰गुडिका [१०] ने. भवन॰ [११] ने. करोति
े. श्वा॰ [१५] ने. ॰गुडिका [१६] ने. प्रश्ना [१७-१७] ने. नरश्च

शफो हृत्पुण्डरीके यदि भवति मनाक् संग्रहं तत्र कुर्यात्
॥१७२॥
आदौ रक्षाविधानं भवति सुखकरं दष्टकस्यात्मनश्च
पृथ्वीतोयाग्निवाता गगनमपि तथाङ्गुष्ठकादौ नियोज्य ।
लाद्या हान्ताः क्रमेणोरुजठरहृदये वक्त्रमध्ये ललाटे
हूंक्षुह्यागादिनागा दश विषमसमा ह्रस्वदीर्घप्रभेदैः १७३
वामाङ्गे ह्रस्वबीजं श्रवणगलगतं कक्षकुक्षोरुदेशे
सव्याङ्गे दीर्घमेव प्रभवति फणिनां सृष्टिसंहारयोगैः ।
रक्षां कृत्वा जिनाख्यां गुणसुसमशरेणाहिबीजान्वितेन
हूंक्ष्रूंयुक्तेन शीघ्रं सुनिहितहृदयः स्तोभमायातिदष्टः १७४
पृथ्वीबीजे ललाटे चरणगतखजे स्तम्भमायाति शीघ्रं
तोये मूर्ध्नि प्रविष्टे शिखिनि च जठरे निर्विषत्वं प्रयाति ।
वायोर्बीजे ललाटे शिखिनि च हृदये संक्रमो वै विषस्य
शून्ये मूर्ध्नि प्रविष्टे चरणगतनभौ छेदनं वै विषस्य १७५
श्वेतो बिन्दुर्ललाटे त्रिविधमपि विषं निर्विषं वै करोति
रक्तः स्तोभं प्रवेशं कषणघननिभः स्तम्भनं पीतवर्णः ।
वर्ति प्राणप्रवाहे त्रिकटुकलुलिता योजयेन्निर्विषत्वे
अङ्गुल्या[1]लम्बिकायां विकसितवदने टङ्कणं योजयेद्वा १७६
वज्री जातिः कुमारी त्रिकटुकलवणं लाङ्गुली देवदालिर्
ब्राह्मी क्षारोऽश्वगन्धो दिनकरसहिता बन्ध्यकर्कोटकी च ।
विण्मांसं शुक्र[2]रक्तं सममपि गुटिका कारिताक्षोभ्यपिष्टा
भूतं भूतज्वरं वा स्थिरमुरगविषं घ्राणदत्ता निहन्ति १७७
सूर्यादौ सप्तवारे दिननिशिसमये सप्तभागावसाने
शून्या मन्दार्कमध्ये प्रवहति[3] कुलिका मृत्युरूपार्धनाडी ।
नागक्रीडां न कुर्यात् त्रिविधमपि विषं भक्षणीयं न तत्र
तस्यामेवाहिदष्टो व्रजति यमपुरं भूतलब्धोऽस्त्रभिन्नः १७८
मध्याह्ने चार्धरात्रे दिननिशिसमये नित्यवारप्रभेदात्
शून्यादौ सन्धिमध्ये प्रवहति[3] कुलिका कालदष्टैकनाडी ।
प्रत्यूषेऽस्तं गतेऽर्के पुनरपि च तथा कालनाडी च मृत्योर्
एतान्यास्यानि राहोः प्रतिदिनसमये वेदितव्यानि सम्यक्
॥१७९॥
आदित्येऽनन्तभोगो दिननिशिसमये चादिभागो दिनस्य
पश्चाच्छेषोरगाणामुदय इति भवेत् सप्तवारप्रभेदात् ।
खर्तुः खच्छिद्रखेषुखयुगखवसवः खाद्रिखाग्निश्च नाड्यो
भोगाः सूर्यादिवारादपि वसुफणिनां भुक्तिभेदाद्विषं स्यात्
॥१८०॥
विश्वेऽनन्तो हिमाभः[4] कुलिक इति नृपो वासुकिः शङ्खपालो
रक्तो वैश्यो महाब्जो वरकनकनिभस्तक्षकस्तद्वदेव ।
शूद्रः कर्कोटकोऽब्ज[5]कषणघननिभश्चान्त्यजौ विश्ववर्णौ
जन्मस्थानं च तेषां जलशिखिधरणीमारुताकाशधातुः १८१
पादात् कटचन्तपीतो गरुड इति तथा नाभिसीम्नो हिमाभः
आकण्ठाद्रक्तवर्णः कषणघननिभो भ्रूलतां यावदेव ।
तस्माद्वै विश्ववर्णः फणिकुलसहितो मुद्रितः पञ्चतत्त्वैर्
ध्यातस्तन्मुद्रया वै हरति फणिविषं भूतरोगादिकं च १८२
मुंकारं पक्षिनाथं स्वहृदयकमले भावयेत् सूर्यमूर्ध्नि
नागालङ्कारयुक्तं सकलकुलवशात् पञ्चवर्णं स्फुरन्तम् ।
पक्षिस्वाहान्तमादिप्रवणमपि ततः पक्षिनाथस्य मन्त्रं
जप्त्वा तं कोटिमेकं फणिकुलसहितं साधयेत् पक्षिनाथम्
॥१८३॥
तार्क्ष्ये सिद्धे फणीन्द्राः फणिपतितनयाः किङ्करत्वं प्रयान्ति
भूता यक्षा ग्रहाश्च प्रवर भुवि तले डाकिनी[6] मातरश्च ।
मन्त्राकृष्टिं प्रयान्ति ग्रहगणसकलं जल्प्यते कालदष्टस्
तस्मात् सत्त्वार्थहेतोः प्रथममपि नरैः साधनीयः खगेन्द्रः १८४
देवेष्वष्टौ दलेष्वेव नृपतिसुरदेवेष्वब्धिषट्सु द्विजेषु
गर्भे साध्यः स्वदिक्षु प्रथममपि युगं यादयोऽष्टौ दलेषु ।
एताद्याः षोडशेषु त्रिगुणितदशकाः कादिहक्षा द्विजेषु ।
सन्ध्यापत्रेषु साध्यस्तिथिगुणितयुगेष्वेव लान्ताः समात्राः
॥१८५॥
आद्येकैकस्वराभ्यां मकरघटवशाद्दीर्घह्रस्वाश्च पञ्च
द्वात्रिंशद्बाह्यपत्रेष्वपि समहृदया वज्रतीक्ष्णादिवर्णाः ।
बाह्ये शान्त्यादिकर्मण्यपि च वयरला मण्डलान्येव तेषां
वर्णा गर्भोत्तमाङ्गा शिखिबलचरणा वश्य आकर्षणे च
॥१८६॥
शान्त्यादे गर्भपादा शिखिचलशिरसो मन्त्रिणा लेखनीयाः
पूर्वोक्तैः शान्तिपुष्टिं भुवननिधनतोच्चाटनाकृष्टिवश्यम् ।
संस्तम्भं मोहनं च त्रिभुवननिलये चक्रमेतत् करोति

जापैर्होमैश्च साध्य
अष्टारे द्वादशारे
साध्यः कोणेषु
तस्माद्गर्भारमध्य
ॐ ह्रीं ष्ट्रीं तस्
कोष्ठाकोष्ठान्त
विद्वेषे मृत्युवश्ये
स्तम्भाकृष्टौ च
गर्भी[8] तस्मिन्
वर्णानामुत्तमाङ्ग
वर्णैर्वर्गान्तवर्णः
प्रज्ञाबिन्दुद्वयेन
मंमुर्हंहुश्च संसुः
बाह्ये श्रीवज्रघो
साध्योऽस्मिन् क
एवं पूर्वोक्तचक्रे
एतत् सर्वं नराण
यः शब्दो हृत्प्रदे
तस्मिंश्चित्तं नर
यं शब्दं जीवलो
विज्ञानं चैव दूर
कृत्वा पर्यङ्कबन्ध
आकृष्टो बाह्यव
संतापं क्षुत्पिपास
श्वेतो बिन्दुर्ललाट
घ्राणे रन्ध्रद्वयेन
प्राणेनाकृष्य वेग
कालेनाभ्यासयो
अन्नाद्यं क्षुत्पिप

[1] ने. °ष्टा° [2] ने. शुक्ल° [3] ने. प्रभवति [4] ने. विषाभः [5] ने. ब्जे [6] के. साकिनी, ने. शाकिनी [7] ने. °न्निभांगत् [8] ने.
[11] ने. °त्र

जापैर्होमैश्च साध्यः प्रथममिह महावज्रतीक्ष्णादिमन्त्रः
।।१८७।।
अष्टारे द्वादशारे दिशि विदिशि गतं षोडशारेऽन्तरे च
साध्यः कोणेषु मध्ये प्रभवति यमराजासदोमेरुणाद्योः ।
तस्माद्गर्भारमध्याद्भवति दनिरयक्षे च तस्मान्निरन्ते[७]
ॐ ह्रीं ष्ट्रीं तस्य बाह्ये भवति च विकृता नादनात् हृ
द्विधा फट् ।।१८८।।
कोष्ठाकोष्ठान्तराले भवति नरपते साध्यनामैष मन्त्रो
विद्वेषे मृत्युवश्ये प्रभवति यमरा क्षेदमेदोषचाद्याः[८] ।
स्तम्भाकृष्टौ च मोहेऽपि च बलकरणे शान्तिकोच्चाटने च
गर्भी[९] तस्मिन् मकारो व्रजति गुणवशात् पूर्ववद्बाह्यसर्वम्
।।१८९।।
वर्णानामुत्तमाङ्गात् प्रभवति पुरतो यः स्वरालिङ्गितश्च
वर्णैर्वर्गान्तवर्णैः कुलिशकुलवशात् पञ्चमो हंस उक्तः ।
प्रज्ञाबिन्दुद्वयेन स्वरपरमपुटे स्यादियमप्युकारं
मंमुर्हंहुश्च संसुः कमलवसुदले मञ्जुरे वार्कपत्रे ।।१९०।।
बाह्ये श्रीवज्रघोषः प्रभवति स युतो मन्त्रभद्रोऽपि हूं फट्
साध्योऽस्मिन् कर्णिकायाममुकमपि कुरु प्रेरणं श्रीशमादेः ।
एवं पूर्वोक्तचक्रेष्वपि भवति सदा लेखनं साध्यनाम्न
एतत् सर्वं नराणां जिनपतिवचसा सिध्यते तत्प्रसादात् १९१
यः शब्दो हृत्प्रदेशे भवति वरनृणां श्रूयते श्रोत्ररन्ध्रैस्
तस्मिंश्चित्तं नरस्य व्रजति समरसं योजितं चैकभूतम्[१०] ।
यं शब्दं जीवलोके भवति च भवजस्तत्तु[११] देवं शृणोति
विज्ञानं चैव दूराच्छ्रमणमपि विभोर्योगिना भावनीयम्
।।१९२।।
कृत्वा पर्यङ्कबन्धं विकसितवदनोऽन्योन्यदन्तं स्पृशेन्न
आकृष्टो बाह्यवातस्तदमृतसहितो नाभिमध्ये प्रविष्टः ।
संतापं क्षुत्पिपासां हरति वरतनौ संनिरुद्धो विषं च
श्वेतो बिन्दुर्ललाटे सुरपरिकरितो मुञ्चमानोऽमृतं वा १९३
घ्राणे रन्ध्रद्वयेन त्वपि पिहितमुखे बाह्यवातः समस्तः
प्राणेनाकृष्य वेगात् तडिदनलनिभो घट्टितोऽपानवायुः ।
कालेनाभ्यासयोगाद् व्रजति समरसं चन्द्रसूर्याग्निमध्ये
अन्नाद्यं क्षुत्पिपासामपहरति तनौ चामरत्वं ददाति १९४

[७] ने. °न्निभांगत् [८] ने. °वाद्याः [९] ने. °र्भा [१०] ने. °भूते



स्वच्छायामातपस्थामपरमुखरवे स्तब्धदृष्ट्यावलोक्य
पश्चाद् व्योमाभिवीक्षेत् समरसपुरुषो दृश्यते धूम्रवर्णः ।
षण्मासाभ्यासयोगादवनिगतनिधिं दर्शयेच्छिद्रभूमिं
वृक्षच्छायां प्रविश्य त्वथ गगनतले भाविता बिन्दुमाला १९५
या शक्तिर्नाभिमध्याद् व्रजति परपदं द्वादशान्तं कलान्तं
सा नाभौ संनिरुद्धा तडिदनलनिभा दण्डरूपोत्थिता च ।
चक्राच्चक्रान्तरं वै मृदुललितगतिश्चालिता मध्यनाड्यां
यावच्चोष्णीषरन्ध्रं स्पृशति हठतया सूचिबद्धा ह्यचर्म १९६
आपानं तत्र काले परमहठतया प्रेरयेदूर्ध्वमार्गे
उष्णीषं भेदयित्वा व्रजति वरपुरं वायुयुग्मे निरुद्धे ।
एवं वज्रप्रबोधान्मनसि सविषयात् खेचरत्वं प्रयाति
पञ्चाभिज्ञास्वभावा भवति पुनरियं योगिनां विश्वमाता
।।१९७।।
मुद्रा मायानुरूपा मनसि च गगने रूपवद्दर्पणे च
त्रैलोक्यं भासयन्ती तडिदनलनिभानेकरश्मीं[१] स्फुरन्ती ।
बाह्ये देहेष्वभिन्ना विषयविरहिताभासमात्राम्बरस्था
चित्तं चेतो मयालिङ्ग्यति च जगतोऽनेकरूपस्य सैका १९८
त्यक्त्वेमां कर्ममुद्रां सकलुषहृदयां कल्पितां ज्ञानमुद्रां
सम्यक्संबोधिहेतोर्जिनवरजननीं भावयेद्दिव्यमुद्राम् ।
निर्लेपान्निर्विकारां खसमहततमां व्यापिनीं योगिगम्यां
कूटस्थां ज्ञानतेजां भवकलुषहरां कालचक्रानुविद्धाम् १९९
विज्ञानं नाणु[२]रूपं त्रिभव इह तथा नास्ति विज्ञानमेव
बुद्धप्रज्ञास्थिता न क्वचिदिति वचनं देशयिष्यन्ति बौद्धाः ।
शून्यं यास्यन्ति येनाक्षररहितनराः शून्यतां तां गृहीत्वा
भर्त्रा तेनाच्युतं[३] यत् सहजतनुसुखं देशितं मन्त्रयाने[४] २००
गोषड्भ्यः श्वेतनाथान् व्रजतनुविषयानिन्द्रियं यज्ञकाले
यत्ते[५] स्वन्वामि[६](?)चैतद्विषयविषयिनां ज्ञानयोगे निरोधः ।
यत् पानं दीक्षितानां भवति स रुधिरं गोजिने सोमवल्याम्
मूर्ध्नः सोमामृतं तद्भगरजसि गतं सर्वगानन्दरूपम् ।।२०१।।
ब्रह्मा कायो हरो वाक् हरिरपि च मनः प्राणिनां ते त्रिवेदा
ॐकारस्ते त्रिवर्णाः शशिरविहुतभुक्तत्त्रिनाड्यो गुणाश्च ।
कौलः काये[७] कुलान्यो विषयगुणगतोऽथर्वणो नादरूपी

[१] ने. °लक्ष्मीं [२] ने. नाण्ड° [३] ने. °ते [४] के. °जा
[११] ने. °विवैः [१२] ने. राजिनः [१३] ने. °नां
[२०] ने. मारिता [२१] ने. °पदं

दृष्ट्यावलोक्य
दृश्यते धूम्रवर्णः ।
येच्छिद्रभूमिं
वेता बिन्दुमाला १९५
द्वादशान्तं कलान्तं
डरूपोत्थिता च ।
लता मध्यनाड्यां
चिबद्धा ह्यचर्मे १९६
र्ध्वमार्गे
युग्मे निरुद्धे ।
ररत्वं प्रयाति
ोगिनां विश्वमाता
॥१९७॥
द्दर्पणे च
रश्मीं[1] स्फुरन्ती ।
मात्राम्बरस्था
करूपस्य सैका १९८
यतां ज्ञानमुद्रां
दिव्यमुद्राम् ।
पनीं योगिगम्यां
चक्रानुविद्धाम् १९९
स्ति विज्ञानमेव
ज्ञायिष्यन्ति बौद्धाः ।
यतां तां गृहीत्वा
ातं मन्त्रयाने[4] २००
न्द्रियं यज्ञकाले
ां ज्ञानयोगे निरोधः ।
गोजिने सोमवल्याम्
ानन्दरूपम् ॥२०१॥
: प्राणिनां ते त्रिवेदा
त्रनाड्यो गुणाश्च ।
र्वणो नादरूपी

तन्मध्येऽनाहतं यद्विषयविरहितं निर्गुणं चाक्षरं तत्
॥२०२॥
वेदान्ते गुह्यमेतत् कथितमपि पुरा ब्रह्मणा योगिनां वै
चैतज्ज्ञानप्रणष्टैर्मुनिभिरिह वधो देशितः प्राणिनां च ।
जाता तस्मिन् प्रवृत्तिः[8] कुनरकफलदा स्वर्गहेतोर्नराणाम्
अङ्गारो नेन्दुवर्णः क्वचिदिह हि भवेत् क्षीरधाराभिषिक्तः
॥२०३॥
निर्योगैर्वेदवाक्यैः समयविरहितैर्वञ्चिता ये नरास्ते
रक्षां कृत्वा स्वनार्याः प्रतिदिनसमये स्वात्मपुत्रार्जनार्थम् ।
दानं पुत्रेण दत्तं भवति किल पितुः प्रेतलोके[9] गतस्य
तेनेदं कामदानं शम[10]सुखफलदं गोपितं दुष्टविप्रैः[11] २०४
जात्यश्वेनान्यपुंसो यदि भवति महाघोटिकायां महाश्वो
लक्ष्मीश्चाश्वप्रभावात् पुनरपि च भवेत् स्वामिनः किं न
लाभः ।
रक्षां कुर्वन्ति येन प्रतिदिनसमये रागिनः[12] स्वस्वनार्या
कस्त्वं का ते स नारी मरणमुपगतेऽहोऽशुभः कर्मबन्धः
॥२०५॥
गोदानं भूमिदानं ह्यपरमपि तथा भोगदं मर्त्यलोके
भैषज्याहारदानं सकलरुजहरं क्षुत्पिपासाहरं च ।
सर्वस्मिन् कामदानं[13] शमसुखफलदं किं पुनश्चक्रकाले
इष्टा भार्या भगिन्यपि सुभगदुहिता गुह्यदाने प्रदेया २०६
सद्वेश्या कर्ममुद्रा भवति च समया गुप्तनारी परस्त्री
स्वच्छन्दा धर्ममुद्रा बहुविषयरता ज्ञानमुद्रा स्वभार्या[14] ।
सद्वेश्या द्वादशाब्दा परमसुखकरा षोडशाब्दा कुलस्त्री
स्वच्छन्दा विंशत्यब्दा भवति सुदुहिता[15] त्रिंशदब्दा
स्वभार्या ॥२०७॥
पूर्वं बुद्धैर्धरित्री गजतुरगरथानेकसौवर्णभारा
दत्त्वा बुद्धत्वहेतोः पुनरपि च शिरो रक्तमांसं प्रदत्तम् ।
एभिर्बुद्धत्वमिष्टं न हि भवति ततः कामदानं प्रदत्तं
बुद्धत्वं तेन जातं जिनजनककुले गुप्तदानेन पुंसाम् ॥२०८॥
हेमं ताम्रेण तुल्यं सुरमुकुटमणिः कालखण्डेन तुल्यः
सद्वेश्या कामदानैरमरकुलवधू चर्मखण्डेन नाभिः[16] ।

जात्यश्वो गर्दभेन प्रवरगजपतिर्लभ्यते यद्यजेन
भार्यादानेन देवीं जिनजनककुले तत्र किं नैष लाभः २०९
मैत्रीदानेन दानं समसुखफलदं तुल्यसत्त्वप्रभावात्
सूपेक्षास्थान एव प्रवर जिनकुले मारसत्त्वस्वरूपात्[17] ।
हीनत्वादुत्तमत्वात्सकरुणमुदितास्थानयुग्मे प्रदत्तः
संभारौ द्वौ प्रपूर्याक्षरसुखफलदं सौगतानां परार्थम् ॥२१०॥
वर्णो यस्य प्रमाणं भवति नरपते तस्य वेदः प्रमाणं
वेदो यस्य प्रमाणं खलु भुवि निलये तस्य यज्ञः प्रमाणम् ।
यज्ञो यस्य प्रमाणं विविधपशुनृणां तस्य हिंसा प्रमाणं
हिंसा यस्य प्रमाणं नरकभयकरं तस्य पापं प्रमाणम् २११
वासग्रामार्थमिष्टं कथयति भगवान् श्रीविहारप्रतीष्टं
भैषज्याहारदानं किल रुजशमनं तत्र दाता ददाति ।
दानाभावे विहारः क्षितितलनिलये तिर्यगावास एष[18]
ग्रामो यत्रैव सङ्घो भवति नरपते तत्र धर्मश्च बुद्धः २१२
बुद्धं धर्मं च सङ्घं शरणमुपगता मानुषा मोक्षहेतोर्
नायं बुद्धो विहारे स्थित इह लिखितः पुस्तको धर्म एव ।
सङ्घः काषायधारी परमविभुसुखं जन्मलक्षैर्ददाति
आचार्यो बुद्ध एव प्रवर भुवि तले देशना तस्य धर्मः २१३
सङ्घस्तस्मिन् स्थितो यः प्रमुदितहृदयः सर्वसत्त्वानुकम्पी
सोऽस्मिन्नुक्तश्चतुर्धा द्विविध इह पुनः श्रावकोऽनुत्तरश्च ।
भिक्षुण्यो भिक्षवश्च पुनरिह हि महोपासकोपासिकाश्च
योगिन्यो योगिनो वै सहजसुखरतोपासकोपासिकाश्च
॥२१४॥
पुण्यज्ञानार्थहेतोर्विविधमपि सदा दानमत्यर्थमिष्टं
भोज्याद्यं[19] श्रावकेभ्यः परमसुखकरं योगिनामिष्टदानम् ।
दातारो ये ददन्ति प्रमुदितहृदयाः सर्वदारक्तचित्तास्
ते पुण्यज्ञानपूर्णाः परमसुखपदं जन्मनीहैव यान्ति ॥२१५॥
आचार्यं निन्दयन्ति प्रकटमपि जिनं श्रावका ये प्रबुद्धास्
तेऽवीचीं यान्ति शीघ्रं परमभयकरं भारिता[20] विघ्ननाथैः ।
स्वाधिष्ठानं करोति प्रवर जिनपतिर्यस्य मन्त्रप्रभावैः
को भिक्षुस्तस्य तुल्यो व्रतनियमपदे[21] ब्रह्मचारी नराणाम्
॥२१६॥

---

[3] ने. °ते [4] के. °जाने [5] ने. °त्त [6] ने. °सि [7] ने. काय [8] ने. °ष्टिः [9] ने. °लोके [10] ने. सम°
[13] ने. °नां [14] ने. °भार्यं [15] ने. स्त्र° [16] ने. ताभिः [17] ने. °रूपा [18] ने. एव [19] ने. भोग्याद्यं

कष्टं कुर्वन्ति सर्वे परमसुखरता भिक्षुको वा परिव्राड्
नग्नो मौण्डी जटी च श्रुतपठनरतः पण्डितो मार्गनष्टः ।
कर्तुश्चात्मग्रहेण स्वपरमिह सदा पुत्रदारग्रहेण
भक्षाभक्षग्रहेणाप्यकुलकुलरतापात्रपात्रग्रहेण ।।२१७।।
बुद्धक्षेत्रं च बुद्धं शमसुखफलदं कायवाक्चित्तरागम्
एतत् संहारयित्वा त्वपरमपि विभुं पापबुद्धिः समीक्षेत् ।
क्षेत्रे तीर्थेऽन्यदेशे व्रतनियमशतैर्लङ्घनैः शैलपातैः
संग्रामे ग्रस्तसूर्ये विषयसुखरतोऽनेकशस्त्राग्निपातैः ।।२१८।।
मारैरेतत् समस्तं रचितमपि पुरा रक्तपानस्य हेतोः
स्वर्गस्तीर्थोपवासैर्मरणमुपगतस्याहतस्यैव युद्धे ।
गोभानोर्मोचनार्थे[1] गृहधनविषये विप्रकार्ये मृतस्य
तस्मादेकः स्वकायः शमसुखनिलयो रक्षणीयः परस्य २१९
श्रुत्वा यस्तन्त्रराज जिरवररचितं चाभिषेकं गृहीत्वा
ईर्ष्यां भूयः करोति प्रविशति नरकं सोऽष्टमं यावदेव ।
यस्मिन् सूच्यग्रभू[2]मावशुभफलवशान्नारकाः संचरन्ति
तस्माद् ग्राह्योऽभिषेको न हि भवति नृणां यावदीर्ष्यास्ति
चित्ते ।।२२०।।

दानं शीलं प्रपूर्णं जिनजनककुले क्षान्तिवीर्यं च पूर्णं
ध्यानं प्रज्ञा ह्युपायः प्रणिधिरपि बलं ज्ञानपूर्णं ह्यनेन ।
भार्यादानेन शीघ्रं प्रमुदितमनसो योगिनो जन्मनीह
कृत्वास्मिन् रागबन्धं नरकमुपगता मोहिता ये[3] नरास्ते
।।२२१।।

पृथ्वी लक्ष्मीनिमित्तं सुचपलहृदयं तीक्ष्णखड्गं गृहीत्वा
योधाकीर्णे समन्तात् प्रविशति हि रणे कातरश्चातुरङ्गे[4] ।
दृष्ट्वा मातङ्गवृन्दं पतति करतलात् तस्य भीतस्य खड्गस्
तस्मिन् खड्गस्य दोषो न हि भवति यथा मन्त्रजातेस्तथैव
।।२२२।।

मन्त्रैर्वीरक्रमेणाप्यसुरफणिसुरान् साधयेद्रौद्रभूम्यां
स्वाधिष्ठानेन देवीः समयकुलगता ध्यानजापैः सहोमैः ।
सेकं शुद्धक्रमेण त्वनवरतमहानन्दचित्तेन मन्त्री
ज्ञानं चिन्तामणिर्यत् प्रभवति च ततश्चैष मार्गो जिनस्य
।।२२३।।
सूतस्याग्ने रिपुत्वं न शिखिविरहितः सूतबन्धः कदाचिन्
नाबद्धो हेमकर्ता कनकविरहिता वादिनां नैव भोगाः ।
एवं स्त्रीसङ्गहीनो न हि भवति सदा योगिनां चित्तबन्धो
नाबद्धः कायवेधी सहजसुखमिहाविद्धकायो ददाति ।।२२४।।
उद्याने पर्वते [5]वा जनमृगरहिते[5] साधयेत् सौम्यमन्त्रान्
रौद्रान् रौद्रश्मशाने सुरवरभवने स्तम्भनं मोहनं च ।
वश्याकृष्टिं च मन्त्री परमविभुसुखं सर्वमुद्राप्रसङ्गे
अन्यस्थानेऽन्ययोनौ न हि भवति नृणां जन्मलक्षैश्च सिद्धिः
।।२२५।।

वेश्मग्रामेऽक्षसूत्रैर्दिननिशिसमये मन्त्रजापं हि कृत्वा
श्रान्तो मूढो विरक्तो वदति पुनरिदं मन्त्रसिद्धिश्च नास्ति ।
स्थानं शून्यं च कालं परमनिशिगतं नैव जानाति सम्यग्
रोगः पादाङ्गुलीषु प्रतिशिरसि करोत्यौषधीभिः प्रलेपम्
।।२२६।।

न ध्यानं मन्त्रजापः करणमपि महामण्डलान्यासनानि
होमं मन्त्रप्रतिष्ठा रजसि निजकुला[6]वाहनं प्रेषणं च ।
मुद्रासिद्धिं ददाति प्रवर विभुसुखं स्त्रीप्रसङ्गं विहाय
तस्मात् तद्भावनीयं प्रतिदिनसमये योगिना मोक्षहेतोः २२७
मूर्च्छां निद्रां प्रविष्टं भवति नरपते निःस्वभावं स्वचित्तं
जाग्रायां स स्वभावं प्रकटयति न तत् प्राणिनां मोक्षमार्गम् ।
भावाभावैर्विभिन्नं न हि शमसुखदं योगिनां चित्तवज्रं
खप्रज्ञालिङ्गितं यत् सहजसुखगतं मोक्षदं तत् स्वचित्तम् २२८
ॐ आः हूं होः क्रमस्थैः[7] प्रथममिह सदा बोधयेच्छोधयित्वा
मद्यं प्रज्वालयित्वा द्रुत[8]शशिनमिवाभावयित्वा क्रमेण ।
तत्पात्राद्विन्दुना वै शशिकरकमलानामिकाग्रेण भूम्यां
कृत्वा बाह्ये त्रिकोणं दिनकरसदृशं वर्तुलं तस्य मध्ये २२९
तन्मध्ये ज्ञानचक्रं त्रिभवमपि गतं भावयित्वा स मन्त्री
अङ्गुष्ठानामिकाभ्यां प्रतिदिनसमये तर्पणाद्यं करोति ।
देशग्रामाधिपानां प्रथममिह बलिं चादिमध्यान्तनाम्ना
हारीत्याः पिण्डके द्वे पुनरपि च बलिं क्रोधराजाय मन्त्री
।।२३०।।

दूतीनां ग्रासमग्रं क्षितितलनिलये भर्तृवज्रैर्ददाति
भूतानां भक्तशेषं पठति पुनरिमां दानगाथां शुभार्थम् ।
सर्वे सत्त्वाः सुखस्थां शिरसि गलहृदोर्नाभिगुह्ये च मूर्ध्नि

निद्राकालेऽङ्गवक्त्रै
प्रत्यक्षं चानुमानं
प्रत्यक्षं तत्त्वयोगा
अप्रत्यक्षेऽनुमानं मु
चित्रादौ दर्शनीयं

रूपं वा मण्डलं व
आकाशे तत्त्वयोग
वर्षार्धं वर्षमेकं गु
मुद्रासङ्गेन तस्मा
सर्वस्मिंस्तन्त्रराजे
बालानां पाठनाथ
तस्मात्तं भेदयित्व
मुद्रासिद्ध्यर्थहेतो

।।इति श्रीमदावि

किञ्चिज्ज्ञानं हि
भूयोऽहं श्रोतुका
बुद्धानां षट्कुला
श्रुत्वा सौचन्द्र व
स्तम्भान् वज्राव
मांसासृक्तोयवि
पित्तेन श्लेष्मण
पञ्च प्राकाररे

भर्त्रब्जं कालना
अर्कद्वाराणि र
चक्राण्यष्टौ श्म
वज्रार्चिर्लोमनि
एवं वै कायव
वाग्वज्रं चादि
षट्शून्यैश्चित्त

---

[1] ने. °र्माचथार्थे [2] ने. शून्यग्रधू° [3] ने. °रो [4] ने. °सुरेगे [5-5] ने. वाथ जनविरहिते [6] ने. °कुली° [7] ने. °स्तैः
[11] ने.°जाति [12] ने. वर्मा° [13] ने. °युक्तं

निद्राकालेऽङ्गवक्त्रैरुभयकुलगतैरर्चने मैथुने च ।।२३१।।

प्रत्यक्षं चानुमानं द्विविधमपि भवेद्देवतालम्बनं यत्
प्रत्यक्षं तत्त्वयोगादुडुरिव गगनेऽनेकसंभोगकायम् ।
अप्रत्यक्षेऽनुमानं मृतकतनुरिवातत्त्वतः कल्पनं यच्
चित्रादौ दर्शनीयं ह्यपरिणतधियां योगिनां भावनार्थम् ।।२३२।।

रूपं वा मण्डलं वा प्रथममपि तटे तत्त्वतो भावनीयम्
आकाशे तत्त्वयोगात् सकलमविकलं दृश्यमानं स्वचित्तम् ।
वर्षार्धं वर्षमेकं गुरुनियमवशाद्यावदेव स्थिरं[९] स्यान्
मुद्रासङ्गेन तस्मात् कतिपयदिवसैरक्षरत्वं प्रयाति ।।२३३।।

सर्वस्मिंस्तन्त्रराजे खलु कुलिशपदं योगिनामेतदुक्तं
बालानां पाठनार्थं परमकरुणया गोपितं विश्वभर्त्रा ।
तस्मात्तं भेदयित्वा प्रतिदिनसमये योगिना भावनीयं
मुद्रासिद्ध्यर्थहेतोर्जिनवरजनकानाहतं कालचक्रम् ।।२३४।।

**।।इति श्रीमदादिबुद्धोद्धृते कालचक्रे साधनपटलश्चतुर्थः।।**

किञ्चिज्ज्ञानं हि भर्तुर्जिनवरसहितं साधनं यत्त्वयोक्तं
भूयोऽहं श्रोतुकामस्त्रिदशनरगुरोर्मण्डलं धातुभेदैः ।
बुद्धानां षट्कुलानि त्वलिकलिषु गतान्येव षड्योगिनीनां
श्रुत्वा सौचन्द्र वाक्यं गदति जिनपतिर्धातुभिर्मण्डलाद्यम् १

स्तम्भान् वज्रावलीं वै कुरु महिवलयं भित्तिमेवास्थिभिश्च
मांसासृक्तोयविड्भिः सुरयमधनदे चापरे रङ्गपातम् ।
पित्तेन श्लेष्मणार्कं शशिनमपि तथा स्नायुभिस्तोयजानि
पञ्च प्राकाररेखाः[१०] क्षितिजलहुतभुग्मारुताकाशजाभिः[११] ।।२।।

भर्त्रब्जं कालनाडचश्चलशिखिवलयाद्यं च चर्मादिभिश्च[१२]
अर्कद्वाराणि रन्ध्रैर्मणिमयरचनां दन्तपंक्त्या तथैव ।
चक्राण्यष्टौ श्मशाने चलवलयगतान्यङ्गुलीनां नखैश्च
वज्राचिर्लोमभिर्वै दिशि विदिशि गता मण्डलस्यावसाने ३

एवं वै कायवज्रं वरविविधगुणं मण्डलाकारमुक्तं[१३]
वाग्वज्रं चादिकोद्यं सकुलजिनकुलैर्देवताकारमेव ।
षट्शून्यैश्चित्तवज्रं त्रिविधभवगतं नायककारमेकम्

---

°कुली°  [७] ने. °स्तैः  [८] ने. हुत°  [९] ने. स्थितं  [१०] ने. °लेखा



एवं वै ज्ञानवज्रं भवभयमथनं विश्वमातृस्वरूपम् ।।४।।

वर्गाणां कादिषण्णां क्रमपरिरचितानां कुलानि क्रमेण
वज्रासी रत्नचक्रं जलजमपि तथा कर्तिका वै जिनानाम् ।
भूयश्चैकैकवर्गः सकलजिनवरैर्भिद्यते पञ्चवर्णैः
प्रत्येकं वर्णभेदात् क्षितिजलहुतभुग्मारुताकाशयोगात् ।।५।।

आदौ शून्यप्रभेदस्त्वपि ङञणमनष्कास्तथादिस्वरश्च
वायोर्भेदस्त्विकारस्तु घभढधभशा वह्निभेदस्त्वगाद्याः ।
अम्भो भेदोऽप्युकारः ष्पखछठफथयुग्भूमिभेदे लृकाद्या
एवं पञ्चप्रकारैः परमजिनकुलैः कादिवर्गा विभिन्नाः ६

उष्णीषे पञ्चशून्यं त्रिकुलमपि तथा कायवाक्चित्तवज्रम्
आद्या [१]मुद्रा मूलं वै[१] हयरवलयुताः कादिवर्गाः समस्ताः ।
लोकालोकं समात्रा हयरवलयुता लोकलोकोत्तरश्च
काद्या विद्याधरेन्द्रं भवति हि सकलं चाष्टकूटस्थवर्गाः ७

त्रिंशद्वै कादिवर्णा हयरवलयुताः सक्षषट्त्रिंशदेव
भिन्ना मात्रा विकारै रसगुणितरसाश्चक्रनाथा भवन्ति ।
एकाङ्गश्चैकया वै द्विसपरिकरितः प्रज्ञयालिङ्गितोऽभूत्
पञ्चात्मा पञ्चभिः स्यान्नवपरिकरितश्चक्रनाथो नवात्मा ।।८।।

मात्रासंख्यात्मको वै त्रिदशनवदिशाभिश्च षट्त्रिंशदात्मा
याद्याभिर्द्वारपालाः सकलगण[२]कुलं शेषमात्राभिरेव ।
षट्क्रोधा [३]हादिभिः स्युः[३] स्वकुलदिशि गता वायुमात्रादिभेदैः
प्रत्येकं वर्णभेदै रसगुणितरसा योगिनी योगतन्त्रम् ।।९।।

एवं प्रत्येकवर्णो रसगुणितरसे मण्डले मण्डलेशः
स्कन्धैर्भूते[४]न्द्रियाद्यैः सकलगणकुलं शोधयेन्मातृभेदैः ।
शून्यैश्चानाहताद्यैः सकलजिनकुलैर्मुद्रणं देवतानाम्
उष्णीषादम्बुजान्ते विषमसमकुले चक्रमध्यासने च ।।१०।।

वज्रैर्वक्त्रप्रभेदो भवति जिनपतेर्मातुर्भे[५]दैर्भुजानां
तत्त्वैर्मुद्राप्रभेदस्त्वपरमपि तथा कायवज्रादिभिश्च ।
षट्त्रिंशद्योगतन्त्रे त्वपरिमितगुणेऽनेकवर्णप्रभेदे
प्रत्येके वर्णमाने समविषमकुले देवतादेवतीनाम् ।।११।।

बीजैकं चैकवीरो रजसि समरसः प्रज्ञयालिङ्गितोऽभूत्
स्कन्धैः पञ्चात्मकोऽधिष्ठितमपि नवको भूमिधात्वादिभिश्च ।

---

[१] ने. मूलं तथा वै  [२] ने. °गुण°  [३] ने. °भिश्चः  [४] ने. स
[११] ने. चक्रं  [१२] ने. °ले  [१३] ने. °गेरवि  [१४] के. सूर्ये

स्वरूपम् ।।४।।
लानि क्रमेण
का वै जिनानाम् ।
चवर्णैः
काशयोगात् ।।५।।
ादिस्वरश्च
भेदस्त्वगाद्याः ।
भेदे लृकाद्या
र्गा विभिन्नाः ६
प्रवाक्चित्तवज्रम्
दिवर्गाः समस्ताः ।
ाकोत्तरश्च
टकूटस्थवर्गाः ७
त्रिंशदेव
नाथा भवन्ति ।
ालिङ्गितोऽभूत्
चक्रनाथो नवात्मा
।।८।।
व षट्त्रिंशदात्मा
ात्राभिरेव ।
गता वायुमात्रादि-
भेदैः
ोगतन्त्रम् ।।९।।
ण्डलेशः
येन्मातृभेदैः ।
देवतानाम्
यासने च ।।१०।।
र्भुजानां
ादिभिश्च ।
प्रभेदे
तीनाम् ।।११।।
लिङ्गितोऽभूत्
भूमिधात्वादिभिश्च ।

पाय्वाद्यैश्चक्षुराद्यैः परिकरितमिदं पञ्चविंशात्मकश्च
एवं दन्तोद्भवे वै पुनरपि दशनैरीश्वरोऽनन्तचक्री ।।१२।।
शुद्धे संशुद्धतोयाच्छशधरधवलः पद्मचिह्नोऽमिताभो
मानो लोकेश्वरो वै हयरथगमना मामकी रूपवज्रा ।
रौद्री चाब्धिर्गणेन्द्रो द्विजफणिसहितो व्याघ्रवक्त्रा सलूका
एते श्रीवामवक्त्रात् परमकरुणया स्फारिता वज्रिणा च १३
धर्मे संशुद्धवायो[६]स्त्वसिकरकमलोऽमोघसिद्धिश्च तारा
वैगर्भः स्पर्शवज्रा त्वतिबलसहिता चर्चिका शृङ्खला च ।
नैर्ऋत्यः सूत्र[७]नागाः पवन इति तथा श्वानवक्त्रा सकाका
मैत्रीचित्तेन चैते त्रिभुवनगुरुणा स्फारिता पूर्ववक्त्रात् १४
संभोगे शुद्धवह्नेरुदयरविनिभो रत्नधृक् पाण्डरा च
भूगर्भो जम्भको वै वररसकुलिशा शूकरी षण्मुखोऽग्निः ।
राजानौ द्वौ फणीन्द्रौ प्रकटितभृकुटी शूकरास्या सगृध्रा
एते श्रीसव्यवक्त्रात् परममुदितया स्फारिता विश्वभर्त्रा १५
नाभौ संशुद्धभूमे[८]र्वरकनकनिभश्चक्रपाणिर्मुनिश्च
विष्कम्भी लोचना च प्रवर नरपते स्तम्भको गन्धवज्री ।
मारीचीन्द्री च शक्रो युगमुखसहितो वैश्यनागादिसर्वे
भर्त्रा चोपेक्षया वै सकलजिनहिताः स्फारिताः पश्चिमा-
स्यात् ।।१६।।
उष्णीषे शुद्धशून्याद्वरकुलिशकरोऽक्षोभ्य धात्वीश्वरी द्वे
उष्णीषे धर्मधातुर्गगनगुणवशाद्वज्रपाण्यादयोऽन्ये ।
गुह्ये शुद्धात् समस्ताः शमसुखनिधयः शब्दवज्रादयश्च
ऊर्ध्वाधः स्फारिता वै बहुगुणनिलयाः प्राणिनां मोक्षहेतोः
।।१७।।
दिक्पत्रे लोचनाद्या विदिशदलगतं रक्तपूर्णं कपालं
प्रत्यालीढोऽर्कमूर्ध्नि प्रलयघननिभाक्रान्तसोमेश्वरो वै ।
मालाबद्धः कपालैर्जलनिधिवदनो हेरुकः सूर्यबाहुर्
मुद्राहिर्व्याघ्रचर्मा प्रलयगजपतेर्दार्यचर्मार्द्रधारी ।।१८।।
देवीभिः कृष्णरक्तामलशशितनुभिस्त्रीणि चक्राणि बाह्ये
षट्चक्रो क्रोधजाभिर्द्विभुजशशिमुखाभिस्तथा भूतजाभिः ।
द्वारे चण्डाः शवस्था विदिशि च नियताः कर्तिकाशुक्तिहस्ता
वीराणां वेदहस्ते कुलिशडमरुकौ वज्रखट्वाङ्गघण्टे ।।१९।।
श्रीमेरोरष्टदिक्षु क्षितिजलवलये सर्वपीठोपपीठं[९]
क्षेत्रं छन्दोहमेलापकचितिभुवने वह्निवाय्वोश्च मध्ये ।
एवं देशे नगर्यां दिशि विदिशि गता देवता वेदितव्याः
प्रज्ञातन्त्राभिधानं त्रिभुवनगुरुणा स्फारितं पूर्ववक्त्रात् २०
गर्भे चक्रं नवांशं शशिरविकमले मण्डलादर्धभागं
वज्रः स्तम्भावलीभ्यां रचितमपि महास्कन्धधात्वाधिदैवम् ।
बाह्ये प्राकारभित्तौ विषयविषयिणश्चन्द्रसूर्यासनस्थाः
सूर्यस्था द्वारपालास्त्वपरगुणकुलं वेदिकायां समन्तात् २१
इत्यादौ षट्प्रकारं गमितमपि तथा योग[१०]तन्त्रं समाजं
क्रोधाः कोणेषु पार्श्वे विषयविषयिणो जम्भलो धान्यहस्तः ।
वाक्पादौ पाणिपायू भगरविशशिनः कालनाडीस्वभावाः
प्रज्ञोपायं समस्तं त्रिमुखरसभुजं स्फारितं सव्यवक्त्रात् २२
चक्रे[११] गर्भेऽब्धिकोणं भवति नरपते मण्डलाद् वै त्रिभागं
धातुस्कन्धाधिदैवं पुनरपरपुटे शब्दवज्रादयोऽष्टौ ।
बाह्यस्थे मण्डले वै दशदिशिनियतं क्रोधवृन्दं रविस्थं
तस्मिन् प्राकारभित्तौ जलधिहतयुगा बोधिसत्त्वाः समस्ताः
।।२३।।

मायाजालं त्रिभेदं त्रिमुखरसभुजं देवताकायभेदात्
कल्पाद्यं यत् समस्तं जडहृदयवशात् स्फारितं वामवक्त्रात् ।
तन्त्रं योगानुविद्धं द्विगुणमिह महासम्बरं डाकिनीनां
षट्चक्रैः षट्कुलैर्वै नृप चितिभुवनैः स्फारितं पश्चिमास्यात्
।।२४।।

सूत्रैः षड्रन्ध्रभागैश्चलवलयगतैर्मण्डलं[१२] सूत्रयित्वा
गर्भात् षट्षड्विभागैरपि[१३] कमलदलं कर्णिकार्धेन युक्तम् ।
कर्त्री चक्राब्जरत्नैरसिवरकुलिशैश्चावलीं द्विद्विभागैर्
निर्यूहं द्वारमेकं ऋतुभिरपि रसैर्वेदिकाहारभूमिम् ।।२५।।
पञ्चप्राकाररेखां त्रिभिरपि शिखिभिः पट्टिकां हारमूले
सूर्यैः[१४] पक्षं कपोलं त्रिगुणदिनकरैस्तोरणं स्तम्भमूर्ध्नि ।
अष्टद्वाराणि कुर्याद्दिशि विदिशि महामण्डलं वृत्तमेतन्
मध्येऽब्जं विश्ववर्णं रविशशिपचितं[१५] चासनं कर्णिकायाम्
।।२६।।

चक्रं नीलावली च क्षितिरपि हरिता क्ष्मा सिता पीतचक्रं
रक्ता भूः श्वेतचक्रं क्षितिरपि धवला सावली रक्तचक्रम् ।
पीता नीला च भूमिस्त्वसितमपि भवेत् श्यामवर्णं च चक्रं

---

[३] ने. °भिश्चः [४] ने. स्कन्धे भूते° [५] ने. °तृभे° [६] ने. °वाणे° [७] भोटे शूद्र° [८] ने. °भूते° [९] ने. °पीठे [१०] ने. योज°
रवि [१४] के. सूर्ये [१५] ने. °पटितं

षड्भागे रङ्गभूमिर्जनकमुखवशाद् द्वारचक्राणि तद्वत् २७
बाह्ये द्व्यष्टश्मशानान्यपि च कुलवशाद् गर्भदेव्यस्तथाष्टौ
अष्टौ पत्रे कपालान्यमृतरसयुतान्यष्टपत्रेषु देव्यः ।
बाह्ये लास्यादिदेव्यो दिशि विदिशि महानागराजास्तथाष्टौ
तद्बाह्ये भूमितोयानलचलवलयान्येव वज्रावली च ॥२८॥
दीर्घैर्ह्रस्वैः स्वरैश्चापि सतपटचकक्ष्मादिशून्यादिवर्गा
वाय्वाद्वारेषु दीर्घा रविचरणवशात् क्ष्मादिधातुस्वभावाः ।
ऊर्ध्वद्वारेषु ह्रस्वाः शशिचरणवशात् स्वस्वचक्रादिमूर्ध्नि
द्वारे द्वारान्तराले गगनतलगता हक्षयुक्ताः सवर्गाः ॥२९॥
डाकिन्यो ह्रस्वभावाः शशधरवदनाः[1] कर्तिकाशुक्तिहस्ता
आलीढाः स्वस्वपात्रैर्दनुजरुधिरपा मुक्तकेशा विवस्त्राः ।
पादे कट्यां ललाटे श्रवणगलकरे घुर्घुराद्यस्थिमुद्रा
मालाखण्डैः कपाले शिरसि कटितले पञ्चवर्णाजिनानाम्
॥३०॥

द्व्यास्या डाकाः करेषु स्वपरिडमरुकैर्वज्रखट्वाङ्गघण्टे
कण्ठे श्रीमुण्डमाला शिरसि च मुकुटो वज्रपट्टे मणिश्च ।
श्रीकण्ठान्नूपुरेऽघ्रौ रुचकमपि करे मेखलाकुण्डलानि
मालापूर्णैः कपालैः सकलतनुगता दंष्ट्रिणो भस्ममुद्रा ॥३१॥
भर्तुर्मालाकपालैः शिरसि च गलकैर्मुण्डमाला शतास्यैर्
अर्धेन्दुर्वज्रमौलौ स्वकटिकरगतं द्वीपिचर्मेभचर्म ।
मारेशौ पादमूले शशिरविहुतभुङ्मण्डलेऽङ्गं च भस्म
मुद्रा नागेन्द्रयुक्ता प्रलयशिखिनिभा डाकिनी चुम्बमाना
॥३२॥

दिक्पत्रे डाकिनीनामधिकडमरुको वज्रखट्वाङ्गमेव
विण्मूत्रासृङ्नृमांसैर्विदिशि दलगतं शुक्रपात्रं करे च ।
तद्वच्चाष्टौ च देव्योऽप्युभयसुखसमापत्तिचक्रं समन्तात्
पीता श्वेतारुणाभा सितहरितवपुर्नीलवर्णासु दिक्षु ॥३३॥
वर्णाश्चिह्नानि भर्तुर्जिनजनककुले पूर्ववत् त्र्यक्षजाला
अन्योन्यालिङ्गनं च स्वपरकुलवशाद्वेदितव्यं समन्तात् ।
दानाद्यैः स्कन्धभूतैर्विषयविषयिभिश्चान्यपञ्चेन्द्रियाद्यैर्
दिक्क्ष्माभिर्दिग्बलैः श्रीजिनसुतवनिताभिश्च देव्यो विशोध्या
॥३४॥
मेरोर्दिक्ष्वष्टभेदैर्दिशि विदिशि गतं सर्वपीठोपपीठं
क्षेत्रं छन्दोहमेलापकचितिभुवनं वेश्मवाय्वर्धसीम्नः ।
बुद्धस्यैतार्कभूम्यामणुतनुजनृणां भूतदेवासुराणां
शक्तेर्भर्तुर्दिनैकं विचरितकुलिका सूर्यचन्द्रप्रचारात् ॥३५॥
देवी पृष्ठेऽधिकारो नय इह पुरतः पञ्चतत्त्वप्रभावैर्
वाय्वीशे दैत्यवह्न्योरघसि च खसुरे यम्ययक्षापरेषु ।
उष्णीषे हृत्प्रदेशे[2] गलशिरसि गते नाभिगुह्ये तु चक्रो
अष्टारे तलोर्ध्वं प्रतिदिनमकराद् द्विद्विलग्नान्तराले ॥३६॥
भर्त्रब्जं सर्ववज्रैः कुलिशमणिगतं चाक्षरैर्बिन्दुभिश्च
सर्वानन्दं समन्तात् शमसुखनिलयं वज्रिणः सर्वकालम् ।
तस्मिंश्चन्द्रद्रवे यो विशति गुरुमुखे कालचक्रः स एव
माराणां कालमुक्तं मरणभयकरं डाकिनीचक्रमेतत् ३७
प्रज्ञोपायाक्षराभ्यामुभयकुलवशा डाकिनी डाकनाम
जाप्यं वज्रत्रयेणापरपदमसितो नादिमध्यान्तभिन्नम् ।
प्राणेनाधिष्ठितं यत्त्वभयगतिवशात् स्वस्वकर्मानुरूपं
सिद्धिं गच्छन्ति शीघ्रं रसगतियुगता डाकिनी वज्रडाकाः
॥३८॥

ये श्वासा मध्यमायां सपदरसशराजन्मकाले बभूवुस्
तैश्चक्राण्यष्टकैः स्युस्तनगगनवशाद् द्वारमध्यस्थदेव्यः ।
पादेनैकेन वाता[3] त्रिभुवनजननी कर्तिकाशुक्तिहस्ता
आलीढोऽर्केन्दुमूर्ध्नि त्वमृतसुखकलालिङ्गितः कालचक्रः ३९
पञ्चत्र्यब्धीन्दुसूर्या विषयगुणवशादासनान्यब्धिचाराः
सप्तार्कादिप्रपूर्णा दिनकरशशिनश्चापराण्यासनानि ।
कृष्णा श्वेतार्कपूर्णा दिनकरशशिनश्चापराण्यासनानि ।
वाराः सप्तार्कपूर्णाः समविषमपदे सूर्यचन्द्रासनानि[4] ॥४०॥
आराश्चन्द्रार्कचाराः कमलदलचतुर्द्वारकोणासनानि
भूयश्चारा द्विगुण्या दिनकरशशिनश्चासनान्येव तानि ।
पूर्णा वारा[5]र्कचाराः समविषमपदे चासनान्यब्धिचाराः
सूर्ये वा पूर्णचन्द्रे भवति कुलवशान्नायकः संपुटो वा ४१
वायोः स्पर्शास्यमेकं त्वपरगुणवशान्मुद्रणास्यं द्वितीयं
रूपं स्पर्शद्वयास्यं भवति च शिखिनो मुद्रणास्यं तृतीयम् ।
स्पर्शो रूपं रसाख्यं[6] सुखमपि पयसो मुद्रणास्यं चतुर्थं
गन्धाद्यं स्पर्शजातं गुणसुखमवनेः पञ्चमं मुद्रणास्यम् ४२
शून्यं पञ्चप्रकारं सुखमपि नभसो मुद्रणास्यं च षष्ठं

एवं वै ज्ञानधातो
एवं मिश्रे चतुष्के
प्रज्ञोपायं दशास्यं
सन्ध्याभेदाच्चतु
लग्नार्धाद्बाहुभेदो
सन्ध्यङ्गे[8] पूर्वपृ
प्रज्ञासङ्गः समापि
प्रज्ञाङ्गे रक्तपीते
प्रज्ञाभावः सिता
प्रज्ञाभावेन भिन्नं
रौद्रं सव्यापराङ्ग
प्रज्ञाभिन्नं जिनस
प्रज्ञाया भर्तृभिन्न
युग्मं सव्यावसव्य
कृष्णं पीतं च नी
प्रज्ञा रक्तासिता
पीतानां कृष्णव
नीलानां विश्वव
एवं वै देवतीनां
प्रज्ञातन्त्रं हि पू
सव्या स्याद् योग
योगाचारं हि पू
सूत्रान्तं सव्यवक
ऋग्वेदं पश्चिमा
सव्यास्यात् साम
पूर्वास्यात् कौल
सिद्धान्तं वामव
पृष्ठात् सव्ये नि
सव्याद्विद्यात्वघो
शून्यास्यात् शू

कृत्स्नेताद्वापरं वै
एवं वीरक्रमाद्यं

---

[1] ने. °धवलाः [2] ने. °श [3] ने. जाता [4] ने. तृतीयचतुर्थयोः पादयोर्व्यत्यासः [5] ने. चारा° [6] ने. रसास्यं [7-7] ने. पञ्चद्वि
[10] ने. गुण° [11] के. °नां

एवं वै ज्ञानधातोर्भवति गुणवशाच्छून्यषट्केन वक्त्रम् ।
एवं मिश्रे चतुष्के शमसुखफलदं [7]पञ्चकं द्वित्रिमिश्रं[7]
प्रज्ञोपायं दशास्यं त्रिविधगुणवशाद् द्वादशास्यं चतुर्धा ४३
सन्ध्याभेदाच्चतुर्धा त्रिविधमपि मुखं लग्नभेदात् त्रिवर्णं
लग्नार्धाद्बाहुभेदो विषममपि समालिङ्गनं कायचित्ते ।
सन्ध्यङ्गे[8] पूर्वपृष्ठे त्रिमुखरसभुजालिङ्गनं मध्यमाङ्गे
प्रज्ञासङ्गः समापत्तिरपि हि हसिताद्यानि यामाभिसन्धौ ४४
प्रज्ञाङ्गे रक्तपीते प्रविशति नियतः कालचक्रस्य भावः
प्रज्ञाभावः सिताङ्गे कषणघननिभे वज्रिणो वामपूर्वे ।
प्रज्ञाभावेन भिन्नं भवति वरतनौ वामपूर्वाङ्गसौम्यं
रौद्रं सव्यापराङ्गं परमजिनपते[9] भावभिन्नं तथैव ।।४५।।
प्रज्ञाभिन्नं जिनस्य प्रवर गण[10]कुलं द्विस्वभावत्वमेति
प्रज्ञाया भर्तृभिन्नं विदिशि च नियतं योगिनी[11] छन्दमेव ।
युग्मं सव्यावसव्यं रविशशिवपुषाप्येव पूर्वापरं च
कृष्णं पीतं च नीलं हरितमपि तथाकाशपातालसंस्थम् ४६
प्रज्ञा रक्तासितानां शशधरधवला लोहितानां तथैव
पीतानां कृष्णवर्णा वरकनकनिभा चासितानां कुलानाम् ।
नीलानां विश्ववर्णाः पुनरपि हरितानां च नीला यथोक्ता
एवं वै देवतीनां स्वकुलदिशिगता देवता वेदितव्याः ।।४७।।
प्रज्ञातन्त्रं हि पूर्वात् पुनरपरमुखादेव योगानुविद्धं
सव्या स्याद् योगतन्त्रं गदति जिनपतिर्वामवक्त्रात् क्रियाद्यम् ।
योगाचारं हि पूर्वात् पुनरपरमुखान्मध्यमं वै समस्तं
सूत्रान्तं सव्यवक्त्राद् गदति सितमुखाच्छुद्धवैभाषितं च ४८
ऋग्वेदं पश्चिमास्यादपि गदति यजुर्वामवक्त्राज्जिनेन्द्रः
सव्यास्यात् सामवेदं परमहरिकुलेऽथर्वणं पूर्ववक्त्रात् ।
पूर्वास्यात् कौलतन्त्रं पुनरपरमुखाद् गारुडं भूततन्त्रं
सिद्धान्तं वामवक्त्रादुदयरविनिभाद्विष्णुधर्मं च सव्यात् ४९
पृष्ठात् सव्ये निवृत्तिः परमसितमुखाद्वामदेवः प्रतिष्ठा
सव्याद्विद्यात्वघोरः पुनरनिलमुखान्मारुतब्रह्मशान्त्यौ ।
शून्यास्यात् शून्य ईशौ त्रिभुवनपतिना स्फारिता लौकिकार्थं
कृतत्रेताद्वापरं वै कलियुगमपरं पृष्ठवक्त्रादिभेदात् ।।५०।।
एवं वीरक्रमाद्यं रविगमनवशादेव सन्ध्या चतुष्कम्

---

ने. रसास्यं [7-7] ने. पञ्चद्वित्रिप्रमिश्रं [8] ने. सन्ध्याङ्गे [9] ने. °पते



आहारं सव्यवक्त्रात् परममपि भयं[1] स्फारितं पृष्ठवक्त्रात् ।
पूर्वास्यान्मैथुनं वै परमसितमुखात् स्वप्ननिद्रा च राजन्
पृष्ठाद्वैश्यो द्विजः स्यान्नृपतिरपि तथा शूद्रजातिः क्रमेण ५१
पूर्वात् सर्वास्तिवादं गदति जिनपतिः सांविदीयं च सव्यात्
पृष्ठास्यात् स्थावरीयं पुनरपि च महासाङ्घिकं वामवक्त्रात् ।
मानुष्यं पूर्ववक्त्रात् पुनरपरमुखात् स्फारितास्तिर्यगा वै
सव्यास्याद्भूतदेवाः अपरसितमुखान्नारकाश्चासुराश्च ५२
हृच्चक्रात् पूर्ववक्त्रात् स्फुरणमपि भवेन्नाभिचक्रात् परास्यात्
संभोगात् सव्यवक्त्राद्भवति च सहजाद्वामवक्त्रात् समन्तात् ।
चक्राणां वक्त्रमध्यात् स्फुरणनिधनतां जातिभावः शरीरे
त्रैलोक्यं चापि कृत्स्नं खलु जिनजनकस्यास्य भेदैश्च सम्यक्
।।५३।।
श्रीचन्द्राच्चन्द्रकान्तेः स्रवति च सलिलं निर्विकल्पस्वभावात्
तद्वत् सर्वज्ञधर्मः स्रवति जिनपतेः स्कन्धमाश्रित्य लोके ।
धर्मस्तोयं यथैव व्रजति समरसं बीजधात्वाश्रयेण
सत्त्वानां चित्तशुद्ध्या भवति बहुविधं पूर्वकर्म[2]प्रभावात् ५४
चिन्ता सर्वार्थकर्तुस्त्रिभुवननिलये नास्ति चिन्तामणेश्च
चित्तस्थं तन्न पश्यन्त्यशुभफलवशात् कर्मणः पापसत्त्वाः ।
दोषाश्चिन्तामणेर्न ह्यशुभशुभफलं सर्वसत्त्वः प्रभुंक्ते
शुद्धे सत्त्वे जिनेन्द्रः स च भवति नरः किं जनेनापरेण ५५
जातो येनाङ्कुरोऽसौ व्रजति स जनको जातभावाद्विनाशं
जातो नष्टस्य तस्य प्रभवति जनको बीजराजस्य भूयः ।
यः पूर्वः सोऽन्यभावान्मृत इति वचनं न स्वरूपेण जातः
शून्याद् येनागतः क्ष्मां व्रजति दशबलस्तेन सौख्यक्षणेन ५६
सौख्यात् सौख्यानुरक्तः क्षण इह सहजो नान्यभावानुरक्तः
स्कन्धा ये तेन जाताः पुनरपि जनका[3]स्तेऽस्य सौख्यक्षणस्य ।
शुद्धाद्धर्मस्ततोऽन्यः पुनरपि च ततोऽन्यश्च तस्माद्विशुद्धो
बीजान्मूलानि शाखाः कुसुमफलमिवारोपिताच्छुद्धभूम्याम्
।।५७।।
भूवार्यग्निश्च वायू रसपरमरसौ चाणवः[4] षट्प्रकारा
गन्धाद्येकैकहीना विषयविरहिताश्चान्तिमा ज्ञानदृश्याः ।
कामा रूपास्त्वरूपा यमयमशशिनश्चान्तिमो धर्मधातुः
सर्वाकाराः सदा तेऽच्युतसुखसहजा वार[5]भूताः समन्तात् ५८

---

[1] ने. भये [2] ने. °कर्मा° [3] ने. जनकं° [4] ने. रावणाः
[11] ने. षः [12] ने. °र्नो [13] ने. सत्वाच°

ारितं पृष्ठवक्त्रात् ।
निद्रा च राजन्
द्रजातिः क्रमेण ५१
विदीयं च सव्यात्
ङ्कं वामवक्त्रात् ।
रतास्तिर्यगा वै
ाश्चासुराश्च ५२
भचक्रात् परास्यात्
वक्त्रात् समन्तात् ।
ातिभावः शरीरे
ास्य भेदैश्च सम्यक्
।।५३।।
निर्विकल्पस्वभावात्
ाश्रित्य लोके ।
त्राश्रयेण
किर्म[४]प्रभावात् ५४
चिन्तामणेश्च
ण: पापसत्त्वाः ।
त्वः प्रभुंक्ते
जनेनापरेण ५५
तभावाद्विनाशं
नराजस्य भूयः ।
स्वरूपेण जातः
सौख्यक्षणेन ५६
नान्यभावानुरक्तः
स्य सौख्यक्षणस्य ।
तस्माद्विशुद्धो
पेताच्छुद्धभूम्याम्
।।५७।।
[४] षट्प्रकारा
ा ज्ञानदृश्याः ।
मो धर्मधातुः
भूताः समन्तात् ५८

अन्योन्यं स्कन्धभूता विषयविषयिनोऽन्योन्यमारास्त्वविद्याः
पञ्चान्यो नानुरक्ता रसगतिषु गता दुःखसौख्यक्षणस्य ।
सर्वाकाराः समन्तान्न परगुणरताः संस्थिताऽभेदवज्रा
अन्योन्यं क्ष्मादिधातौ पुनरपि च गता मुख्यभावेऽन्यभावः[६]
।।५९।।
तैश्चार्धं कालचक्रः प्रकटयति महानेकनिर्माणकायैर्
वज्रज्वालास्फुरद्भिस्त्वसुरसुरनृणां कामधातौ स्थितानाम् ।
संभोगै रूपिणां वै नभसि जिनसुताद्यर्हतां धर्मकायैः[७]
शून्याङ्गैः शून्यकृत्स्नं त्रिभुवनसकलं वायुभिर्वायुकृत्स्नम् ६०
तेजांशैर्वह्निकृत्स्नं ह्युदकमपि जगत्स्फारितैश्चोदकांशैः
पृथ्वीकृत्स्नं धरांशैः समुदितहृदयैः सर्ववस्तुस्वभावम् ।
एकात्मानं समन्ताद्गगनसममिदं दर्शयेच्छुद्धभूम्याम्
एवं बुद्धस्य कायो भवति न म्रियतेऽप्येकसौख्यस्वभावात्
।।६१।।
पञ्चाकारा तदेका सकलजिनवरैश्चाभिसंबोधिरेषा
विंशत्याकाररूपा पुनरपि च ततोऽनेकमायास्वरूपा ।
तस्या एकक्षणा[८]स्यात् शमसुखफलदा नान्यकर्मस्वभावा
अत्रोपायोऽच्युतो यः क्षण इह सहजो धर्मधातुप्रवेशे ६२
बुद्धक्षेत्राण्यनन्तान्यपरिमितगुणा धातवश्चासुराद्याः
स्थित्युत्पत्तिश्च नाशस्त्रिविध इति भवः षङ्गतौ सर्वसत्त्वाः ।
बुद्धाः क्रोधाः सुराद्याः सकरुणहृदया बोधिसत्त्वाः सभार्या
एतच्चक्रं जिनस्य त्रिभुवननमितस्यैकमेकस्य शम्भोः ६३
रोमत्वग्रक्तमांसं सरसमपि तथास्थीनि मज्जावनाड्यस्
तासु प्राणादिवाता रविशशिगमनं वायुमध्ये समन्तात् ।
विज्ञानं चन्द्रमध्ये विमलमणिरिवालिङ्गितं सर्वभावैर्
भावाभावाद्वयं यत् परममृतमिदं व्यापकानां[९] हतं तत् ६४
लोमाद्याश्चन्द्रमान्ताः सकलतनुगता भूमयो द्वादशोक्ताः
षड्वर्गानादयोऽन्याः शमसुखफलदा योगिनां सर्वदास्ता ।
तस्मादन्वेषणीया गुरुचरणगतैर्योगिभिर्मोक्षहेतोर्
नान्यो बुद्धोऽस्ति [१०]कश्चित् त्वपि तत्व[१०]विरहाद् व्यापको मोक्षदो यः[११] ।।६५।।
सत्त्वा बुद्धा न बुद्धस्त्वपर इह महान् विद्यते लोकधातौ
तेषामाराधनेन त्वपरिमितभवश्छिद्यते निर्विकल्पात् ।

द्रोहं कुर्वन्ति योगी व्रजति हि नरकं रौरवाद्यं महान्तं
तस्माच्चित्ते विशुद्धेऽप्यबुधबुधजनानां विरुद्धं न कुर्यात् ६६
लब्ध्वा सत्त्वप्रसङ्गं भवति नरपते शुद्धमैत्र्यादिचित्तं
यद्वा संसारिणां स्यादकुशलगुणिनां द्वेषरागादिचित्तम् ।
गच्छन्तं गन्तुकामं द्विविधमपि भवेत् सर्वदा बोधिचित्तं
मोक्षप्रस्थानहीनं प्रणिधिविरहितं सर्वदा मारचित्तम् ।।६७।।
माराः कुर्वन्त्यशान्तिं त्रिभुवननिलये बोधिसत्त्वाश्च शान्तिं
मारेन्द्रश्चर्द्धिहीनः परमभयकरश्चर्द्धिमानेकशास्ता ।
माराणां मारबुद्धिः परहृदयगता तायिनां सौख्यबुद्धिस्
तस्माद्बुद्धानुभावैस्त्रिभुवनसकलं वर्ततेऽनन्तकालम् ।।६८।।
यन्मानं लोकधातोः कथितमपि जिनैस्तन्नृणां ज्ञानिनां[१२] न
बुद्धानां नास्ति मानं सहजतनुवशादेकहस्तं ह्यनेकम् ।
मानं सत्त्वानु[१३]रूपं प्रकटयति सदा प्राणिनां कर्मभूमाव्
इच्छामानं त्विदं मे यदि वदति सुरा नास्तिकोऽयं वदन्ति
।।६९।।
येनोत्पन्ना जिनेन्द्राः प्रतिदिवसवशान्निर्गता येन गर्भात्
सिद्धा येन क्षणेन क्षरणविरहिताः स्पन्दनिष्पन्दभूताः ।
त्यक्त्वा तद्बुद्धकृत्यं शमसुखरहितं भावयेद्योऽन्यशून्यं
बुद्धत्वं तस्य दूरं सहजमपि सुखं कोटिकल्पैरनेकैः ।।७०।।
न द्राक्षा निम्बवृक्षादमृतमपि विषात् पङ्कजं ब्रह्मवृक्षात्
शून्यान्निर्वाणसौख्यं शुभमशुभवशात् सिद्धयः प्राणिघातात् ।
यज्ञात् स्वर्गः पशूनां परमशिवपदं नेन्द्रियाणां निरोधाद्
वेदात् सर्वज्ञभाषाक्षरसुखमचलं न क्षराशुद्धचित्तात् ७१
सत्त्वानां पापचित्तं भवति नरपतेऽधिष्ठितं मारकायैः
पुण्यज्ञानानुरक्तं सुखदमपि सदाधिष्ठितं बोधिसत्त्वैः ।
निर्वाणं यान्ति यस्मात् सुखसमयवशात् क्लेशमारान् निहत्य
तस्मात् कुर्वन्ति माराः प्रतिदिनसमयेऽनेकविघ्नानि तेषाम्
।।७२।।
सेव्यादौ कर्ममुद्रा जिनसहजसुखस्यास्य वृद्ध्यर्थहेतोस्
तस्मादादित्यरूपा तनुमुखचरणोष्णीषसर्वाङ्गपूर्णा ।
विद्युद्दण्डानुरूपाच्युतसुखजननी लक्षणाङ्गप्रपूर्णा
वज्रैरुद्भासयन्ती त्रिभवगततनुर्धर्मधातुस्ततः स्यात् ।।७३।।

---

जनकं° [४] ने. रावणः [५] ने. चार° [६] ने. °भावाः [७] ने. °कार्यैः [८] ने. °क्षणां [९] ने. वायकानां [१०] [१०] ने. कश्चित्वरपर'
च°

एता मुद्राश्चतस्रोऽक्षरसुखफलदा योगिना भावनीयाः
सर्वस्मिन् सर्वकालं सुरतरतिगतैर्लोकमार्गः प्रयुक्तः ।
ग्रामारण्यश्मशानेऽशुचिशुचिनिलये वेश्मदेवालये च
वर्णावर्णाभिचारैस्तनुबलसुखदैरन्नपानादियोगैः ॥७४॥
वातैः संघट्टमानैस्तडिदनलशिखा द्रावयेन्मूर्ध्नि चक्रं
यो यो बिन्दुर्द्रुतोऽस्माद्गलहृदयगतो नाभिगुह्ये निरुद्धः ।
बिन्दोः स्पन्दद्रवं यत् कुलिशमणिगतं संनिरुद्धं ध्वजाग्रे
प्रज्ञाज्ञानक्षणं तद्यदि ददति सुखं बिन्दुमालाच्युतेन ॥७५॥
तस्मान्निस्यन्दसौख्यं क्षणमिह सहजं धर्मधातुर्ददाति
प्राणेनाकृष्य सर्वान्न स गतिषु गतान् क्लेशमारान् निहत्य ।
ऋद्धिं सर्वज्ञभूमिं त्रिभुवनगुरुतां योगिनां[1] जन्मनीह
मृत्युं मार्गप्रविष्टो व्रजति यदि तदा तद् ग्रहादन्यजात्या
॥७६॥

यान्यैर्गुण्याल्पभावा विषयविरहिता कायमुद्रा द्विधा सा
तस्या रागानुरक्ता गुणनिधिरपरा वाक्स्वरूपा द्विधा च ।
कृष्णा श्वेतानुरक्ता विषयगुणरता चित्तमुद्रा द्विधा स्याद्
अष्टौ द्वौ पञ्च पञ्च स्फुटमपि खयुगं शून्यवेदं च वर्षम्
॥७७॥

रत्नेशो यावदस्या जिनवरजननी योगिभी रक्षणीया
रत्नेशोद्भूतिकाले सकलगुणनिधिं मण्डलं वर्तयित्वा ।
बुद्धाधिष्ठानमन्त्रैः सृजति समसुखं गुह्यपद्मे समन्त्रं
गुह्ये रक्षां प्रकृत्या कुलिशमणिगतं स्वादयेद्बोधिचित्तम्
॥७८॥

तस्मिन् पुत्रो भवेद्यो जिनजनकसुतो मञ्जुवज्रः स एव
प्रज्ञाधिक्यात् कदाचित् प्रभवति दुहिता बुद्धमाता ध्रुवं
स्यात् ।

तस्मादन्यैस्त्रिपुष्पैः सितकमलधरो जम्भलो वज्रपाणिर्
अन्योऽष्टावष्टपुष्पैर्दिशि विदिशि गता महर्द्धिकाः[2]
क्रोधराजाः । ७९॥

तस्मिन् मासे रजो यत् प्रभवति हि पुनर्मञ्जुघोषो भवं तद्
विंशद्वर्षाणि यावत् प्रतिरजसि महासात्त्विका बोधिसत्त्वाः ।
किञ्चित् सत्त्वांशहीनः प्रभवति च ततः शून्यवेदानि यावद्
विंशद्वर्षाणि यावत् पुनरपि च ततश्चान्यसत्त्वोऽल्पवीर्यः ८०
तस्माद्योनौ रजो न[3] प्रतिहतविषयस्तद्विनाशान्न सेकः
किन्तु प्रज्ञाभिषेको जिनपतिवचनैर्नष्टबीजस्य[4] देयः ।
तासां भूतोयतेजोऽनिलगगनगुणान्वेषणीया जिनाङ्गैर्
एषा सत्त्वार्थकर्त्री भवति बहुफला बोधिचित्तस्य सेवा ८१
यासृक्पानं करोति प्रवर सुरनृणां मक्षिका सामृतैका
छर्दिर्हृद्गुह्यवक्त्रात् कुलिशमपि गता नाब्जमध्ये प्रविष्टा ।
विण्मूत्रं रक्तमांसं परमसमरसं छर्दिमध्ये प्रविष्टं
एतज्ज्ञानामृतं च त्रिभुवनगुरुणा देशितं सर्वतन्त्रे ॥८२॥
प्रज्ञाधर्मोदये यत् पतितमपि सुखं रक्षणीयं प्रयत्नाद्
यः कश्चित्तेन सत्त्वो भवति जिनकुले बोधिसत्त्वः स एव ।
तस्मात्तं भक्षयन्ति प्रतिदिनसमये राक्षसा मारभूताः
प्रज्ञापुष्पेण युक्तं शिवसुखफलदं भक्षितं देशयन्ति ॥८३॥
नाकटचं वज्रमब्जात् परमसुखगतं सङ्कुचं नैव यावद्
बुद्धाधिष्ठानमेतत् प्रभवति हि यदा ज्ञानसिद्धिस्तदा वै ।
वज्राब्जाभ्यां प्रविश्य स्वकुलिशहृदये ज्ञानचक्रं प्रविष्टं
सर्वाकारं करोति ह्युभयतनुगतं रश्मिभिः पूरयित्वा ॥८४॥
एषा सिद्धिर्यदि स्यान्न हि कुलिशमणौ संस्थितं भक्षणीयं
प्रज्ञाधर्मोदयस्थे सकलजिनकुलं स्फारयेद्रक्षणार्थम् ।
प्रज्ञायुक्ते त्वथैके पुनरपि वचनं प्रोच्यते बुद्धकाये
यः कश्चिच्चास्य नाशं ह्यभिलषति शठो मार्यते वज्रिणा
सः ॥८५॥

ये प्रोक्तानेकमन्त्रास्त्रिभुवनपतिना क्रूरकर्मस्वभावास्
ते सर्वे मारपक्षक्षयभयजनकाः प्राणिनां नो कदाचित् ।
कर्तारो ये स्मृतीनां रणविषयरता मारकान्येऽपि तीर्थ्यास्
तेषां ते युञ्जनीयाः परमजिनसुतैः प्राणिनां रक्षणार्थम् ८६
डाकिन्यो वज्रपूर्वाः पशुजननिधनेऽप्येषणीया न विद्भिः
सत्त्वानां रक्षणार्थं त्रिभुवनगुरुणा स्फारिता लोकधातौ ।
तस्मात् ता रक्षयन्ति प्रतिदिनसमये साधकं द्वेषयन्ति
साध्यः कर्मप्रभावाद्व्रजति हि मरणं साधकस्यैष मारः ८७
पुंसां चित्तं समन्तादशुभफलवशात् क्षुद्रविद्यानुरक्तं
विद्येयं मे करोति त्रिभुवनसकलं वश्यमेकक्षणेन ।
इत्याशालुब्धचित्तः प्रविशति नरकं ज्ञानदानं विहाय
पृष्ठे द्रव्यं[5] स्वभार्या भवति परवशाऽहो कुकर्मप्रवृत्तिः ८८
न प्रज्ञा नाप्युपायः सहजतनुरियं धर्मकायो बभूव
प्रज्ञोपायः स्वरूपः खलु विगततमो ज्ञानविज्ञानभेदात् ।

सोऽयं संभोगका
सत्त्वानां पाकहेत
एकोऽसौ वज्रसत
रौद्राणां पाचना
रत्नेशो दुःखिता
विघ्नानां ध्वंसन
द्वेषाद्या विश्वमा
मोहात् सा लोच
रागात् सा पाण्ड
एतौ द्वौ विश्वरू
पञ्चस्कन्धस्वभ
सत्त्वानां पाचन
शुद्धावासादिके
एवंकारे स्थिति
सत्त्वानां पाकहे
बाह्याध्यात्मं प
बाह्ये नानाप्रदे
भूम्यादौ मण्डले

शब्दादौ यच्च
एवंकारे स्थिति
एको वज्री त्रि
त्र्यध्वस्त्रिस्थान

तन्त्रेऽप्येवं मय
वज्री चन्द्रद्रव
वज्रस्त्रीणां भ
बुद्धक्षेत्रे प्रविष
एकं पश्यन्त्यने
चक्रस्थं पूर्वज
एकार्थानन्तभ
चक्रस्थः पिण्ड

तिर्यक्प्रेतासुर

---

१ ने. °नी  २ ने. सर्द्धिकाः  ३ ने. म  ४ ने. °वीर्यस्य  ५ ने. द्रव्ये  ६ ने. राज°  ७ ने. स्थापनीयं  ८ ने. °पात्रं

सोऽयं संभोगकायः प्रतिरवक इवानेकसत्त्वार्थकर्ता
सत्त्वानां पाकहेतोर्भवति पुनरसौ बुद्धनिर्माणकायः ॥८९॥
एकोऽसौ वज्रसत्त्वः प्रलयघननिभो हेरुको वै बभूव
रौद्राणां पाचनार्थं स च समयजिनो मोहितानां सुखार्थम् ।
रत्नेशो दुःखितानां स च कमलधरो रागिणां राग[6]हेतोर्
विघ्नानां ध्वंसनार्थं त्वसिकरकमलोऽमोघसिद्धिर्बभूव ॥९०॥
द्वेषाद्या विश्वमाता प्रलयशिखिनिभा डाकिनी सा बभूव
मोहात् सा लोचनाख्या परमकरुणया मामकी मानहेतोः ।
रागात् सा पाण्डराख्या सकलगुणनिधिस्तारिणी चेर्ष्यया सा
एतौ द्वौ विश्वरूपौ विषयविषयिनोऽन्ये च सर्वे बभूवुः ९१
पञ्चस्कन्धस्वभावैर्विहरति कृपया वज्रयोषिद्भगेषु
सत्त्वानां पाचनार्थं त्वविदितनियमानामपुण्यार्जितानाम् ।
शुद्धावासादिके यद्विहरति भगवान् श्रावकानां निमित्तम्
एवंकारे स्थितिर्या परमनियमिनामुत्तरे स्थापनार्थम्[7] ९२
सत्त्वानां पाकहेतोस्त्रिविधविहरणं कायवाक्चित्तभेदैर्
बाह्याध्यात्मं परं च प्रभवति नियतं वज्रिणः सर्वकालम् ।
बाह्ये नानाप्रदेशे भवति वरतनौ प्राणवायोः प्रचारे
भूम्यादौ मण्डले यत् प्रभवति च विभोर्वज्रयोषिद्भगे यत्
॥९३॥
शब्दादौ यच्च चित्तं व्रजति न विषये चापरं तद्वदेव
एवंकारे स्थितिर्या परमसुखपदे कायवाक्चित्तवेगः ।
एको वज्री त्रिभेदो विषयविषयिभिश्चावृतो धातुभिश्च
त्र्यध्वस्त्रिस्थानवासी त्रिभवमिह गतोऽनेकसत्त्वार्थहेतोः
॥९४॥
तन्त्रेऽप्येवं मया यत् श्रुतमिति वचनं तन्मया ज्ञातमेवं
वज्री चन्द्रद्रवाद्यः शिरसि गलहृदोऽब्जे च नाभौ च गुह्ये ।
वज्रस्त्रीणां भगे तत् परकमलगतो बीजमोक्षत्रयेण
बुद्धक्षेत्रे प्रविष्टस्तदिह स भगवान् योगिभिर्वेदितव्यः ९५
एकं पश्यन्त्यनेकं प्रणिधिगुणवशात् शान्तरागादिभावैश्
चक्रस्थं पूर्वजन्म स्वहृदयजनितैर्वासनाया बलेन ।
एकार्थानन्तभाषा प्रविशति हृदये प्राणिनां स्वस्वभावैश्
चक्रस्थः पिण्डपातं[8] व्रजति विहर्तुं स्थायिनां पुण्यहेतोः
॥९६॥
तिर्यक्प्रेतासुराणां सुरगतिषु नृणामार्यश्रेष्ठादिकानां

[8] ने. °पात्रं



भूतैष्यद्वर्तमानं त्रिविधमपि सदा सत्यधर्मं ब्रुवन्ती ।
मार्गे संस्थापयन्ती त्रिभवमविकलं स्वस्वभाषान्तरेण
एषा सर्वज्ञभाषा समसुखफलदा देवभाषा न सा स्यात् ९७
बुद्धानामप्यगम्या त्वपरिमितगुणा बुद्धनिर्माणमाया
आत्मानं दर्शयन्ती त्रिभुवननिलये शक्रजालं यथैव ।
नानाभावैर्विभिन्ना सजिनसुरनृणां स्वस्वचित्ते प्रविष्टा
एषानुत्पन्नधर्मा पयसि नभ इव भ्रान्तिदोत्पत्तिरत्र ॥९८॥
सर्वाकारं ह्यगम्यं विषयविषयिनां कायवज्रं जिनस्य
वाग्वज्रं सर्वसत्त्व[1]स्वहृदयरुतकैर्धर्मसंपादकं च
सत्त्वानां चित्स्वभावं सकलभुवि गतं वज्रिणश्चित्तवज्रं
भावानां ग्राहकं यद्विमलमणिरिव ज्ञानवज्रं तदेव ॥९९॥
दानाद्याः षट्चतस्रः शमसुखफलदाः शक्तयस्ता दशोक्तास्
तासां शुद्धा उपायाः परमदशविधाः पूर्णचित्ता घटान्ते ।
मारक्लेशक्षयो वै मदन इति हरो वज्रवृन्दं द्रुमाद्याः
षण्मुद्राः शूकषट्कं त्रिभुवनजनको ज्ञानविज्ञानमेकम् १००
चक्रं स्वच्छं समन्तात् त्रिभव इति सुखं रत्नमस्यैव रागः
पद्मं क्लेशक्षयोऽसिः कुलिशमपि महाज्ञानकायो ह्यभेद्यः ।
छेदोऽज्ञानस्य कर्त्री वर षडपि कुलान्येभिरुत्पादिता ये
तेऽप्येवं वेदितव्याः खमिव समरसाः स्कन्धधात्विन्द्रियाद्याः
॥१०१॥
यस्मिन् वै जातिरूपं व्रजति निधनतां तन्महारूपमुक्तं
यस्यां संसारदुःखं व्रजति निधनतां सा महावेदिनोक्ता ।
यस्यां संसारसंज्ञा व्रजति निधनतां सा महावज्रसंज्ञा
यस्मिन् संसारवृद्धिर्व्रजति निधनतां वज्रसंस्कार एव १०२
यस्मिन् निद्राद्यवस्था व्रजति निधनतां यच्च विज्ञानमुक्तं
यस्मिन्नज्ञानभावो व्रजति निधनतां तन्मुनेर्ज्ञानमेव[2] ।
एते वैरोचनाद्याः परमजिनवराः षड्विधाः षट्कुलानि
अन्ये षड्धातुभेदा अवनिशिखिपयो मारुताकाशशान्ताः
॥१०३॥
यस्यां मोहः समस्तो व्रजति निधनतां लोचना सा धरित्री
यस्यां मानः समस्तो व्रजति निधनतां मामकी साम्भ एव ।
यस्यां रागः समस्तो व्रजति निधनतां पाण्डरा सा हविः
स्याद्

[1] ने. °सत्त्वा° [2] ने. °ज्ञानमेव [3] ने. तारणी [4] ने. द

ां व्रुवन्ती ।
भाषान्तरेण
। न सा स्यात् ९७
र्माणमाया
ालं यथैव ।
ाचित्ते प्रविष्टा
ोत्पत्तिरत्र ॥९८॥
ाज्रं जिनस्य
दकं च
ज्रणश्चित्तवज्रं
ज्रं तदेव ॥९९॥
तयस्ता दशोक्तास्
चित्ता घटान्ते ।
न्दं द्रुमाद्याः
विज्ञानमेकम् १००
रत्नमस्यैव रागः
ाकायो ह्यभेद्यः ।
मरुत्पादिता ये
न्धधात्विन्द्रियाद्याः
॥१०१॥
ान्महारूपमुक्तं
महावेदिनोक्ता ।
महावज्रसंज्ञा
ासंस्कार एव १०२
ाच्च विज्ञानमुक्तं
ुनेर्ज्ञानमेव[2] ।
ाः षट्कुलानि
ताकाशशान्ताः
॥१०३॥
ोचना सा धरित्री
ामकी साम्भ एव ।
ाण्डरा सा हविः
स्याद्

यस्यामीर्ष्या समस्ता व्रजति निधनतां तारिणी[3] सानिलश्च
॥१०४॥
यस्यां द्वेषः समस्तो व्रजति निधनतां वज्रधात्वीश्वरी सा
यस्यां मात्सर्यसर्वं व्रजति निधनतां विश्वमाताक्षरं सा ।
दृष्टादृष्टं हि रूपं मनसि नभसि वै पश्यते यः स चक्षुर्
दूराच्छब्दं शृणोति प्रकटमिव महाश्रोत्रमेतज्जिनस्य १०५
सर्वं गृह्णाति गन्धं परमसुखकरं सा सुता सा विभोश्च
सा जिह्वाया सुचन्द्रा मृतमपि च सदा स्वादते सौख्यदं च ।
वज्रस्पर्शं समन्तादपहरति सदा वज्रकायेन्द्रियं तत्
प्रज्ञोपायप्रसङ्गाद्विशति समसुखे यो मनः सोऽस्य धर्मः १०६
एते षड्भेदभिन्ना विषयविषयिनो बोधिसत्त्वाः सभार्या
विश्वे रूपादयोऽमी जिनवरविषयाः षट्प्रकाराः समन्तात् ।
स्वच्छाजातानिरुद्धाः परमसुखकरानाविला ज्ञानगम्या
नान्यो ग्राह्यस्त्रिधातौ तु सकलजगच्चेन्द्रियद्वारमस्याः १०७
ज्ञानाकृष्टिं करोत्यत्र पुनरतिकां तत्प्रवेशं च जम्भः
स्तम्भस्तद्बन्धनं वै परमसुखवशान्मानकस्तोषणं च ।
चक्रस्य ज्ञानचक्रे समरसकरणं वज्रवेशः करोति
एवं वै वज्रदेव्यः प्रकटितनियता योगिनीतन्त्रकाये १०८
माराणां ताडनं वै त्रिभुवननिलये नीलदण्डः करोति
बन्धं क्रोधोऽचलश्च प्रलयरविनिभः कीलनं चातिवीर्यः ।
टक्किस्तद्वीर्यनाशं त्ववनितलगतं स्तम्भनं स्तम्भ एव
उष्णीषश्चाविनाशं प्रकटित[4]नियताः पूर्ववत् क्रोधदेव्यः
॥१०९॥
प्रेतानां पाचनार्थं स्फुरणमपि ततश्चर्चिकादेर्बभूव
तुष्टानां वै सुराणां दिशि विदिशि तथा रक्षणार्थं जनानाम् ।
नागानां पाचनार्थं फणिकुलसकलं स्फारितं वज्रिणा च
दैत्यानां पाचनार्थं स्फुरणमपि महाश्वानवक्त्रादिकानाम्
॥११०॥
अन्यद्यत्किञ्चिदस्ति स्फुरणमपि विभोर्मण्डले वस्तुजातं
सर्वं[5] सत्त्वार्थहेतोर्वरविविधगुणं वेदितव्यं स्वकाये ।
एवं तन्त्राः समस्ता विविधगुणगता योगिनीयोगभेदात्
सेकोऽस्मिन् द्विप्रकारोऽपि कुलगुणवशाल्लोकलोकोत्तरं च
॥१११॥

या स्तनस्पृष्टेरपरममृतास्वादनालिङ्गनं यत्
प्रज्ञासङ्गे चतुर्थं क्षणममृतगतं बोधिचित्तद्रुते यत् ।
तत् सर्वं लौकिकं वै परमकरुणया देशितं मार्गहेतोः
सेको लोकोत्तरो यः परमजिनपतेर्दिव्यमुद्रानुषङ्गः ॥११२॥
चित्तस्याभा समात्रा स्वमनसिजनिभादर्शबिम्बोपमा वै
योगीन्द्रैः सेवनीया सकलजिनसुतैः सेविता या च बुद्धैः ।
सा ज्ञानार्चिः प्रबुद्धा दहति सविषयं मारवृन्दं समस्तं
रागादींश्चापि काये ददति शमसुखं योगिनां वर्षयोगात्
॥११३॥
प्रज्ञाज्ञानं च चित्तं भवति दशविधस्तस्य चाभास एव
सेकोऽस्मिन् मज्जनं यद्विमलशशिनिभादर्शबिम्बोपमा वै ।
तस्मिन् निर्वाणसौख्याच्युतमपि सहजं चाक्षरं वै चतुर्थं
यस्यैतद्बुद्धवक्त्रं हृदयमुखगतं वर्तते श्रीगुरुः सः ॥११४॥
आकाशाशक्तचित्तैरनिमिषनयनैर्वज्रमार्गं प्रविष्टैः
शून्याद्धूमो मरीचिः प्रकटविमलखद्योत एव प्रदीपः ।
ज्वालाचन्द्रार्कवज्राण्यपि परमकला दृश्यते बिन्दुकश्च
तन्मध्ये बुद्धबिम्बं विषयविरहितानेकसंभोगकायम् ॥११५॥
आकाशं तच्च दृष्टया जलधरसहितं योगिनालोकनीयं
यावद्वै कृष्णरेखा स्फुरदमलकरा दृश्यते कालनाड्याम् ।
तस्यां सर्वज्ञबिम्बं पयसि रविरिवानाविलं विश्ववर्णं
सर्वाकारं स्वचित्तं विषयविरहितं नापरं चित्तमेव ॥११६॥
दृष्टे बिम्बे प्रकुर्यात् प्रतिदिनसमये प्राणवायोर्निरोधं
यावद्वै भ्राम्यमानं स्वतनुपरिवृतं दृश्यते रश्मिचक्रम् ॥
षण्मासैः स्पर्शहीनं व्रजति समसुखं मार्गचित्तं यतीनां
रागारागान्तगाद्यं क्षणमपि च विभोर्वर्धते श्वाससंख्यम्
॥११७॥
ओद्राज्वालान्तराले विरमसहजयोर्ज्ञानविज्ञानमध्ये
निद्रा घूर्माभि[6]सन्धौ कुलिशकमलयोर्यत्सुखं द्वन्द्वयोगे ।
वृद्धिं तस्य प्रकुर्याद् गुरुनियमवशाद्वर्धते नात्र चित्रं[7]
हत्वा क्लेशांश्च मारान् विशति जिनपतिं वर्षयोगात्
सुयोगी ॥११८॥
भूम्याकारो दृढो न द्रुतसलिलवपुर्न द्रवस्त्वद्रवत्वाद्
वह्न्याकारो न वह्निश्चलपवनतनुर्निश्चलो योऽनिलो न

[3] ने. तारणी [4] ने. दसवल° [5] ने. सर्व° [6] ने. °ति° [7] ने. चित्तं

शून्याकारोऽपि दृश्यः सितहरितमहाविश्ववर्णो न वर्णः
सर्वाकारोऽप्यदृश्यः[1] स्वहृदयकलुषक्लेशमारप्रभावात् ११९
नादो बिन्दुः कलाज्ञानममृतपदगाः शृङ्खलाबद्धनाड्यः
प्राणापानत्रिमार्गाः सकुलिशकमलं वज्रमेवाब्जयुक्तम् ।
वायोः सङ्घट्टमध्ये विषयविषयिनां निर्गमश्च प्रवेशो
धूमादीनां निमित्तग्रहणमपि च तद्गोपनीयं रहस्यम् ॥१२०॥
मध्ये प्राणप्रवेशः सरविशशिगतेर्बन्धनं सव्यवामे
चित्तं मुद्राप्रसङ्गे परमसुखगतं वज्रसंबोधनं च ।
पद्मे वज्रध्वनिर्वा स्वकरसलिलजोल्लालनं सौख्यहेतोर्
बीजात्यागः स सौख्यो मरणभयहरः श्रीगुरोर्वक्त्रमेतत्
॥१२१॥

पृथ्वी तोयं प्रयाति ज्वलनमपि जलं पावको मारुतं च
वायुः शून्यं च शून्यं व्रजति दशविधं वै निमित्तं निमित्तम् ।
सर्वाकारं प्रयात्यक्षरपरमसुखानाहतं ज्ञानकायं
ज्ञानाद्वृद्धिश्च सिद्धिर्भवति नरपते जन्मनीहैव पुंसाम्
॥१२२॥

कामानिर्माणकायः प्रभवति नियतस्त स्य वागेव पूर्णा
ज्वालानिर्माणचित्तं परमसुखकरं ज्ञानमेवास्य चोद्रा ।
आनन्दो भोगकायः सपरमविरमानन्दमस्य क्रमेण
वाक्चित्तं ज्ञानवज्रं भवति हि सहजानन्द[2]मेवास्य[2] शम्भोः
॥१२३॥

कस्या वै कर्मकायस्त्रिभुवननमितस्तस्य वागुद्भवः स्याद्
घूर्मा वै धर्मचित्तं भवभयमथनं ज्ञानमस्यैव निद्रा ।
वर्णो[3] वै शुद्धकायः स्वररहितकला बिन्दुनादाः क्रमेण
वाक्चित्तं ज्ञानवज्रं त्रिविधभवगतं शुद्धकायस्य शम्भोः
॥१२४॥

जाग्रत्स्वप्नस्वरूपं पुनरपरमिदं सुप्ततूर्यस्वभावं
कायस्थं श्वासलीनं विचरति विषयान्निश्चलं चित्तलीनम् ।
ज्ञानस्थं[4] स्त्रीप्रसङ्गात् क्षणमपि च भवेद्बोधिचित्ते द्रुते च
निर्माणादेः क्रमेण प्रभवति नियतं चित्तवज्रं चतुर्धा १२५
एवं चित्तं चतुर्धा त्रिविधभवगतं प्राणिनां बिन्दुमध्ये
योगीन्द्रै रक्षणीयं शमसुखफलदं व्यापकं मोक्षहेतोः ।
बिन्दोर्मोक्षे क्व मोक्षो गतपरमसुखे योगिनां जन्मबीजे
तस्मात् संसारसौख्यं क्षण इह यतिभिः सर्वदा वर्जनीयम्
॥१२६॥

एकत्वह्यादिकाद्योः शशिदिनकरयोरासनं वज्रिणो न
हूंकारेणैव चिह्नं परिणतमपरं नेक्षते वर्णरूपम् ।
उत्पन्नस्याक्षरेण क्षरनिधनगतस्यास्य दिव्येन्द्रियस्य
सर्वाकारस्य बिन्दोः सकलजिनपतेर्विश्वमायाधरस्य १२७
लाद्या यास्त्वष्टमात्रा विषयगुणगताश्चार्धमात्राविहीना
अन्योन्यं भेदभिन्नाः सपदरसशरा मध्यमा श्वासवाहाः ।
दीर्घा लग्ने द्वितीये विषयगुणवशाद्भेदितान्योन्यभेदैर्
भूयः सन्धौ तृतीये प्लुतविषयगुणा मध्यमा श्वासवाहाः
॥१२८॥

एवं सन्ध्याचतुष्के सशरगिरिरसा मध्यमा श्वासमात्रा
त्रिंशत्काद्यक्षराणि प्रकटनवशतान्येव त्रिंशद्धतानि ।
षण्मात्राभेदभिन्नानि खखयुगशराणि त्रिलग्नत्रिनाड्याम्
एवं दीर्घप्रभिन्नान्यपरदिनगतानि त्रिलग्नत्रिनाड्याम् १२९
भूयः षण्मात्रभिन्नान्यपि निशिसमये च त्रिलग्नत्रिनाड्याम्
एवं दीर्घप्रभिन्नान्यपरनिशिगते च त्रिलग्नत्रिनाड्याम् ।
श्वासोच्छ्वान् वहन्ते प्रतिदिनसमये खं खषट्चन्द्रनेत्रान्[5]
पूर्वा आकृत्यशून्याः समविषमगतेर्योजयेन्मध्यमायाम् १३०
बाह्ये या चाष्टमार्धा प्रभवति घटिका राहुभोगात् परस्था
श्वासार्धं श्वासदेहे खलु विगततमा सर्वलोकावभासा ।
पूर्वार्धा सान्धकारं त्रिभुवनसकलं नीयते यत्र शून्ये
तस्मात् तां भेदयित्वा विशति गततमां कालचक्रैकयोगी १३१
चन्द्रो नायाधिकार्के विभुपरमकला सात्र सन्ध्याचतुष्के
यामे यामे ब्रुवन्ती निशिदिवसवशादर्धलग्नप्रभेदैः ।
षट्त्रिंशत्कालदूत्यो द्विगुणनृपतयोऽन्यास्तिथौ द्व्यष्टभेदे
चाराणां[6] चाष्टभेदे खलु पुनरपरे नैकसन्धिप्रवेशे ॥१३२॥
वेदर्तुश्वासशेषं त्रिभुवनजननी डाकिनी विश्वरूपा
या हीना चन्द्रमध्ये परमजिनपतेः सा स्वमुद्रा द्विधा स्यात् ।
यार्कस्था साष्टभेदा दिशि विदिशि दले यामभोगावसाने
शेषान्याश्चक्रदेव्यः परमभयकरा बाह्यदेहे समन्तात् १३३
मन्दे रन्ध्रं दिनाख्या तमिनि सुरगुरौ सार्धनेत्राक्षिसंख्याः
सार्धं षड्वेदजाताः परमजिनपतेश्चित्तवज्रोद्भवास्ताः ।
भौमे शून्याहिचन्द्रा रविबुधगुरुकेतोश्च शून्याहिखैका
खाक्ष्यक्षेकाश्च जाताः खलु परमविभोः शुद्धवागुद्भवास्ताः

या चन्द्रस्यर्तुभुक्ति
एकीभूताः समस्ता
डाकिन्यः कालरूप
तस्मात् ताः साधन

यावद्भुक्तिर्ग्रहाणां
तावत् किं कालदूत
दूती सूक्ष्म[7]प्रचारो
ज्ञातव्यो योगयुक्तै
मार्त्तण्डेन्दोः पदान
अङ्गैर्भागावशेषं ग्र
सर्वाः सन्ध्याष्टया
श्वासाश्चैकैकलग्ने
द्विद्व्यंशेष्वाद्यविद्य
तस्मान्मृत्वादिनाङ्
एवं पञ्चप्रकारै क्र
यस्मिन्निन्दोः फलै

षण्मासर्तुत्रयेण ग्रह
षष्ठोऽर्कस्यर्तुभेदश्च
तस्मिन् स्पर्शाङ्गम
ओषध्यः सिद्धिदार

भौमः शुक्रो बुधेन्दु
मन्त्री मेषादिराशौ
शान्ता बिन्द्वर्कराश
वश्याकृष्टौ वियो

शान्तावादौ सिता
पीतस्तम्भेऽग्नियाम
आकृष्टौ पञ्चमे
कृष्णास्यं मारणेः

[1] ने. °श्य° [2-2] ने. एवास्य [3] ने. वर्णा [4] ने. ज्ञात° [5] ने. °नेत्रात् [6] ने. वाराणां [7] ने. सूक्ष्मा° [8] ने. °न्त° [9] ने. क्ष

।।१३४।।

या चन्द्रस्यर्तुभुक्तिः खखरसशिखिनः कायवज्रोद्भवास्ता
एकीभूताः समस्ता रसख इति युगाश्चार्धनाडीस्तथैव ।
डाकिन्यः कालरूपाः सकलतनुगताः प्राणिनां प्राणहन्त्र्यस्
तस्मात् ताः साधनीयाः प्रतिदिनसमये रोपयित्वा स्वमार्गम्

।।१३५।।

यावद्भुक्तिर्ग्रहाणां स्वपरगतिगता श्वासनिःश्वासचारास्
तावत् किं कालदूती प्रभवति वरदा व्यापिनी या त्रिधातौ ।
दूती सूक्ष्म[7]प्रचारो गुरुवचनगतो बोधिचित्तेऽक्षरे च
ज्ञातव्यो योगयुक्तैर्व्यपगतकलुषैर्नान्यथा रागचित्तैः ।।१३६।।

मार्त्तण्डेन्दोः पदान्यप्युभयगतिवशात् तृष्णया तानि तानि
अङ्गै भगावशेषं ग्रसति स चरणं राहवे शेकहेतुः ।
सर्वाः सन्ध्याष्टयामाः प्रतिदिनसमये प्राणिनां द्वादशाङ्गाः
श्वासाश्चैकैकलग्ने द्विगुणनवशतप्राणवाहाङ्ग[8]मुक्तम् १३७
द्विद्व्यंशेष्वाद्यविद्या प्रथमदिनवशाद् द्वादशाङ्गानि यावत्
तस्मान्मृत्वादिनाङ्गानि च परनवमी पूर्ववद्यानि तानि ।
एवं पञ्चप्रकारे ऋतुरपि च भवेत् सर्वतो द्विद्विमासाद्
यस्मिन्निन्दोः फलैका व्रजति निधनतामादिमासः स एव

।।१३८।।

षण्मासर्तुत्रयेण ग्रहणमपि भवेद् द्वादशाङ्गप्रतीत्या
षष्ठोऽर्कस्यर्तुभेदश्चरणगतिवशाच्चन्द्रमध्ये प्रविष्टः ।
तस्मिन् स्पर्शाङ्गमध्ये ग्रसति स चरणं राहुरिन्द्वर्कयोश्च
ओषध्यः सिद्धिदास्ता दिननिशिसमये राहुणालोकिता ये

।।१३९।।

भौमः शुक्रो बुधेन्दू रविबुधभृगवो भौममन्त्र्यर्किमन्दा
मन्त्री मेषादिराशौ प्रतिदिनसमये क्षेत्रिणः[9] सर्वकालम् ।
शान्ता बिन्द्वर्कराशी बुधभृगुकुजमन्त्र्यर्किराशिश्च पुष्टौ
वश्याकृष्टौ वियोगे प्रभवति मरणे क्षेत्रिणोऽस्मिन् यदि
स्यात् ।।१४०।।

शान्तावादौ सितास्यं सितकनकनिभं पौष्टिके हस्तयामे
पीतस्तम्भेऽग्नियामे कनकरविनिभं मोहनेऽब्धौ च रक्तम् ।
आकृष्टौ पञ्चमे स्याद्रविजलदनिभं षष्ठयामे च वश्ये
कृष्णास्यं मारणेऽद्रौ कषणसितमिहोच्चाटनेऽहो निशान्ते

।।१४१।।

[7] ... [8] ने. °न्त° [9] ने. क्ष°



पृथ्वीतोयाग्निवातान् शशिरविसुराजीवभोक्तार एते
एषा जीवश्च भोक्ताप्यशुभफलवशान्मन्यतेऽहं च मुक्तिः ।
दृष्ट्वा दुःखानुरक्तो ग्रहभुजगसुरान् प्रार्थयेद् भूतवृन्दं
मोक्षे यस्य प्रसादात् प्रभवति मनसस्तं च शान्तिं करोति

।।१४२।।

आदिश्वासो गुणात्मा विविधगुणवशात् सापि याति त्रिसंख्यं
तिथ्याख्यास्तेऽपि जाता विषयगुणवशास्तेऽपि भूयस्त्रिगुण्याः ।
जाता भूताब्धिसंख्याः पुनरपि हि चतुश्चारभेदैर्हतास्ते
नाड्यर्धश्वाससंख्याः पुनरपि घटिका श्वाससंख्या द्विगुण्याः

।।१४३।।

द्वित्र्यब्धीषूत्वगाष्टग्रहदशभिरियं वर्धिता कालनाडी
तस्माद्वर्गप्रभेदैर्विविधपथगता कालनाडी समन्तात् ।
त्रैलोक्यं पूरयन्ती समसुखफलदा चन्द्रसूर्यप्रचारा
यावद्वेदाहिवह्निः प्रभवति नियता कर्तिकाशुक्तिहस्ता १४४
चक्राणीष्वब्धिसंख्या विषयगुणवशात् कायवाक्चित्तभेदै
रक्षां कुर्वन्ति चर्तुः शमसुखफलदान्यष्टधूमादिदेव्यः ।
एवं सूर्यस्थभर्ता परमशशिकलालिङ्गितो विश्वरूपो
देवी बुद्धामराणां विषयविषयिणां राहुचन्द्रार्कवन्द्यः १४५
या भर्तुः सूक्ष्मरूपा वरगुणविषया ह्यन्तरा[1] बाह्यमुद्रा
डाकिन्यस्तास्त्रिधातौ परमभयकराः क्रोधचित्तप्रसूताः ।
भर्तुर्यानीन्द्रियाणि त्रिविधभवगतं कायवाक्चित्तवज्रं
तान्येते वज्रडाकाः स्वस्वविषयगुणालिङ्गिता मङ्गलाद्याः

।।१४६।।

रूपो शब्दो रसो गन्धमपरमपि तत् स्पर्शधर्मो रसश्च
सत्त्वं चित्तं क्रमेण प्रकटमपि तथालिङ्गितं राहुणा च ।
तेषां यन्मन्दचारा द्विविधगतिरियं शीघ्रवक्त्रादिचारा
दष्टानां षट्पदेऽष्टौ खलु विषयगुणाः संस्थिताश्चक्ररूपाः

।।१४७।।

आदिश्वासोऽष्टभेदो विषयगुणगतश्चावृतो डाकिनीभिर्
धूमाद्याभिः समन्ताद्विविधगतिवशाद् भ्राम्यते षड्गतिस्थः ।
तन्मध्ये कालचक्रः स्फुरदमृतकलालिङ्गित स्तब्धकायो[2]
यः श्वासं छेदयित्वा विशति जिनतनुं कालचक्रः स एव

।।१४८।।

[1] ने. °भ्यन्तरा [2] ने. °या [3] ने. °गुण° [4] ने. °ये
[11] ने. वैवं

भोक्तार एते
न्यतेऽहं च मुक्तिः।
र्ययेद् भूतवृन्दं
च शान्तिं करोति
॥१४२॥
सापि याति त्रिसंख्यं
तेऽपि भूयस्त्रिगुण्याः।
श्चारभेदैर्हतास्ते
श्वाससंख्या द्विगुण्याः
॥१४३॥
ता कालनाडी
ो समन्तात्।
र्यप्रचारा
काशुक्तिहस्ता १४४
कायवाक्चित्तभेदै
धूमादिदेव्यः।
गो विश्वरूपो
चन्द्रार्कवन्द्यः १४५
तरा[1] बाह्यमुद्रा
ोधचित्तप्रसूताः।
वाक्चित्तवज्रं
ङ्गिता मङ्गलाद्याः
॥१४६॥
र्शधर्मो रसश्च
ङ्गतं राहुणा च।
घ्रवक्त्रादिचारा
संस्थिताश्चक्ररूपाः
॥१४७॥
वृतो डाकिनीभिर्
भ्राम्यते षड्गतिस्थः।
ङ्गत स्तब्धकायो[2]
कालचक्रः स एव
॥१४८॥

श्वासच्छेदावसाने त्रिविधगतिरियं षट्प्रकारा न चास्ति
बिन्दो रोधे समन्तात् परमविभुसुखं वर्ततेऽनन्तकालम्।
त्यक्त्वेमां मारसौख्यं परमगुरु[3]सुखं योगिना भावनीयं[4]
चर्या[5] शृङ्गाररूपां परमभयकरां योगिनीनामतुष्टिम्[6]
॥१४९॥

भर्तुः श्वासे समस्तं ग्रहगणचरणं नीयते कालयोगात्
श्वासे खं खं खखाक्ष्यग्निजलनिधिगते चोदिते सर्वशून्ये।
एतैर्वर्षैश्च बाह्ये परमविभुपदे सृष्टिसंहाररूपे
ज्ञातव्यं स्वस्व[7]मानैर्जिन[7]पतिचरणं श्वासमध्ये गतिस्थम्
॥१५०॥

शून्ये मन्दप्रवेशः स्वदिनगतिवशाज्जायते वै युगान्ते
शून्याकाशाम्बराब्ध्यब्धिशशधरदिनै रेवतीभोगशेषैः।
खं खं खं खाब्धिनेत्रैः स्वगतिगतदिनैस्तत्र राहुप्रवेशः
खं खं खं खर्तुकालैः स्वगतिगत[8]दिनैर्देवमन्त्रिप्रवेशः १५१

खं खं शून्याम्बराष्टाहिनयनदिवसैर्मङ्गलस्य प्रवेशः
सूर्यादीनां प्रवेशः खखखखनयनाक्ष्यब्धिसंख्यैर्दिनैश्च।
खं खं खं खाब्धिनागैः खशरगतदिनैस्तत्र चन्द्रप्रवेशस्
तस्मिन् काले विनाशः प्रभवति जगतः स्वस्वमानेन राजन्
॥१५२॥

नाडीसंचार एष प्रभवति च ततश्चन्द्रसूर्योदिते च
एकद्वित्र्यब्धिबाणा रसगिरिवसवो वर्धिता गुह्यनाडी।
रन्ध्राख्या वारनाड्यो भवति च दशमी सूक्ष्मनाड्यर्ध[9]मार्गे
भूयः सा वर्गभिन्ना सगुणसविषयाश्चक्रनाड्यो भवन्ति
॥१५३॥

उष्णीषे हृत्प्रदेशे शिरसि शशिपदे कण्ठदेशेऽर्कचारे
नाभौ वै चक्रनाड्यो युगभुजगनृपाश्चन्द्रवारैरभिन्नाः।
द्वात्रिंशत्तद्द्विगुण्याः सकलरविपदैर्मिश्रितैरप्यभिन्ना
एकाशीतिः शयं यत्करचरणगताः सन्धिनाड्यो द्विभेदाः
॥१५४॥

उष्णीषे हृत्प्रदेशे शशिरविचरणे कण्ठचक्रेऽवशेषा
एकाशीत्यन्तिमाया प्रकटदशविधास्ते ग्रहाः सौम्यरौद्राः।
तेषामाद्यन्तभागं विभुचरणगतं भुज्यते कालनाड्यां
वारान्तं चापि भुंक्ते त्रिभुवनजननी डाकिनी वज्रदेहा
॥१५५॥

आदौ या शून्यरूपा विषयगुणगता तत्स्वभावा बभूव
धातुस्कन्धा प्रविष्टा पुनरपि च समा चक्षुरादीन्द्रियेषु।
जाग्रत्स्वप्नादिविष्टा परमसुखसमानाहते संप्रविष्टा
सा विद्या बुद्धमाता कुलिशपदगता योगिनान्वेषणीया १५६

भर्तुः कायप्रभावाद्भवति वरतनौ योगिनां दिव्यचक्षुः
श्रोत्रं तद्वाक्प्रभावात् परहृदयगतं ज्ञायते तस्य चित्तात्।
प्रज्ञाकायप्रभावात् त्रिविधभवगता पूर्वजानुस्मृतिः स्यात्
प्रज्ञाया वाक्प्रभावात् प्रभवति खसमा सर्वदा सर्वगर्द्धिः १५७

प्रज्ञाज्ञानस्वभावाद्भवति समसुखं सर्वदाऽनाहतं यद्
अक्षादृश्यं त्रिविधमपि भवं [दृश्यते] दिव्यचक्षुप्रभावात्।
दिव्यश्रोत्रप्रभावात् हृदयसुखरवः श्रूयते प्राणिनोक्त
एवं स्पर्शादि सर्वं भवति नरपते कायवाक्चित्तयोगात् १५८

या नाड्योऽपानमध्ये त्रिविधपथगता मूत्रविट्शुक्रवाहाः
प्राणात् तासां प्रचारो भवति नवविधश्चान्तिमो बुद्धवक्त्रम्।
श्रोत्रे घ्राणे च नेत्रे द्विविध इति भवेल्लम्बिकायां सजिह्वि-
बिन्दावुष्णीषरन्ध्रे भवति च दशमे मुद्रितो ज्ञानिनां यः
॥१५९॥

प्राणापाने निरुद्धे क्षुभितशशधरः सूर्यबिम्बं प्रयाति
अब्जे वज्रप्रबुद्धे द्रवति पुनरसौ सूर्यबिम्बार्चिषा वै।
विज्ञानं ज्ञानमेकी भवति च मरुता चन्द्रसूर्ये निरुद्धे[10]
एवं चैवं[11] तथैवं त्रिविधमपि भवेन्नापरं किञ्चिदस्ति १६०

ग्रस्ते चन्द्रार्कबिम्बे नभसि न च दिवा नैव रात्रिः कदाचित्
सा सन्ध्या देहमध्येऽप्यमृतपदगता योगिनां सर्वकालम्।
पक्षक्षीणो यथेन्दुर्व्रजति समरसं सूर्यबिम्बेऽम्बरस्थः
प्राणापानक्षये वै स्फुटमपि च तनौ सिद्धिकाले स रोधः
॥१६१॥

नष्टे चन्द्रार्कबिम्बेऽप्युभयपथि सदा प्राणवाते निरुद्धे
अब्जे वज्रप्रबुद्धे द्रुतशशिनि महासूर्यबिम्बे प्रविष्टे।
भावाभावैकभूते त्रिविधभवगतेऽनाहते संप्रबुद्धे
तस्मिन् काले स योगी व्रजति परपदं न द्वयं कस्य किञ्चित्
॥१६२॥

क्रोधा बुद्धाः सदेव्यः खलु रसकुलिशा भूमिगर्भादयश्च

[3] ने. °गुण° [4] ने. °ये [5] ने. चर्या [6] ने. योगिनां मंत्रतुष्टिं [7-7] ने. °माने जिन° [8] ने. °गति° [9] ने. °र्क° [10] ने. वि°

प्रत्यक्षाः खे भवन्ति प्रमुदितहृदया योगिनः सिद्धिकाले ।
प्रत्यूषे चार्धरात्रे भवति शशिदिने चेष्टसिद्धिश्च तस्य
रत्नैर्वा पुष्पवृष्टिर्भवति भुवितले कालयोगात् प्रहृष्टा १६३
स्वच्छः कायोऽणुनष्टः प्रभवति खसमो लक्षणाद्यैः प्रपूर्णः[1]
स्वच्छत्रैलोक्यमेवावरणविरहितं स्वप्नवद्भाति विश्वम् ।
भाषा छिन्ना समन्तात् परहृदयगतानेकभाषान्तरेण
चित्तं सत्सौख्यपूर्णं न चलति सहजालिङ्गितं सर्वकालम्
॥१६४॥

भूमेराकृष्य चाश्वं[2] जलशिखिपवनं प्रेषयेत् तोयधातौ
तोयाद्भूवह्निवायुं शिखिनि च शशिनो भूमितोया-
निलाणुम् ।
वायौ चाकृष्य वायोः क्षितिजलशिखिनं कर्मवातश्च शून्ये
अन्ये क्षेत्रं गतान्ये त्रिविधभववशात् कर्मवाताहता ये १६५
बुद्धक्षेत्रं समस्तं त्रिभुवनजनकोऽकर्मकं वीक्षयित्वा
शुद्धाणौ सर्वबुद्धा उभयसमरसे वेष्टिते वज्रपुत्राः ।
प्रत्येकैकं रसाणावुभयकुलवशाद्वेष्टिते बोधिसत्त्वा
भूम्याद्याश्चासुरान्ताः सकलगुणगताश्चाचलाद्यां प्रविष्टाः
॥१६६॥

तैः सार्धं वज्रसत्त्वो विहरति गगने चतु[3]कालं हि यावद्
धत्ते संधारणोग्रं क्षितिजलहुतभुग्वायुशून्यस्वभावम् ।
मन्थानो मन्थयन्ति पृथगणुसकलं यावदेकत्वमेति
तेषामन्योन्ययोगः पुनरपि च भवेन्मुख्यभावाऽल्पभावः[4] १६७
बुद्धक्षेत्रं समस्तं विरचयति महासर्वसंस्थानवायुः
प्रत्येके[5] लोकधातौ पुनरपि च महाचक्रवालं समन्तात् ।
तन्मध्ये लोकधातुः प्रभवति च महाकर्मभूमिस्वभावः
शेषा भोगस्वभावा विषयसुखकराः सर्वरत्नप्रपूर्णाः १६८
पूर्वे शुद्धेन्द्रनीलः सकलगिरिपतिर्दक्षिणे पद्मरागः
पृष्ठे कर्केतपीतः शशधरधवलश्चोत्तरे चन्द्रकान्तः ।
मध्ये श्यामस्तदन्तर्निहितमिह महामण्डलं तस्य गर्भे
आदौ चित्तस्वभावं द्विगुणमपि ततो मध्यतो वाक्यभावम्
॥१६९॥

तस्मादन्यद् द्विगुण्यं शरदशगुणितं योजनानां सहस्रं
तद्बाह्ये चक्ररूपं त्वृतुभिरपि ततो लोकधातुस्वभावम् ।
षट्चक्रैः षट्कुलैश्चानिलवलयगतं मण्डलं वेदलक्षैर्
द्व्यष्टस्तम्भैश्च कूटं नृपतिशशिकलाभिर्वृतं योनिरूपम्
॥१७०॥

उष्णीषादूर्णमध्यं भवति जिनपतेः सार्धसूर्याङ्गुलं तु
तस्मात् कण्ठाब्जमेवं हृदयमपि ततो नाभिगुह्याब्जमेवम् ।
पादाधो जानुरूरुस्फिकमपि मनुभिस्तत्त्वतत्त्वैश्च वेदैर्
अर्धोरः सार्धसूर्यैः स्वभुजभुजकराः खाक्षिराजार्कमाद्भिः
॥१७१॥

विंशत्येकाधिकं यच्छतमृतुनवतिर्लोकमानं नराणां
वेदैः सार्धैश्चतुर्भिर्जलधिजलधिभिः सार्धवेदैश्च वेदैः ।
उष्णीषं मस्तकाधो भवति जिनपतेः श्रीललाटं च नासा
तिब्वन्तं नासिकाधो गलकमपि ततः कण्ठमालाब्जमध्यात्
॥१७२॥

तस्मादधूतनाभिगुह्यं भवति नरपते सार्धसूर्यैः क्रमेण
गुह्याब्जं नाभिमूले कुलिशमपि मुनेरूर्ध्व उष्णीष एव ।
ऊर्णा[6] गुह्याब्जमध्येऽक्षरसुखजननो शुक्रबिन्दोः स्थितिर्या
एषा श्रीवज्रभूमिह्युभयकुलवशात् कायवाक्चित्तचक्रे १७३
सार्धार्कं पञ्चविंशद्द्विगुणमपि ततश्चित्तवाक्कायचक्रं[7]
चित्तार्धं षट्सपादं हृदिगतसहजं चाङ्गुलं ज्ञानचक्रम् ।
त्रिभ्यो द्वाराणि कुर्यान्मणिमयरचनां मण्डलेभ्योऽष्टमांशाद्
गत्यागत्याप्यधोर्ध्वं द्विगुणमपि भवेत् कायवाक्चित्तरागम्
॥१७४॥

मेरुस्तेऽप्यङ्गुलार्धं भवति जिनपतेर्योजनानां सहस्रम्
एवं कायप्रमाणो भवति सुरगिरिर्विस्तरेणार्धमात्रः ।
तस्यार्धं तस्य चार्धं भवति हि कुलिशाकारकूटं त्रिभागं
एवं चाधो धरापो हविरविपवनः सार्चिषा वज्रमाला १७५
हृच्चक्रं[8] सार्धसूर्यैर्भवति जिनपतेर्नाभिकण्ठाब्जमध्ये
वाक्चक्रं कायचक्रं कुलिशमणिगतादूर्णमूर्णान्तसीम्नः ।
निर्यूहा श्रीकपोलं भवति नृपललाटोर्ध्व उष्णीषसीम्नः
सार्धार्किर्भूमितोयानलचलवलयं सार्चिषा वज्रमाला १७६
ऊर्ध्वाधो बुद्धकायो भवति सममिदं कायवाक्चित्तचक्रं
तिर्यङमानैः समन्तात् पवनगतिवशाद्वा त्रिभिः षड्भिरेवम् ।
चक्रं चाष्टारचक्रैर्भवति जिनपतेरङ्गुलैः षट्सपादैर्
अष्टद्वारैश्च वृतं स्वकरतलमुखैः कल्पयेत् श्रीश्मशानम्
॥१७७॥

ऊर्ध्वाधो वक्त्रगुह्य
षट्सार्धं गर्भमध्यात
द्वाराद्यं सर्वचक्रात्
न प्रज्ञा नाप्युपायः
बाह्ये मेरो धरो वै
पूर्वे खड्गो रसेन्द्रोऽ
मध्ये श्रीपादुका च
मध्ये यज्ञोपवीतं त्रि
मण्युष्णीषे ललाटे
एकद्व्यब्धीष्वहीन्द्रैः
मध्योर्ध्वाधस्त्रिभाग
घण्टाप्येवं त्रिभाग

विस्तारस्तत्त्रिभागं
शूकं विस्तारतुल्यं
बाह्ये शूकं त्रिभागो
घण्टावक्त्राणि तद्व
गुह्याब्जोर्णान्तभागैः
पाठायामस्तदर्धैः क्षि
सार्धान्तो निर्गमोऽब्ज
पद्मं तद्भागहीनं तल
वक्त्रं पीठार्धभागैः
गुह्याब्जात् सार्धसूर्यै
पीठादब्जादिसीम्नो
तस्माद्वक्त्रान्तमेवं ज
पीठाद्वेदैश्च पद्मं हृ
सार्धाष्टैर्वक्त्रमानं भ
ऊर्णा सीम्नो ललाटे
एवं वै लोकधातुः स
पृथ्वी स्याद्धेमधातुज
वायुश्चायश्च शून्यं
पृथ्वी स्यात् पीतरत्न
कृष्णं वायुश्च नीलं

[1] ने. °र्णाः [2] ने. चारांव [3] ने. वर्त्तं° [4] ने. °स्वभावः [5] ने. प्रत्येकं [6] ने. ऊर्णा [7] ने. °वज्रं [8] ने. हृच्चन्द्रं [9] ने. °गुडिकाव

ऊर्ध्वाधो वक्त्रगुह्याद्भवति भगवती मण्डलं द्व्यब्धिमानैः
षट्सार्धं गर्भमध्यात् त्रिभिरपि च ततः सावली चक्रषट्कम् ।
द्वाराद्यं सर्वचक्रात् प्रभवति नियतं पञ्चमांशैः कपोलैर्
न प्रज्ञा नाप्युपायः सहजतनुरियं स्तूपरूपं समन्तात् १७८

बाह्ये मेरौ धरो वै क्षितितलनिलये संस्थिताः सिद्धयोऽष्टौ
पूर्वे खड्गो रसेन्द्रोऽमृतफलगुलिकाश्चा[8]ञ्जनं रोचनं स्यात् ।
मध्ये श्रीपादुका चाक्षयसकलनिधिर्मण्डलस्याग्निकोणे
मध्ये यज्ञोपवीतं त्रिदशनरगुरोर्ब्रह्मघोषस्तदेव ।।१७९।।

मण्युष्णीषे ललाटे गलहृदयगते नाभिगुह्ये च वज्रम्
एकद्व्यब्धीष्वहीन्द्रैः स नवदिनकरैरङ्गुलैश्च क्रमेण ।
मध्योर्ध्वाधस्त्रिभागं स्वकुलिशविकरालं च शान्तौ च रौद्रे
घण्टाप्येवं त्रिभागोपरिकुलिशसमा गोमुखा पद्मरूपा[10]
।।१८०।।

विस्तारस्तत्त्रिभागं समुखवरटकं तत्त्रिभागाद्दलं च
शूकं विस्तारतुल्यं दिशि विदिशि चतुर्भागिकं शूकवृत्तम् ।
बाह्ये शूकं त्रिभागोऽथ उपरि बदरीकण्टकाकारयोगो
घण्टावक्त्राणि तद्वद्दलमपि कुलिशं गोमुखाद्यं तथैव १८१

गुह्याब्जोर्णान्तभागैः परमजिनपतेरूर्ध्वतश्चैत्यमानं
पाठायामस्तदर्धैः क्षितिरिव सुषमं तत्त्रिभागैर्दिशाङ्गाः ।
सार्धान्तो निर्गमोऽब्जं हृदि गतवलयं पीठमानेन वृत्तं
पद्मं तद्भागहीनं तलसमसुरसः तद्दिशांशैश्च कण्ठम् १८२

वक्त्रं पीठार्धभागैः क्षितिरिव सुषमं तत्त्रिभागाद्दिशांशा
गुह्याब्जात् सार्धसूर्यैः सुषममपि भवेदूर्ध्वतः पीठमानम् ।
पीठादब्जादिसीम्नो हृदि गतवलयान्तं ततः कण्ठमूलं
तस्माद्वक्त्रान्तमेवं जलधिरपि युगैः सार्धवेदैस्त्रिखण्डम् १८३

पीठाद्वेदैश्च पद्मं हृदि गतवलयं कण्ठमालं च तद्वत्
सार्धाष्टैर्वक्त्रमानं भवति तदुपरि छत्रमाला नरेन्द्र ।
ऊर्णा सीम्नो ललाटे शिरसि तत इहोष्णीषपर्यन्तमेषाम्
एवं वै लोकधातुः सकलजिनतनुश्चक्रचैत्यस्वरूपः ।।१८४।।

पृथ्वी स्याद्धेमधातुर्जलमपि रजतं[11] वह्निधातुश्च ताम्रं
वायुश्चायश्च शून्यं त्रपु भुजगमिदं मिश्रधातुस्वभावम् ।
पृथ्वी स्यात् पीतरत्नं सितमपि जलजं रक्तरत्नं च वह्निः
कृष्णं वायुश्च नीलं हरितमपि तथा मिश्रधातूद्भवं तत्
।।१८५।।

... हृच्चन्द्रं [8] ने. °गुडिकावा° [10] के. °रूपा: [11] ने. च जलं



भूमिः क्षाराम्बुमिष्टं प्रभवति कटुकोऽग्निश्च तिक्तोऽनिलश्च
मिश्रश्चाम्लः कषायो रस इति च[1] पुनः क्षेत्रपाषाणयोनिः ।
ओषध्यः षट्प्रकारा रसपरमरसा धातवोऽन्ये मणीन्द्रा
नानास्पर्शाश्च भूम्यां सकलरुजहराण्येव तोयानि सम्यक्
।।१८६।।

पृथ्वी शूलापहारी विषमपि च हरेत् तोयधातुश्च वह्निर्
भूतं स्तोभं च वायुः गगनमपि हरेद् दुष्टदृष्टिप्रपातम् ।
ज्ञानं सर्वापहारि मणिरपि च तथा संस्थितोऽङ्गे नृपाणां
सर्वेऽचिन्त्यप्रभावाः सलिलरसमणिस्पर्शमन्त्रौषधीनाम् १८७

बुद्धक्षेत्रं समन्तात् प्रविशति भगवान् ज्ञानचक्रस्वरूपी
भूयः सत्त्वप्रवृत्तिर्भवति फलवशात् सर्वसामग्रियोगात् ।
मासार्धैर्द्वादशाङ्कैः स्वदिनगतिवशान्मेरुनिष्पत्तिरत्र
स्तूपाकारोर्ध्वकूटं नृप कुलिशमयं मण्डलं तस्य गर्भे १८८

बाह्ये ज्योतिष्कचक्राण्यवनितलगताः कर्मभूम्यां मनुष्याः
षड्द्वीपा भोगभूम्याममृतफलरसा हारिणोऽन्य[2]स्वराद्याः ।
अष्टौ शृङ्गानुरूढाः[3] सुरपतिरनलः कालदैत्याब्धिवाता
यक्षो रुद्रोऽथ ऊर्ध्वे परिजनसहितो विष्णुरेवाब्धिवक्त्रः[4]
।।१८९।।

विज्ञानं शून्यधातुर्मकर इह घटश्चैव सक्षारवायुर्
मीनो मेषो वृषश्च प्रभवति मिथुनो वेदनाग्निश्च संज्ञा ।
तोयं रूपं क्षितिश्चाक्षरमपि सहजा राशयः कर्कटाद्या
एषां वज्रादिचिह्नानि कचटपतयशा[5] दीर्घह्रस्वाधिदेवाः
।।१९०।।

मेषे युग्मे कुलीरे शशिसितरवयः सिंहकन्यातुलासु
भौमो मन्त्री च राहुर्बुधशशिफणिनो वृश्चिकाद्ये तु चापे ।
एवं भूम्यादिधातोर्भवति नरपते सर्व अन्योन्ययोगः
सत्त्वानां कर्मरूपं भवति जगदिदं सर्वरत्नप्रपूर्णम् ।।१९१।।

ये भूम्यां कल्पवृक्षा रसपरमरसाश्चाणुभिर्वै बभूवुर्
औषध्योऽन्ये रसेन्द्राः सकलरुजहरास्तान् न पश्यन्ति सत्त्वाः ।
पश्यन्ति प्राकृतं यत् तृणतरुसलिलं पांशुपाषाणलोहं
प्रेतास्तोयं महाग्निं नरकगतनराश्छेदभेदं समन्तात् ।।१९२।।

एतेषां मुक्तिहेतोः समुत[6]जिनपतिः कर्मभूम्यां प्रविश्य
गर्भाधानं हि कृत्वा परमकरुणया बोधिमुत्पादयित्वा ।

[1] ने. हि [2] ने. °न्ये [3] ने. °ढः [4] ने. °चक्रः
[11] ने. यवक्षार° [12] ने. °कान्ते [13-13] ने. वधको भक्षितश्च

च तिक्तोऽनिलश्च
त्रिपाषाणयोनिः।
ऽन्ये मणीन्द्रा
तोयानि सम्यक्
॥१८६॥
धातुश्च वह्निर्
दृष्टिप्रपातम्।
तोऽङ्गे नृपाणां
त्रौषधीनाम् १८७
चक्रस्वरूपी
मग्नियोगात्।
ष्पत्तिरत्र
तस्य गर्भे १८८
भूम्यां मनुष्याः
ऽन्य[२]स्वराद्याः।
दैत्याब्धिवाता
गुरेवाब्धिवक्त्रः[४]
॥१८९॥
रवायुर्
ग्निश्च संज्ञा।
यः कर्कटाद्या
र्घह्लस्वाधिदैवाः
॥१९०॥
धातुलासु
वकाद्यं तु चापे।
योन्ययोगः
प्रपूर्णम्॥१९१॥
र्वे बभूवुर्
पश्यन्ति सत्त्वाः।
पाषाणलोहं
समन्तात्॥१९२॥
भूम्यां प्रविश्य
त्पादयित्वा।

मारक्लेशं निहत्य क्षितितलनिलये धर्मचक्रं प्रवर्त्य
कृत्वा निर्माणमायां पुनरपि भगवान् शुद्धकायः स एव
॥१९३॥

तस्माज्जातो न नष्टस्त्रिभवमपि गतः शुद्धकायो जिनस्य
सत्त्वार्थं सर्वदा न त्यजति जिनपतिः कर्मणा बाध्यते न।
एवं लोकेश्वरोऽहं त्रिभुवननिलये कर्मभूम्यां स्थितोऽर्क
सत्त्वानां मार्गदाता नरकभयहरो नान्यदेव कदाचित् १९४

येषां धर्माभिघातं स्वतनुपरतनोश्चानुबन्धः स्वनार्या[७]
पुत्रात् स्वर्गोऽग्निहोत्रान्मरणमुपगते बान्धवे पिण्डपातात्।
यज्ञे हिंसा पशूनां रणमरणगते स्वर्गलोके प्रवेशस्
तीर्थे कायप्रपातात् परपदगमनं[८] सौख्यदास्तेन धर्माः १९५

का माता कः पिता ते वद सुतदुहिताभ्रातृभार्याभगिन्यः
कः स्वामी मित्रवर्गो मरणभयहर[९]स्तत्त्वमार्गं विहाय।
तेनार्क त्वं मुनीनां कुरु मम वचनादेकवर्णप्रवृत्तिं
येनामी यान्ति मोक्षं त्वृषय इति मयाधिष्ठिताश्चक्रमध्ये
॥१९६॥

दुःखं दण्डप्रहाराद्यदि भवति तनौ तत्र दण्डोऽपराधी
नायं दण्डः करेण प्रहित इह करस्यापराधः समस्तः।
नायं चित्तेन चित्तं प्रहितमिह महादुष्टकोपानलेन
तस्मात् कोपानलोऽयं रिपुरिव जगतो मारितो बोधिसत्त्वैः
॥१९७॥

रागाद् द्वेषादिदोषः प्रवर सुरनृणां स्वेष्टभार्यान्यसङ्गात्
सा तस्योन्मूलनार्थं सकलजिनसुतैः कामदाने प्रदत्ता।
तस्माद्दानानुरागः समसुखफलदः पुण्यसंभार एष
जातस्त्रैलोक्यबन्धुर्नरकभयहरः सर्वकालं जनानाम् ॥१९८॥

सत्त्वा रागेण येन प्रलयमुपगतास्तायिनस्तेन मुक्ताः
सत्त्वा यद्रक्षयन्ति प्रतिदिनसमये तायिनस्तद्ददन्ति।
सत्त्वा यन्मोचयन्ति स्वहृदि गतसुखं तज्जिना रक्षयन्ति
तेनेदं दुःकरं स्याज्जिनवरचरितं[१०] देवनागासुराणाम् १९९

पृथ्वीतोयाग्निवाता गगनगुणमनोबुद्ध्यहंकारजीवा
रूपाद्याश्चक्षुराद्या विषयविषयिणः पञ्चकर्मेन्द्रियाणि।
एषां को वर्णज्येष्ठः स पशुनरतनोर्व्यापकानां कनिष्ठो
येन त्वं वर्णज्येष्ठः सनृपनरगुरुर्जातिगर्वाभिमानी ॥२००॥

ताप्यं भूतिश्च तोयं प्रभवति विमलो तुत्थकं वह्निरेव
वायुर्व्योमिश्रधातुः स चपलशशकं हिङ्गुलं षष्ठमं च।
काक्षीकासीसगन्धं समगगनचलं वह्नितोयं शिलालं
गौरी पृथ्वीगतं यल्लवणमुदधिजं सैन्धवं कृष्णचौल्लम् २०१

एतानि क्ष्मादियोनौ पुनरपि नरसारं सर्वक्षारसज्जं[११]
सौभाग्यं काचजातं खचलशिखिजलक्ष्मास्वरूपाणि तानि।
पृथ्वी शैलोदकं स्यात् शशिजलमुदका वह्नितोयं च वह्निर्
वायुः शून्यस्वरूपा विषममपि परा कर्तरी त्रिस्वभावा २०२

भूधातुः पीतस्वस्थं जलशिखिमरुतः शक्तुकं शृङ्गिकृष्णं
शून्याख्यं कालकूटं ह्युपविषपरमं पञ्चधा वेदितव्यम्।
पाषाणा जीवरूपा विविधफलसमा मुण्डसंख्यादिरूपास्
तेषां लोहानि षड्वा घनजमपि तथा देवकान्तं[१२] चतुर्धा
॥२०३॥

सिद्धोऽसिद्धो रसश्च द्विविध इह भवेद्वेधकोऽवेधकश्च
सिद्धो लोकस्य वेधी पुनरपि [१३]स तनोर्वेधको भक्षितश्च[१३]।
यो वेधी सूतकः स प्रभवति सरसो जारितः सारितश्च
लोहे वेधानुवेधी सकलरुजहरः पूतिलोहं[१४] विहाय २०४

पूर्वं धूमस्वभावैर्व्रजति शिखिगतो जारितः स क्रमेण
शब्देनैवोत्प्लुतेन प्रभवति स पुनः कम्पितः कस्य एव।
वेधी शब्दी प्लुती न प्रभवति स पुनः पुत्रवेधी स कम्पो
निष्कम्पः कुन्तवेधी त्रिविध इह पुनः सारितः सारणाभिः
॥२०५॥

दिव्यौषध्या बलेन प्रभवति बलवान् जारितः सर्वलोहान्
कोऽसौ तासामभावे क्षितितलनिलये यः करोत्यस्य बन्धम्।
बद्धे स्यात् खेचरत्वं मरणमपि तथा भक्षिते नाशमेति
ज्ञानाभावे रसेन्द्रः क्षितिपतिभिरयं साधनीयः प्रयत्नात्
॥२०६॥

द्रव्यं तेषामनेकं व्ययनमपि[१५] भवेद्गीतवाद्याभियोगैस्
तन्नष्टं यन्न दग्धं नृप रसविषये धर्मकार्ये न दत्तम्।
यो द्रव्यं पापहेतोर्व्ययमपि कुरुते तेन तत् पारबन्धस्
तस्मात् सत्त्वार्थहेतोर्व्ययमपि सकलं बोधिसत्त्वः करोति
॥२०७॥

या लेपात् ताम्रपत्रस्य हरति सहसा कालिमामौषधीं तां

---

: [४] ने. °चक्रः [५] ने. कचटतप° [६] ने. समत° [७] ने. °भार्या [८] ने. परमपदगतं [९] ने. °कर° [१०] ने. °रचितं
[१३]-[१३] ने. वधको भक्षितश्च तथान्य [१४] ने. पूजितोहं [१५] के. °मपि च

धन्याः पश्यन्ति भूम्यां सकलरुजहरां जारणीं मोहजातेः ।
अन्याभिर्योऽस्य बन्धः प्रभवति नियतो वर्षकालान्तरैः सः
स्वेदैः सन्यासयोगैरधिक न स भवेदेकसाहस्रभेदात् ।।२०८।।
सर्वासामौषधीनामतिकटुकरसैः क्षारवर्गाम्लदर्गैः
संधानं काञ्जिकेन प्रभवति हि सदा मर्दनस्वेदनार्थम् ।
श्वेतानां तारकार्ये पुनरपि कुसुमैर्वापितैर्बीजशुद्धिर्
द्वन्द्वं सौभाग्य चाखुहयखुरविषैर्वै स्नेहसेको मृदुत्वे ।।२०९।।
रम्भाचित्रादिभस्माश्वगजनरजलैः सप्तधा गालितैश्च
सर्वक्षारान्पटूंश्चापि पुनरपि रसान् शोधितान् भावयेत्
तान् ।
भूयो भूयोऽग्नितापैः पुनरपि शतधा भावयेच्छोषयेच्च
एवं शङ्खस्य चूर्णं शतपुटितमिदं गन्धकं भावितं च २१०
लोहानां द्रावणार्थं भवति विडमिदं सूतकस्याष्टमांशं
दोलास्वेदोऽष्टरात्रं रसहृदयगतं द्रावयेद्यावदेव ।
क्वाथात् तीव्रे मलश्च प्रभवति बलवान् मर्दितो जारितोऽसौ
एके लोहे द्रुते स्याद्रविशशिवपुषा रञ्जयेत् सर्वलोहान् २११
स व्याधी सारितश्चक्रमतिसमहतैर्नागवङ्गैः ससिक्तैर्
एवं यः सूतकस्य प्रतिदिनकुरुते कर्मभिर्वक्ष्यमाणैः ।
बन्धं कालान्तरेण स्फुटगुरुधनतां सर्वदोषप्रमुक्तं
तस्य व्याधिं स मृत्युं हरति वरतनौ सर्वदारिद्रचदुःखम्
।।२१२।।

हस्तार्धे हेमपद्मे वसुदलसहिते कर्णिकागर्भमध्ये
वज्रं शुद्धेन्द्रनीलं सुरयमधनदे पद्मरागेन्द्रकान्तः ।
पृष्ठे कर्केतरत्नं शिखिदनुकहरे स्वायसं ताम्रतारं
हेमं वायव्यपत्रे कनकपटलजा कर्णिकायां च पिष्टी २१३
तस्या मूर्ध्नि द्विहस्तं सनकुलवरदं जम्भलं हेमजं च
गर्भे पत्रेऽष्टदेव्योऽम्बुजवरदकरा हेमजास्तारजा वा ।
मौलौ रत्नेशबुद्धो मणिवरदकरो यक्षिणीनां तथैव
हंहाद्या ह्रस्वदीर्घा दिशि विदिशि दलेष्वष्टवर्णाः क्रमेण
।।२१४।।

गन्धैः पुष्पैस्त्रिसन्ध्यं प्रतिदिनसमये पूजयित्वेन्दुकुण्डे
ॐस्वाहाद्यन्तमध्ये जमितिभलजलेन्द्राय तोयं प्रदद्यात् ।
मन्त्रेणानेन राजन् प्रमुदितमनसा वादिना रक्षणार्थम्
एवं रक्षाभिधानान्न हि हरति रसं भूतनाथो हि नाथः
।।२१५।।

इष्टा क्षाराम्लवर्गैर्दशदिवसरसं मर्दयेत् स्वेदयेच्च
कल्कस्थं पातयित्वा पुनरपि च ततः क्षेपयेत् सर्वकालम् ।
भूयस्तत्पात्यकल्के यदि मृयति रसो जारयेत् सोऽपि तत्र
सूतो भुक्तस्वयोनिं स च पुनरपरां सर्वयोनिं प्रभुक्ते
।।२१६।।

नागं तीक्ष्णारताम्रं पटलजमपरं क्षेत्रजं वारिशुद्धं
तुल्यं ह्येकत्र ध्मान्तं सितघनजसमं तारकार्ये च वङ्गम् ।
षष्ठचं संग्रासमादौ द्रुतमपि च ततो वर्धयेदेकवृद्धया
पादांशं यावदेव प्रभवति नियतश्चाधिकं न प्रदेयम् २१७
पक्षैकेन द्विगुण्यं जरति पुनरसौ बीजमेवं विशुद्धं
एवं द्वित्र्यष्टगुण्यं जरति पुनरसौ जारितः सिद्धिजैश्च ।
चक्रस्वेदेऽप्यजीर्णे प्रभवति हि रसस्याष्टरात्रं हि यावत्
स्पर्शैर्दिव्यौषधीभिर्जरति शिखिगतो निर्मुखं ह्यत्र लोहम्
।।२१८।।

अभ्राल्लोहाष्टगुण्यं बलमपि च भवेत् तद्द्रुतौ चाष्टगुण्यं
तस्माद्बीजेऽष्टगुण्यं पुनरपि च ततो वज्ररत्नेऽष्टगुण्यम् ।
एवं लोहानि रत्नान्युपरसकरसान् जारयेद्वह्निमध्ये
आवर्तं यावदेति प्रभवति स ततोऽनेकलक्षप्रवेधी[1] ।।२१९।।
स्पर्शौषध्योरभावे जरति च रहितैर्मर्दनैः स्वेदनैश्च
निष्कम्पो यावदेव प्रभवति हि ततः सारणा हेमतुल्या ।
भूयोऽन्या द्वित्रिगुण्या द्रुतकनकरसैः क्षेपितैस्तैलसूत्रे
द्रव्यान्नेऽष्टाङ्गनागं द्रुतकनकरसैः क्षेपणीयं प्रयत्नात् २२०
हेमं तीक्ष्णाहिताभ्रं फणिदरदशिलागन्धकैर्मारयित्वा
वङ्गेन्दुं तालताप्यैर्घनजमपि तथा हेमतारस्य कार्यः ।
तुल्यं क्षारा विषं वै लवणमुपरसा लोहतुल्यश्च सूतः
पित्ताम्लैर्मर्दयित्वा दशदिनमपि तत् क्षेप्यपाषाणमध्ये २२१
षण्मासं भूमिगर्भे ह्युपविषशिखिना स्वेदितः सर्वकालं
घोषाकृष्टस्य वेधी प्रभवति स रसः षोडशांशेन भूयः ।
ताम्रेन्दुं हेमतुल्यं शुभकनकमिदं वादिनां दुःखनाशं
शुद्धं ताम्रं हि विद्धं रजतमपि भवेद्दत्तारेऽष्टमांशे २२२
पाषाणा ये धरण्यां फलतनुसदृशाः खंख[2]मुण्डादिरूपास्
तद्योनिं तेषु दत्त्वा घृतमधुसहिता धामयेत् तीव्रवातैः ।
शुद्धिं कृत्वा निषेकैः पुनरपि च पुनष्टङ्कणा क्षारवर्गैर्

दत्त्वा तल्लोहयोगि
सप्त।हं कोष्ठशुद्धि
औषध्या मा[3]रितै
गोदुग्धैः शालिभव
भुक्तैः शाकाम्लहीं
ज्ञात्वा साहस्रवेधी
भोक्तव्यः सर्षपांश
प्रासादं भूमिवेश्म
षण्मासैर्दिव्यदेहं ब
कर्कोटी देवदाली
क्वाथं पानं ह्यजी
एवं चन्द्रोदकाद्ये f
दुर्गन्धा भूमिशैलेऽ
या भुक्ता तीव्रमू
कृत्वा चूर्णं तदल्पं
सत्त्वा यां भक्षयनि
तेषां या मृत्युदात्री

तुल्यं दण्डोत्पलस्य
कान्ते पत्रेऽयसा च
षण्मासं भक्षयेद्यः
मुक्तः कुष्ठादिरोगै

वोक्काणाकाशशक्त
अन्ये औषध्यामृतस
एकीकृत्वा सजीवे
पूर्वोक्ता कान्तपत्रे
षण्मासैर्द्व्येकमासैः
तप्तं टौक(?)[4]क्षप
सामान्या मध्यमा
पुंसां हीनोत्तमानां
खङ्गान्नृस्नेहद्वीप
वज्री वृक्षाण्यभाव
तस्मिन् भूताधिपस

[1] ने. °प्रवेषी [2] भोटभाषायां—शंख [3] ने. सा° [4] ने. टौक्क°(?)

दत्त्वा तल्लोहयोनि द्विगुणमपि रसो वादिना जारणीयः२२३
सप्त।हं कोष्ठशुद्धिस्त्रिफलसमरसैः क्वाथितेनोदकेन
औषध्या मा[3]रितैर्वै घृतमधुसहितैर्लोहचूर्णैः ससूतैः ।
गोदुग्धैः शालिभक्तैर्भवति न च चिरैः पक्षमध्ये नराणां
भुक्तैः शाकाम्लहीनैर्लवणविरहितैर्मत्स्यतैलाग्निमुक्तैः २२४
ज्ञात्वा साहस्रवेधी शतगुणितमतः कोटिवेधी च यावद्
भोक्तव्यः सर्षपांशात् प्रतिदिनसमये चान्तिमो राजिकांशः।
प्रासादं भूमिवेश्म प्रभवति रहितं शीतवातातपैश्च
षण्मासैर्दिव्यदेहं बलिपलितगतं मध्यमोऽयं करोति ।।२२५।।
कर्कोटी देवदाली त्रिकटुकबृहती निम्बकैरातितिक्तं
क्वाथं पानं ह्यजीर्णे त्रिदिनमपि पुनर्लङ्घनं च प्रकुर्यात् ।
एवं चन्द्रोदकाद्ये शिखिनि विषजले शैलभल्लाततोये
दुर्गन्धा भूमिशैलेऽपि च विषपललेष्वल्पकल्पेषु मन्त्री २२६
या भुक्ता तीव्रमूर्च्छां ददति विषसमामौषधीं तां समस्तां
कृत्वा चूर्णं तदल्पं घृतमधुसहितं भक्षयेत् तद्वदेव ।
सत्त्वा यां भक्षयन्ति स्फुटनरपशवः सौषधी सिद्धिदा न
तेषां या मृत्युदात्री परमभयकरा योगिनां सामृतं स्यात्
।।२२७।।
तुल्यं दण्डोत्पलस्य स्वतनुदलरसैः शालिपर्ण्यब्जसार्योः
कान्ते पत्रेऽयसा च त्रिदिनमपि रसं गन्धकं मर्दयित्वा ।
षण्मासं भक्षयेद्यः प्रतिदिनसमये टङ्कपादप्रमाणं
मुक्तः कुष्ठादिरोगैः बलिपलितगतो द्वचष्टवर्षाकृतिः सः
।।२२८।।
वोक्काणाकाशशक्तुप्रबलमपि रसं मारयेत् क्षीतचञ्चु
अन्ये औषध्यामृतस्यारुणमपि फलजं हेमकान्तं च तुल्यं ।
एकीकृत्वा सजीवे मलविगतरसे गोलकः षट्पलैश्च
पूर्वोक्ता कान्तपत्रे बलिपलितहरः क्वाथितो मस्तकेन २२९
षण्मासैर्द्वचेकमासैः स नृप दशदिनैः सप्तरात्रत्रिरात्रैस्
तप्तं टौक(?)[4]क्षणेन प्रभवति च तनौ सिद्धिरस्य प्रभावात् ।
सामान्या मध्यमा च प्रलयविरहिता चोत्तमा ज्ञानसिद्धिः
पुंसां हीनोत्तमानां सुहृदशुभवशान्नैकजन्मानुवेधात् ।।२३०।।
खङ्गान्नृस्नेहद्वीप प्रकटयति निधिं पद्मसूत्रस्य वर्त्त्या
वज्री वृक्षाण्यभावः प्रतिदिनसमये यत्र तिर्यग्विरोधः ।
तस्मिन् भूताधिपस्य प्रतिदिनसमये मन्त्रजापं प्रकुर्याद्



यावत् खन्ये निमित्तं प्रभवति हि ततो मन्त्रिणां द्रव्यसिद्धिः
।।२३१।।
आदौ यद्योनिमन्त्रा जिनपतिकुलिशाधिष्ठिताः साधनीया
यक्षिण्यः साधयित्वा पुनरवनितले क्षेत्रपालाश्च साध्याः ।
नागिन्यः[1] साधयित्वा त्वमृतफलरसा ओषधी साधनीया
डाकिन्यः साधयित्वा परमभयकराश्चासुराः साधनीयाः
।।२३२।।
नागाद्यान् साधयित्वा प्रवर नरसुरा योगिना साधनीया
धूमाद्याः साधयित्वा मरणभयकरा मध्यमा साधनीयाः ।
प्राणाद्याः साधयित्वा द्रवितशशधरा बिन्दवः साधनीयाः
संशोध्यं साधयित्वा सहजजिनतनुः सर्वगा साधनीयाः २३३
सत्त्वानां मृत्युदं यत्तदमृतमखिलाधिष्ठिता सिद्धमन्त्रैर्
यागम्या सिद्धिरि[2]ष्टचा त्रिभुवननिलये ध्यानगम्यावशानात्
यज्ज्ञानं दुर्लभं वै सुलभमपि सुखाधिष्ठितं वज्रपद्मे
एवं एवं ह्यवज्री ददति समसुखं प्राणिनां[3] सर्वकालम् २३४
राह्वग्नी चन्द्रसूर्यौ क्षितिजलहुतभुग्वायुशून्यं चतुष्कं
मुक्तं यत् पञ्चकं वै ग्रहगण इतरः षट्कमस्माच्चतुष्कम् ।
मेरोर्द्वीपानि दिक्षु प्रभवति विषयाः[4] पञ्चकं बाह्य उक्तं
सत्त्वादीनां गुणानां त्रिकमपरमिदं देहमध्ये तथैव ।।२३५।।
विज्ञानं बिन्दुरक्तामृतमिति कललादौ चतुष्कं च पञ्च
तस्मादस्थ्यादिकं यत् सकलमपि ततश्चक्षुराद्यं हि षट्कम् ।
हस्तौ पादौ चतुष्कं करचरणगतं पञ्चकं चाङ्गुलीनां
तासां पर्वत्रिकं यत्क्रम इह सकलो वेदितव्यः कुलेऽस्मिन्
।।२३६।।
भूभृत्तद्वत् प्रभेदा रसगुणितरसा भानवो विंशतीति
भेदाः षष्टिर्नराणां सकलतनुगतान् रन्ध्रषट्चन्द्रसंख्याः ।
सर्वे ते पिण्डिताः स्युस्त्रिगुणनवचतुःपञ्चषट्प्राणचाराः
संचारो यो ग्रहाणां स च पुनरितरैर्योगिनीचार उक्तः २३७
ज्ञानाद्रागद्वयं वै पुनरपरमिदं यानरत्नत्रयं च
क्लेशा मारा विहाराः पुनरपि नियताश्चर्द्धिपादास्रवाश्च ।
वैशारद्यानि सत्यानि पुनरपि ततः स्मृत्युपस्थानसम्यक्
चत्वारः संग्रहान्ता जिनपतिकुलिशैर्योगिभिर्भावनीयाः
।।२३८।।

[1] ने. °नः  [2] ने. °वि°  [3] ने. °ना  [4] ने. °यः  [5] ने.
[12] ने. श्री  [13] ने. °बोधं  [14] ने. °वत्से  [15] ने. प्रियो

न्त्रिणां द्रव्यसिद्धिः
।।२३१।।
ता: साधनीया
ाश्च साध्याः ।
धो साधनीया
राः साधनीयाः
।।२३२।।
ा साधनीया
साधनीयाः ।
ः साधनीयाः
साधनीयाः २३३
सिद्धमन्त्रैर्
नगम्यावशानात्
वज्रपद्मे
सर्वकालम् २३४
ं चतुष्कं
स्माच्चतुष्कम् ।
कं बाह्य उक्तं
तथैव ।।२३५।।
कं च पञ्च
ाद्यं हि षट्कम् ।
ाङ्गुलीनां
ः कुलेऽस्मिन्
।।२३६।।
शतीति
चन्द्रसंख्याः ।
ट्प्राणचाराः
ार उक्तः २३७
त्र
पादास्रवाश्च ।
ानसम्यक्
र्भावनीयाः
।।२३८।।

पञ्चाभिज्ञाबलानि प्रवर जिनपतेर्दृष्टयः पञ्चचक्षुर्
एवं षडिन्द्रियाणि स्मृतय इति च षड्रत्नबोध्यङ्गपूजा ।
सप्ताप्यष्टाङ्गमार्गाः प्रतिसुशरणता रूपिणोऽष्टौ विमोक्षा
रन्ध्राख्यं वै नवाङ्गं प्रवचनमपरं भूमयो दिक्प्रमाणाः २३९
बुद्धानां दिग्बलानि स्फुटदशवशिता द्वादशाङ्गप्रतीते
रूपादौ वै निरोधो द्विगुणनव तथावेणिका बुद्धधर्माः ।
द्वात्रिंशल्लक्षणानि प्रवर जिनपतेर्व्यञ्जनानि त्वशीतिर्
एतद्देहे समस्तं विभुपरमपदं मन्त्रिणा भावनीयम् ।।२४०।।
एकश्चन्द्रस्वरूपं यमकरनयनं युग्मपक्षायने द्वे
लोकाः लोका गुणाग्निस्त्रिकमुदधियुगं वेद उक्तश्चतुष्कम् ।
बाणा भूतेन्द्रियाणि प्रभवति नियतं पञ्चकं षड्रसर्तुर्
वाराही सप्तसंख्या मुनय इति तथा चाष्टनागा वसुश्च २४१
नाडीरन्ध्रा ग्रहा वै निधिरपि नवकं दिग्दशेकादशेशाः
सूर्योऽनङ्गो मनुर्यो भुवनतिथिनृपा द्वादशा ह्येकवृद्धचा ।
दोषाश्चाष्टादशेते सकलजिनवरास्ते चतुर्विंशतिश्च
तत्त्वाङ्गं पञ्चविंशद् द्विजक इति भवेद् द्व्युत्तरं त्रिंशदेव
।।२४२।।
सर्वस्मिंस्तन्त्रराजे खलु कुलिशपदं गोपितं वज्रिणा वै
प्रत्यक्षं चादिबुद्धे निगदितमखिलं प्राणिनां मोक्षहेतोः ।
तस्मात् तन्त्रोत्तरं वै सकलमविकलं लोकलोकोत्तराभ्यां
श्रीमत्तन्त्रादिबुद्धं सकलजिनपतेश्चाभिधानं सुचन्द्र ।।२४३।।
यस्यान्तं[५] नादिमध्यं स्थितिमरणभवं शब्दगन्धो रसश्च
स्पर्शो रूपं न चित्तं प्रकृतिर्न पुरुषो बन्धमोक्षो न कर्ता ।
बीजं न व्यक्तकालं [६]न सकलभुवने[६] दुःखसौख्यस्वभावं
निर्वाणं निर्निमित्तं व्यपगतकरणं निर्गुणं तं नमस्ये ।।२४४।।
कालं[७] विश्वादिवर्णं पुरुषमनुपमं सर्वगं निःप्रपञ्चं[८]
कूटस्थं कर्णनासा मुखनयनशिरः सर्वतःपाणिपादम् ।
भूतान्तं भूतनाथं त्रिभुवनवरधृक्कारणं कारणानां
विद्याद्यं योगगम्यं[९] परमसुखपदं कालचक्रं नमस्ये ।।२४५।।
स्रष्टारं शक्तिरूपं तडिदनलनिभं द्वादशादित्यतेजं
ज्ञानं सर्वावभासं परपदगमनं तं विसर्गं नमामि ।
शुक्लं त्रैलोक्यनाथं स्रवति शशधरात् संस्थितं लोकमूर्ध्नि
पीयूषं मृत्युनाशं भवभयमथनं बिन्दुरूपं नमामि ।।२४६।।

चिन्मात्रं बिन्दुरूपं त्रिदशपरिवृतं दुःखसौख्यस्वभावं
साधूनां शान्तरूपं सुकृतमनुभवं दारुणं दारुणानाम् ।
यो यत् कर्म प्रकुर्यात् स्वमनसि विधिवत् तत्फलं तस्य जातं
लोकेशं विश्वरूपं त्रिभुवनजननं वज्रसत्त्वं नमामि ।।२४७।।
एको नैकोऽपि चैकः समविषममनः सव्यवामाग्रपृष्ठ
ऊर्ध्वाधो वै समन्तात् सितहरितमहाविश्ववर्णैकवर्णः[१०] ।
ह्रस्वो दीर्घः प्लुतश्चागुण इति सगुणः स्त्री[११] नरश्चानरः
स्त्री[१२]
यः सर्वाधार एकः सुभग वरभगस्ते नमस्ते नमस्ते २४८
सोऽहं यो मर्त्यलोके व्यपगतकलुषः श्रीगुरुर्वज्रधारी
नूनं तस्यापराधाद्भवति हि नरकं प्राणिनां नात्र चित्रम् ।
तुष्टोऽहं तस्य तुष्टचा कुपित इति महांस्तस्य कोपानलेन
सत्त्वानां सैव मोक्षः समसुखफलदो वन्द्यपूज्यः सुतानाम्
।।२४९।।
कः पापी श्रीगुरोर्यः सुचरणकमलं वन्दते न त्रिकालं
कोऽज्ञानी यस्त्रिकालं बहुविधकुसुमैर्मण्डलं नो करोति ।
कोऽवीचीं याति शीघ्रं समसुखदगुरोः खेदमुत्पादको यः
कः प्रज्ञाज्ञानलाभी वरगुरुचरणं यो न मुञ्चत्यनष्टः २५०
को नष्टो यस्त्रिनाडचामपि गतमरुता मार्यतेऽनन्तकालं
कः शूरो मारयेद्यः समविषमपथि प्राणमपानवायुम् ।
को दाता श्रीगुरोर्यो ददति निजतनुं पुत्रदारादि सर्वं
को नीचो वञ्चको यः स्वहृदयकलुषाकृष्टचित्तः शठश्च
।।२५१।।
श्रीमान् श्रीधर्मचक्रे सुरवरनमिते विष्टरे विश्ववर्णे
तस्मिन् बुद्धोपविष्टो गदति नरपते तन्त्रराजादिबुद्धम् ।
चन्द्रप्रश्नावबोधे[१३] त्रिदशनरगुरुर्यच्च सत्त्वार्थहेतोस्
तच्चेदानीं मया ते गदितमपि कलापेऽन्यतन्त्रं हि सूर्यः २५२
बुद्धोक्तं कालचक्रं गदितमपि मया स्रग्धरावृत्तबन्धैर्
अस्य त्वं देशनां वै कुरु कुलिशधरीं मन्त्रिणां पौण्डरीक ।
प्रज्ञाज्ञानस्य लाभी सरविमुनिकुलं वै तथास्मद्बभूव
एवं सत्त्वा भवन्तु त्रिविधभवगताः कालचक्रप्रसादात् २५३
सूर्य त्वं वा नरेन्द्रस्त्वपरगतभवे कालचक्रैकयोगाज्
जातोऽस्मिन् ब्रह्मवंशे[१४] यशनृपतिरहं मञ्जुघोषः प्रिया[१५]

[४] ने. °य:   [५] ने. °न्ते   [६-६] ने. सकलहिभुवने   [७] ने. कालो   [८] ने. °ञ्च   [९] ने. °मन्यं   [१०] ने. °वर्ण   [११] के. ने. श्री
ते   [१५] ने. प्रियो

मे ।
श्रीतारा, पौण्डरीकः सकलगुणनिधेर्लोकनाथोऽब्जचिह्नो[1]
नालेनेन्दीवरस्य स्वपरगतभवं पश्य सर्वं यथार्थम् ।।२५४।।
नालेनेन्दीवरस्य स्वपरगतभवं वीक्ष्य सर्वं यथार्थं
सूर्यः सार्धं मुनीन्द्रैः समुकुट[2]शिरसा कल्किनः पादपद्मम् ।
हस्ताभ्यां वन्दयित्वा वदति मुनिकुलं रौद्रसंसारदुःखाद्
उद्धृत्य ज्ञानमार्गे परमकरुणया स्थापयेत् त्वेकशास्ता २५५
वृद्धोऽपि त्वं कुमारः सकलजिनसुतोऽप्यादिबुद्धस्त्वमादौ
स्त्रीसङ्गी[3] ब्रह्मचारी परमकरुणया लोकबन्धुर्यमारिः ।
सौम्योऽपि त्वं सुवज्रो मरणभयहरस्त्वं सदामारमारो
मुक्तोऽपि त्वं भवेऽस्मिन् प्रविशसि जगतः पाचनार्थं
यशास्त्वम् ।।२५६।।

सूर्योऽहं ब्रह्मवंशे मुनिकुलनमितः पातितः पादमूले
सत्त्वानां मोक्षहेतोः प्रकटितमवनौ कालचक्रं समस्तम् ।
कल्कीगोत्रे त्वमर्कः क्षितिपतिनमितः श्रीयशः श्रीकलापे
युष्मत्पादारविन्दं शरणमधिगतो रौद्रसंसारभीतः ।।२५७।।
वैशाख्यां पौर्णिमायां[4] निशिसमयगते वासरे चाप्रविष्टे
मुद्रासिद्धिं ततोऽर्को मुनिजनसहितोऽधिष्ठितो विश्वभर्त्रा[5] ।
सत्त्वानां मोक्षहेतोः सकलभुवि गतं चित्तवज्रं यथा मे
सत्त्वानामेव यातु त्रिविधभवगतं कालचक्रप्रभावात् २५८
तन्त्रार्थं देशयित्वा परमकरुणया सर्वसत्त्वार्थकर्ता
पुत्रस्याज्ञां ददाति प्रवर गुणनिधिः पुण्डरीकस्य नूनम् ।
कर्तव्यं पुस्तकस्थं सकलमविकलं तन्त्रराजं त्वयादौ
टीकां कृत्वा ततो वै परपदगमनं स्वेच्छया लोकबन्धोः २५९

**॥ इति श्रीमत्कालचक्रतन्त्रराजः समाप्तः ॥**

ऊर्ध्वं ये बोधिसत्त्व
दैत्यानां मर्त्यलोके

पाताले ये फणीन्द्र
ते सर्वे पालयन्तु प्र
सत्त्वानां मोक्षहेतो
तन्त्रं श्रीकालचक्रं
प्रज्ञोपायैकयोगं[6]
सत्त्वाः पुण्येन तेन

**।। इति [7]द्वादश**

---

[1] ने. °चिह्नौ [2] ने. समकुट° [3] ने. °सर्गी [4] ने. पूर्णिमायां [5] ने.° भर्त्ता [6] ने. °योग [7] ने. श्रीद्वादश°

ऊर्ध्वं ये बोधिसत्त्वाः परमभयकरा मारपक्षे स्थितानां
दैत्यानां मर्त्यलोके दिशि विदिशि गताः क्रोधराजाः
सभार्याः ।
पाताले ये फणीन्द्रा ग्रहपरमशुभं सर्वदा बन्धयन्ति
ते सर्वे पालयन्तु प्रतिदिनसमयेऽज्ञानलोकं समन्तात् २६०
सत्त्वानां मोक्षहेतोर्जिनपतिगदितं देशितं यन्मया च
तन्त्रं श्रीकालचक्रं लघुतरमखिलं वज्रसत्त्वाधिदेवम् ।
प्रज्ञोपायैकयोगं[६] जिनपतिकुलिशैः षोडशाकारतत्त्वं
सत्त्वाः पुण्येन तेनाक्षरपरमसुखं यान्तु तस्मै नमोऽस्तु
॥२६१॥

**॥ इति [७]द्वादशसाहस्रिकादिबुद्धोद्धृते श्रीमति कालचक्रे ज्ञानपटलः पञ्चमः ॥**

---

श्रीद्वादश°

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer